VEDIC SELECTIONS

Revised Edition

EDITED BY

KSHITISH CHANDRA CHATTERJI, M.A., D.LITT.,

SASTRI, VIDYA-VACASPATI

CALCUTTA UNIVERSITY

1954

PRINTED IN INDIA

PRINTED AND PUBLISHED BY SIBENDRANATH KANJILAL,
SUPERINTENDENT, CALCUTTA UNIVERSITY PRESS,
48, HAZRA ROAD, BALLYGUNGE, CALCUTTA.

1874B.T.—November, 1954.—G

CONTENTS

PART I

PREFACE

This little volume contains pieces from Vedic literature prescribed for the B.A. Honours Examination in Sanskrit of the Calcutta University for 1945 and subsequent years. It is, however, merely a rough draft and not a finished product and as such is not immune from the imperfections inherent in such hasty work. Still in the preparation of the notes the needs of the student have constantly been kept in view and a sincere attempt has been made to explain whatever may present any difficulty to the teacher or the student. It is just possible that the ordinary student will find too much of comparative philology in these pages and he may skip those portions at first if he feels inclined to do so. He must, however, make it a point to have by his side *Macdonell's Vedic Grammar for Students* and if possible, his *Vedic Reader* also (both published by the Oxford University Press) which are indispensable to all beginners of Vedic studies.

Śākalya has always been regarded as one of the earliest interpreters of the Ṛgveda and his Padapāṭha, inspite of its obvious imperfections and limitations, will amply repay careful study. The claim of a European scholar that he could have produced a much better Padapāṭha reminds one of the child on the father's shoulders claiming to be bigger than his father. Much greater space has therefore been devoted to the Padapāṭha than is usual in such handbooks.

Greater care has also been bestowed on the commentary of Sāyaṇa than in any previous work of this type and practically every single quotation in the commentary on the Ṛgveda portion is traced to its source. Different readings have been

discussed and new readings adopted in many places. Copious extracts have been given from other commentaries and it has been shown in many cases that some of the explanations once thought to be the monopoly of European scholars were, in fact, suggested long ago by Indian savants. In the case of the Devīsūkta, so dear to the heart of the Hindu, the Editor has composed a new commentary unfolding the peculiar beauty of each word and expression in the hymn.

The English translations of many of the passages from the Ṛgveda quoted in the notes are taken from Griffith and of those from the Atharvaveda from Whitney. The Sanskrit explanations of a few viniyoga-passages in Sāyaṇa's commentary given as foot-notes are from the pen of the Editor's guru Mahāmahopādhyāya Pandit Sitarama Sastri of the Calcutta University. The Editor takes this opportunity of expressing his indebtedness to these scholars as also to all the other Pūrvācāryas, both Indian and foreign, especially to Geldner and Macdonell, whose works have been drawn upon for this volume. The Editor's handwriting is the despair of compositors. That the misprints are not more numerous is due to the devotion and skill of Mr. Ramkrishna Chakravarti, M.A., Proof Reader in the Calcutta University Press and a former pupil of the Editor.

CALCUTTA
23rd October, 1944.

KSHITISH CHANDRA CHATTERJI.

ABBREVIATIONS

A.—Ātmanepada
AA.—Aitareya Āraṇyaka.
AB.—Aitareya Brāhmaṇa.
Abl.—Ablative.
Acc.—Accusative.
acc.—according.
adj.—adjective.
A.G.—Alt indische Grammatik.
Aor.—Aorist.
Āp. Ś.S.—Āpastamba Śrauta Sūtra.
Arm.—Armenian.
Ātm.—Ātmanepada, Ātmanepadin.
AU.—Aitareya Upaniṣad.
AV.—Atharvaveda.
Av.—Avesta.
AVS.—Sāyaṇa on AV.
B.I.—Bibliotheca Indica.
B.P.—Bhāgavata Purāṇa.
BD.—Bṛhaddevatā.
Bh.—Bhānuji.
B.S.—Brahma-Sūtra.
BU.—Bṛhadāraṇyaka Upaniṣad.
BUS.—Śaṅkarācārya on Brahma-Sūtra.
Cf.—compare.
class.—classical.
COJ.—Calcutta Oriental Journal.
comd.—compound.
comp.—comparative.
CU.—Chāndogya Upaniṣad.
D.—Durga.
Dat.—Dative.
dec.—declension.
du.—dual.
Eng.—English.
f. or fem.—feminine.
G., Geld.—Geldner.
Gāθ. or G. Av.—Gathic Avesta.
Gen.—Genitive.
Gk.—Greek.
Germ.—German.
Goth.—Gothic.
Ib.—Ibid.
I.C.—Indian Culture.
I.E.—Indo-European.
IHQ.—Indian Historical Quarterly.
ind.—indicative.
Ins., Instr.—Instrumental.
ip. or imp.—imperfect.
ipv. or imper.—imperative.
JAOS.—Journal of the American Oriental Society.

J.N.V.—Jaiminīya Nyāyamālā-vistara.
JUB.—Jaiminīya Upaniṣad Brāhmaṇa.
KS.—Kāṭhaka Saṁhitā.
Kṣīra.—Kṣīrasvāmin.
KU.—Kauṣītaki Upaniṣad.
Lat.—Latin.
Lit(h).—Lithuanian.
Loc.—Locative.
m., masc.—masculine.
M.—Max Müller's edition of the Ṛgveda.
M.M.—Max Müller.
Mah. Nār.—Mahā Nārāyaṇa Upaniṣad.
MS.—Maitrāyaṇī Saṁhitā.
M.S.—Mīmāṁsā-Sūtra.
MSS.—Manuscripts.
Mah.—Mahīdhara.
Mbh.—Mahābhāṣya or Mahābhārata.
Nir.—Nirukta.
n.—noun.
n., neut.—neuter.
Nom.—Nominative.
O. Bulg.—Old Bulgarian.
O.E.—Old English.
Old.—Oldenberg.
O.P.—Old Persian.
Opt.—optative.
P.—Poona edition of the Ṛgveda.
Pā.—Pāli.
PB.—Pañcaviṁśa Brāhmaṇa.
P., Par.—Parasmaipada.
Part.—Participle.
pass.—passive.
Pf., perf.—perfect.
pl.—plural.
Pp.—Padapāṭha.
Pr.—Prakrit.
pp.—pages.
pres.—present.
P.S.—Phiṭ Sūtra.
Rām.—Rāmāyaṇa.
RP.—Ṛk-prātiśākhya.
RV.—Ṛgveda.
s., sing.—singular.
S.—Sāyaṇa.
Ś.—Śaṅkarācārya.
S.B.E.—Sacred Books of the East Series.
sb., subj.—subjunctive.
ŚB.—Śatapatha-Brāhmaṇa.
Śiś.—Śiśupālavadha.
S.K.—Siddhānta-Kaumudī.
Ś.K.—Śabdakaustubha.
Sk.—Skandasvāmin.
Sk.-M.—Skanda-Maheśvara.
Skt.—Sanskrit.
Sp.—Saṁhitāpāṭha.
ST.—Saṁhitā-text.
St.—Stanza.
ŚU.—Śvetāśvatara Upaniṣad.
Śira. U.—Atharvaśira Upaniṣad.

Subj.—Subjunctive.
super.—superlative.
SV.—Sāmaveda.
Śvet.—Śvetāśvatara.
syl.—syllable.
TA.—Taittirīya Āraṇyaka.
TAS.—Sāyaṇa on TA.
Tā. B.—Tāṇḍya Brāhmaṇa.
TB.—Taittirīya Brāhmaṇa.
TS.—Taittirīya Saṁhitā.
TSS.—Sāyaṇa on the Taittirīya Saṁhitā.
TU.—Taittirīya Upaniṣad.
U.—Upaniṣad.
UC.—Uttararāmacarita.
Ujj.—Ujjvaladatta.
V.—Vani Vilas Press edition.
Ved.—Vedic.
Voc.—Vocative.
V. G. S.—Macdonell's Vedic Grammar for Students.
V. M.—Veṅkaṭa-Mādhava.
VP.—Vājasaneyi-Prātiśākhya.
V.P.—Viṣṇu Purāṇa.
VS.—Vājasaneyi-Saṁhitā.
Y.Av.—Younger Avesta.
YV.—Yajurveda.
अनु°—अनुक्रमणी, सर्वानुक्रमणी ।
आ° श्रौ°—आश्वलायनश्रौतसूत्रम् ।
आ° गृ°—आश्वलायनगृह्यसूत्रम् ।
उ°—उणादिसूत्रम् ।
ऋ° सं°—ऋग्वेदसंहिता ।
ऐ° आ°—ऐतरेयारण्यकम् ।
ऐ° ब्रा°—ऐतरेयब्राह्मणम् ।
ऐ° उ°—ऐतरेयोपनिषत् ।
का°—काशिका ।
छा° उ° or छा°—छान्दोग्योपनिषत् ।
तै° आ°—तैत्तिरीयारण्यकम् ।
तै° ब्रा°—तैत्तिरीयब्राह्मणम् ।
तै° सं°—तैत्तिरीयसंहिता ।
धा°—धातुपाठः ।
नि°—निरुक्तम् ।
निघ°—निघण्टुः ।
नृ° उ°—नृसिंहोपनिषत् ।
पा°—पाणिनिः ।
फि°, फि° सू°—फिटसूत्रम् ।
ब्र° सू°—ब्रह्मसूत्रम् ।
भा°—महाभाष्यम् ।
महा° शा°—महाभारत-शान्तिपर्व ।
शत° ब्रा°—शतपथब्राह्मणम् ।

ऋग्वेदः

AGNI

Characteristic Features

To the ancient Indian (as to the ancient Iranian) Agni was the most prominent divinity. Though Indra has a larger number of hymns (about 250) to his credit than Agni (nearly 200) in the Ṛgveda now extant, still the fact that in every Maṇḍala the hymns to Agni occupy the place of honour and are followed by the hymns addressed to Indra (मण्डलादिष्वाग्नेयैन्द्रात् —*Sarvānukramaṇī* XII. 12) clearly shows that in the eyes of the Vedic Indian Agni was more important than Indra. And it is but natural that it should be so, for fire prepared his food for him, fire baked his pottery and bricks, fire forged his implements for peace and war, fire helped him in his encounter with wild beasts, barbarians, ghosts and goblins, fire dispelled darkness and drove away demons. Like his own mother fire was a witness of his joys and sorrows. Marriages were solemnised in the presence of fire and his last mortal remains were consigned to fire's friendly* flames.

---

* The friendliness of fire is almost proverbial in every country. The English poet sings:

A fire's a good companionable friend,
A comfortable friend, who meets your face
With welcome glad, and makes the poorest shed
As pleasant as a palace. Are you cold ?
He warms you—weary? he refreshes you—
Hungry? he doth prepare your food for you—

Thus the connexion of the Vedic Indian was closer with Agni than with any other divinity. He lived in the same house with Agni who is consequently the only deity to be called गृहपति, the master of the house, who is seated in every home (निषसाद दमेदमे। कविर्गृहपतिर्युवा॥ vii. 15. 2). Agni is a brilliant guest in every house (स दर्शतश्रीरतिथिर्गृहेगृहे x. 91. 2). He is besought to be easy of access like a son to his father (स नः पितेव सूनवेऽग्ने सूपायनो भव i. 1. 9). He is the friend of mortals (मर्तेषु मित्रः i. 67. 1). He is the brother of men, the dear friend, the friend for friends to cherish (त्वं जामिर्जनानामग्ने मित्रो असि प्रियः। सखा सखिभ्य ईड्यः॥ i. 75. 4). And Agni's friendship for his worshipper is ancestral (मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा अभि विदुष्कविः सन् i. 71. 10) 'for he is the god whom his forefathers kindled and to whom they prayed.' He is a father, mother, brother, son, kinsman and friend (अग्निं मन्ये पितरमग्निमापिमग्निं भ्रातरं सदमित् सखायम् x. 7. 3 See under i. 1. 9; पिता माता सदमिन्मानुषाणाम vi. 1. 5).

Agni is the never-failing benefactor of his worshippers. He is their protector, preserver and deliverer. He carries him who praises him across calamities as in a ship over the sea (पर्षद् विश्वाति दुरिता गृणन्तम् iii. 20. 4). He watches with a thousand eyes over the man who gives him food and offers him आज्य and घृत and nourishes him (यो अस्मा अन्नं तृष्वादधात्याज्यैर्घृतैर्जुहोति पुष्यति। तस्मै सहस्रमक्षभिर्वि चक्षे x. 79. 5). Agni gives riches—hundredfold, thousandfold to the man who observes his laws (त्वमग्ने प्रमतिस्त्वं पितासि नस्त्वं वयस्कृत् तव जामयो वयम्। सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति व्रतपामदाभ्य॥ i. 31. 10).

Are you in darkness? he gives light to you—
In a strange land? he wears a face that is
Familiar from your childhood. Are you poor?
What matters it to him? He knows no difference
Between an emperor and the poorest beggar!
Where is the friend, that bears the name of man,
Will do as much for you?

—MARY HOWITT.

Not only does Agni bestow domestic felicity, prosperity and riches on his worshipper, he grants immortality also (त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवेदिवे i. 31. 7), he is the guardian of immortality (अमृतस्य रक्षिता vi 7. 7). The worshipper prays to him to forgive sins committed through folly and to make him guiltless towards Aditi and avert Varuṇa's wrath (यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः। कृधी ष्वस्माँ अदितेरनागान् व्येनांसि शिश्रथो विष्वगग्ने ॥ iv. 12. 4; त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेळोऽव यासिसीष्ठाः। iv. 1. 4).

Agni is the Brāhmaṇa of Brāhmaṇas, the first द्विजन्मा (द्विजन्मानं रयिमिव प्रशस्तम् i. 60. 1, अभि द्विजन्मा त्रिवृदन्नमृज्यते i. 140. 2). One poet says: विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ii. 9. 3, 'we would pay homage to you in your highest birth, O Agni, we would pay homage with songs of praise to you in your lower abode.' The reference here is to Agni's birth in heaven as the sun and on the earth as sacrificial fire. Another poet says: यदग्ने दिविजा अस्यप्सुजा वा सहस्कृत। तं त्वा गीर्भिर्हवामहे ॥ viii. 43. 28. 'Be you, O Agni, born in heaven or in the waters, O thou made by strength, as such we call on thee with songs.'

More generally, however, Agni's three births are referred to: स्तोमेन हि दिवि देवासो अग्निमजीजनञ्छक्तिभी रोदसिप्राम्। तमू अकृण्वन् त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः ॥ x. 88. 10. "Then by the laud the Gods engendered Agni in heaven, who fills both worlds through strength and vigour. They made him to appear in three-fold essence: he ripens plants of every form and nature." The threefold existence of Agni referred to here is his abode on earth as the sacrificial fire, on the atmosphere as lightning and in heaven as the sun. Agni's three births are referred to in x. 45. 1 also: दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः। तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥ "First Agni sprang to life from out of heaven[1]: the second time from us[2] came Jātavedas.

---

[1] In the shape of the Sun.

[2] In the form of the sacrificial fire.

Thirdly the manly-souled was in the waters.[1] The pious laud and kindle him the Eternal."

Again in vi. 48. 5 we find यमापो अद्रयो वना गर्भमृतस्य पिप्रति। सहसा यो मथितो जायते नृभिः पृथिव्या अधि सानवि॥ "Whom floods, stones and trees support, the offspring of eternal Law; He who when rubbed with force is brought to life by men upon the lofty height of the earth." The various births of Agni are mentioned in ii. 1. 1: त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि। त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः॥ "Thou Agni art born at break of day, thou, greedy of burning up every thing, thou art born of the waters, from out of the stone, from out of the trees and herbs, thou, O God of men, art born shining." Again in i. 70. 2 we find गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथाम। अद्रौ चिदस्मा अन्तर्दुरोणे विशां न विश्वो अमृतः स्वाधीः॥ "The embryo of the waters, the embryo of the trees, the embryo of those that stand and those that move, even in the stone as his house; he is as the companion of the clan among clans, the well-meaning immortal."

"Owing to the diverse births above described," says Prof. Macdonell, "Agni is often regarded as having a triple character, which in many passages is expressly referred to with some form of the numeral 'three'. This earliest Indian trinity is important, for on it is based much of mystical speculation of the Vedic age. Agni's births are three or threefold (त्रीणि जाना परि भूषन्त्यस्य i. 95. 3, त्रिरस्य ता परमा सन्ति सत्या स्पार्हा देवस्य जनिमान्यग्नेः: iv. 1. 7) The gods made him threefold (x. 88. 10). He is threefold light (अर्कस्त्रिधातू रजसो विमानः iii. 26. 7), has three heads (त्रिमूर्धानं सप्तरश्मिं गृणीषे i.146.1), three tongues, three bodies, three stations (अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः। तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन्॥ iii. 20. 2).[2]"

[1] In the waters of the atmospheric region as lightning.

[2] *Vedic Mythology*, p. 93.

And gradually this gave rise to the idea of one God behind all these different gods. Thus we find in AV. 12. 3. 13:

स वरुणः सायमग्निर्भवति स मित्रो भवति प्रातरुद्यन्।
स सविता भूत्वान्तरिक्षेण याति स इन्द्रो भूत्वा तपति मध्यतो दिवम्॥

"This Agni becomes Varuṇa in the evening; in the morning rising he becomes Mitra; he, having become Savitā, goes through the atmosphere; he, having become Indra, burns through the midst of the sky." (Whitney).

In RV. ii. 1 also Agni is identified with all the important divinities:

त्वमग्न इन्द्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः।
त्वमग्ने राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः।
त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे।[1]

"In the personification of Agni, the physical characteristics of fire are ever present before the mind's eye of the poet. As fire is fed with clarified butter, many of Agni's epithets contain the word घृत. He is घृतान्न vii. 3. 1, घृतनिर्णिक् iii. 17. 1 (with a garment of butter), घृतपृष्ठ v. 4. 3, घृतप्रतीक (butter-faced) i. 143. 7, etc. As fire is fed with fuel also, Agni is द्र्वन्न (with the wood for his food ii. 7. 6.). In reference to the forest fires Agni is described as eating and chewing the forests (अग्निर्जम्भैस्तिगितैरत्ति भर्वति i. 143. 5) and as blackening them with his tongue ((वना...कृष्णा कृणोति जिह्वया vi. 60. 10). He is invited to drink सोम्यं मधु (i. 14. 10) and in reference to the three pressings of सोम (प्रातःसवन, माध्यन्दिन सवन and तृतीय सवन) Agni's food is described as having been prepared thrice (त्रिस्ते अन्नं कृणवत् सस्मिन्नहन् iv. 12. 1).

---

[1] *Cf.* SB. x. 5. 2. 20 तमेतमग्निरित्यध्वर्यव उपासते। यजुरिति, एष हीदं सर्वं युनक्ति। सामेति छन्दोगाः, एतस्मिन् हीदं सर्वं समानम्। उक्थमिति बह्वृचाः, एष हीदं सर्वमुत्थापयति। यातुरिति यातुविदः, एतेन हीदं सर्वं यतम्। विषमिति सर्पाः। सर्प इति सर्पविदः। ऊर्गिति देवाः। रयिरिति मनुष्याः। मायेत्यसुराः। * स्वधेति पितरः। देवजन इति देवजनविदः। रूपमिति गन्धर्वाः। गन्ध इत्यप्सरसः।

His complexion is bright (शुक्रवर्ण i. 140. 1, शुचिवर्ण v. 2. 3) and he is of brilliant splendour (चित्रभानु i. 27. 6, चित्रशोचिः vi. 10. 3). He has flaming hairs (शोचिष्केश i. 45. 6), tawny hairs (हरिकेश iii. 2. 13). He is described as possessing sharp teeth (तिग्मजम्भ) i. 79. 6), brilliant teeth (शुचिदन् v. 7. 7), golden teeth (हिरण्यदन्तम् v. 2. 3.) and burning teeth (तपुर्जम्भ i. 58. 5.) He has a golden beard (हरिश्मश्रुः v. 7. 7), iron grinders (अयोदंष्ट्र x. 87. 2.) and sharp, consuming jaws (तिग्मा अस्य हनवः viii. 60. 13, नाना हनू विभृते सं भरेते असिन्वती बप्सती भूर्यत्तः x. 79. 1). He is in one passage described as without head and without feet (अपादशीर्षा iv. i. 11) and yet he has a burning head (तपुर्मूर्धा vii. 3. 1), three heads (त्रिमूर्धानं सप्तरश्मिम् i. 146. 1). He is four-eyed (चतुरक्ष i. 31. 13), thousand-eyed (सहस्राक्ष i. 79. 12) and thousand-horned (सहस्रशृङ्ग v. 1. 8).

But above all Agni is a priest. He is the greatest and best of sacrificers (यजिष्ठ). He is the domestic priest *purohita*, *ṛtvij*, *hotṛ*, *Brahman*, who wakes with the dawn (उषर्बुध), or even before the dawn, appointed both by men and gods, who concentrates in his own person, and exercises in a higher sense, all the various sacrificial offices which the Indian ritual assigned to a number of different human functionaries, the Adhvaryu, Hotṛ, potṛ, neṣṭṛ, praśāstṛ, etc. He is a sage, the divinest among sages (असुरो विपश्चिताम् iii. 3. 4), intimately acquainted with all the forms of worship, the wise director, the successful accomplisher, and the protector, of all ceremonies, who enables men to serve the gods in a correct and acceptable manner, in cases where this would be beyond their own unaided skill. He is a swift messenger (रघुपत्वा x. 6. 4), moving between heaven and earth, commissioned both by gods and by men to maintain their mutual communications, to announce to the immortals the hymns, and to convey to them the oblations of their worshippers, or to bring them down from the sky to the place of sacrifice. Being acquainted with the innermost recesses of the sky, he is well fitted to act as the herald of men to summon

the gods to the sacrifices instituted in their honour. He comes with them seated on the same car (आ विश्वेभिः सरथं याहि देवैः vii. 11. 1), or in advance of them (आ देवानामग्रयावेह यातु x. 70. 2) and shares in the reverence and adoration which they receive. Without him the gods experience no satisfaction (न ऋते त्वदमृता मादयन्ते vii. 11. 1). He himself offers them worship (मनुष्वदग्न इह यक्षि देवान् vii. 11. 3, स यं यजस्व दिवि देव देवान् x. 7. 6)." MUIR, *Original Sanskrit Texts*, Vol. v, pp. 199-202.

"The derivation of Agni's name, Latin *ignis*, Lithuanian *ugnis*, is uncertain, though connexion with *aj*, 'drive', is not impossible. In the Avesta the name is unknown as such and it does not appear among the Mitanni gods, which speaks in favour of the view that it is a specific development of the Indian priest. But the worship of fire itself, apart from the special conception of it as Agni, is undoubtedly strongly marked in the period of the unity of the Indo-Iranians. The fire in the Avesta is the centre of a strong and developed ritual: the fire-priests Āthravans are clearly the same in origin as the Vedic Atharvans, and Ātar must have been conceived as a great and powerful god, giver of food, of fame, of offspring, the friend of the house, the repeller of foes, probably known as in the lightning and the plant-born forms." KEITH, *Religion and Philosophy of the Veda*, p. 161.

Hymn No 1

AGNI

i. 1

मण्डलम् १ सूक्तम् १

मधुच्छन्दा ऋषिः। अग्निर्देवता। गायत्री छन्दः।

1

ॐ अग्निमीळे पुरोहितं	ॐ अग्निम् । ईळे । पुरःऽहितम् ।
यज्ञस्य देवमृत्विजम् ॥	यज्ञस्य । देवम् । ऋत्विजम् ।
होतारं रत्नधातमम् ॥१॥	होतारम् । रत्नऽधातमम् ॥१॥

I praise (*īḷe*) Agni (*agnim*), the household priest (*puróhitam*) the divine (*devám*) ministrant (*ṛtvíjam*) of the sacrifice (*yajñásya*), the Hotṛ (*hótāram*) and the best bestower of wealth (*ratnadhā'tamam*).

सायण-भाष्यम्। 'अग्निमीळे' इति सूक्तं प्रातरनुवाके आग्नेये क्रतौ विनियुक्तम्। स विनियोग[1] आश्वलायनेन चतुर्थाध्यायस्य त्रयोदशे खण्डे सूत्रितः।

---

[1] विनियोगो नाम कर्मभिः सम्बन्धः। तथा चोक्तम्—'अनेनेदं तु कर्तव्यं विनियोगः प्रकीर्तितः' इति। स च द्विविधः—सामान्यतो, विशेषतश्च। कृत्स्नायाः संहिताया आम्नातक्रमेणैव ब्रह्मयज्ञादौ विनियोग आद्यः। अन्तिमस्तु तत्तत्क्रतौ सूत्रकारेणाश्वलायनेन प्रदर्शितः। स च द्विविधः—सूक्तविनियोगस्तृचादिविनियोग एकैकस्या ऋचो विनियोगश्चेति। "तत्रायं सूक्तविनि[illegible]। सोमयागे यस्मिन् दिने सोमस्य रसं निष्पाद्य होमः क्रियते तस्मात् सुत्यादिना[illegible] पूर्वस्या रात्रेरुत्तरार्धे पक्षिणामारावतः पूर्वं मन्त्रैः क्रियमाणा स्तुतिः प्रातरनुवाकः, तत्रेदं सूक्तं विनियुज्यते। प्रातरनुवाकेऽग्निरुषा अश्विनौ चेति तिस्रो देवताः

'अंवा नो अग्न इति षळग्निमीळेऽग्निं' तृतम्' [आ° श्रौ° सू° ४।१३।७] इति। तत्र हीनपादग्रहणात् सूक्तनिश्चयः, 'सूक्तं[1] सूक्तादौ हीने पादे' [आ° श्रौ° १।१।१८] इति परिभाषितत्वात्। तस्मिन् सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ[2]

सूयन्ते। प्रतिदैवतं च गायत्र्यादिसप्तच्छन्दोयुक्ता अनेके मन्त्राः पठनीया भवन्ति। स चायं प्रतिदैवतं स्तवः क्रतुशब्देनोच्यते।") अत्र क्रत्वङ्गभूतस्य प्रातरनुवाकस्यावयव उपचारेण क्रतुशब्दो वर्तते। "एवञ्चाग्नेः स्तव आग्नेयः क्रतुः, उषसः स्तव उषस्यः क्रतुः, अश्विनोः स्तव आश्विनः क्रतुरिति भवति।" एकैकस्मिन् क्रतौ प्रथमं छन्दः परिसमाप्य ततो द्वितीयं ततस्तृतीयमित्यनेन क्रमेणानुवक्तव्यम्। "तत्राग्नेये क्रतौ गायत्रीछन्दोयुक्तमन्त्रपाठप्रसङ्गे अग्निमीळे इति सूक्तं वक्तव्यम्।"

[1] आश्वलायनेन श्रौतसूत्रस्य प्रथमाध्यायस्य प्रथमे पाद उक्तम्—ऋचं पादग्रहणे ॥१७॥ सूक्तं सूक्तादौ हीने पादे ॥१८॥ अधिके तृचं सर्वत्र ॥१९॥ इति। याज्यानुवाक्यादिकं विदधानेन ग्रन्थकृता सूक्तादिगतस्य ऋग्विशेषस्य प्रथमपादस्य समुल्लेखे समग्रा ऋक् प्रत्येतव्या, प्रथमपादतो न्यूनस्य ग्रहणे सकलं सूक्तं बोद्धव्यम्, प्रथमपादतोऽधिके गृह्यमाणे तदादिकमृक्त्रयं विज्ञातव्यमिति तदर्थः।

[2] "अत्र सूक्ते प्रथमा 'अग्निमीळे' इत्येषा ऋक् पवमानेष्टौ विनियुज्यते। श्रुतिप्रतिपादितानां दर्शपूर्णमासादीनां कर्मणामनुष्ठाने त्रयोऽप्यग्नयोऽपेक्ष्यन्ते—आहवनीयो गार्हपत्यो दक्षिणाग्निरिति। ते चाग्नयो वैदिक्या प्रक्रियया समन्त्रमरणिमन्थनेन निष्पाद्यन्ते। अरणिशब्देन मन्थनोपयुक्तमश्वत्थकाष्ठं शमीकाष्ठञ्चोच्यते। तदिदमग्निनिष्पादनम् आधानशब्देनोच्यते। आधानस्य पूर्णाहुत्या समाप्तिः, होमेन समाप्तिः, इष्ट्या वा समाप्तिरिति पक्षत्रयम्। तत्रान्तिमे पक्षे तिस्र इष्टयोऽनुष्ठीयन्ते याः पवमानेष्टिशब्देनोच्यन्ते याज्ञिकैः। तत्र द्वितीयेष्टौ स्विष्टकृन्नामककर्मविशेषानुष्ठाने सूक्तगता प्रथमा 'अग्निमीळे' इत्येषा ऋग् याज्यात्वेन विनियुज्यते। यागे प्रधानदेवतोद्देशेन हविषः प्रदानात् परम् उपर्युक्तहविःशेषेणाग्न्युद्देशेन क्रियमाणो यागविशेषः स्विष्टकृच्छब्देनोच्यते। हविषः प्रदानावसरे पठ्यमानो मन्त्रो याज्येत्युच्यते। एवञ्चोक्तद्वितीयपवमानेष्टौ स्विष्टकृद्यागे हविषो दानावसरे पठनीयेयमृगित्यर्थः।" यद्यपि सूत्रे स्विष्टकृतः समुल्लेखो नोपलभ्यते तथापि सयाज्याशब्दप्रयोगबलात् 'संयाज्ये इत्युक्ते सौ[illegible]कृती प्रतीयाताम्' इति परिभाषया सिध्यति। यत्र यत्र याज्यास्थले गौरवप्रसङ्गं याज्याशब्दप्रयोगस्तत्र [illegible]ष्टकृत्सम्बन्धो बोद्धव्य इति तदर्थः।

स्विष्टकृतो याज्यात्वेन विनियोगः। स च द्वितीयाध्यायस्य प्रथमे खण्डे सूचितः— 'साह्वान् विश्वा अभियुजोऽग्निमीळे पुरोहितमिति, संयाज्ये' [आ॰ श्रौ॰ २।१।२६] इति। तत्र कृत्स्नपादग्रहणाद् ऋगित्यवगम्यते, 'ऋचं पादग्रहणे' [आ॰ श्रौ॰ १।१।१७] इति परिभाषितत्वात्। तथा 'संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात्' [आ॰ श्रौ॰ २।१।२१] इति परिभाषितत्वात् स्विष्टकृत्सम्बन्धनिश्चयः। तत्रापि द्वितीय[1]मन्त्रत्वेनोदाहृतत्वाद् याज्यात्वम्।

यद्यपि 'साह्वान्' [ऋ॰ सं॰ ३।११।६] इत्यनया पुरोनुवाक्ययैव देवताया अनुस्मरणरूपसंस्कारः[2] सिद्धस्तथापि याज्यानुवाक्ययोः समुच्चयो द्वादशेऽध्याये चतुर्थपादे मीमांसितः—

पुरोनुवाक्यया याज्या विकल्प्या वा समुच्चिता।
विकल्प्यान्यतरेणैव देवतायाः प्रकाशनात्॥*
पुरोवाक्यासमाख्यानाद्वचनाच्च समुच्चयः॥†

[जैमिनीयन्यायमालाविस्तरः १२।४।२]

---

[1] 'सर्वेषामग्रेऽग्रेऽनुवाक्यास्ततो याज्याः' [आ॰श्रौ॰ १।७।२] इति परिभाषणमिति शेषः।

[2] पुरोनुवाक्यया याज्यया च यागगतदेवता स्मार्यते। तादृशेन स्मरणेन कर्मणि कोऽपि गुण आधीयते यः संस्कार इति व्यपदिश्यते। तथाविधसंस्कारमन्तरेण कर्म न सिध्यतीति मीमांसकानां सिद्धान्तः। परं यत्रैक एव यागः, एकमेवाङ्गकर्म एकैव च देवता तत्रैकेनैव पुरोऽनुवाक्यामन्त्रेण देवताया अनुस्मरणे सिद्धे याज्यायाः समुच्चारणं सर्वथा पिष्टपेषण-कल्पमित्याशङ्क्याह—यद्यपीत्यादि।

* This line is not found in the *Jaiminīyanyāyamālāvistara*, xii. 4. 2 nor in the com. on TS. i. 1. 14.

† This line is printed as prose in M. and P. which read पुरोनुवाक्या for पुरोवाक्या. As the former contains a hypermetrical syllable and as the latter is mentioned as a variant in the N.S. Press edition of the *Jaiminīyanyāyamālāvistara* and as the connexion is very close between पुरोवाक्या and पुरोवाद: we have adopted पुरोवाक्या. No doubt hypermetrical syllables are sometimes met with in *Kārikās* specially when some rebellious name

देवताप्रकाशनकार्यस्यैकत्वाद् युग्मयो[1]र्यथा विकल्पस्तथैवैकयुग्मगतयोरिति[*] चेत्, मैवम्, पुरोनुवाक्येतिसमाख्याया उत्तरकालीनयाज्यामन्तरेणानुपपत्तेः। किञ्च, 'पुरोनुवाक्यामनूच्य याज्यया जुहोति' [तै० सं० ३।४।१०।४] इति प्रत्यक्षवचनेन देवतोपलक्षणहविष्प्रदानकार्ये [2]द्विरुक्तिपुरःसरं साहित्यं विधीयते। तस्मात् समुच्चय इति।

एतच्च 'अग्निम्' इत्यादि सूक्तं नवर्चम्, 'अग्निं नव मधुच्छन्दा वैश्वामित्रः' इत्यनुक्रमणिकायामुक्तत्वात्।[2] विश्वामित्र-पुत्रो मधुच्छन्दोनामकस्तस्य सूक्तस्य द्रष्टृत्वात्

---

does not lend itself to the requirements of the metre, still the shortening of the name for the purposes of the metre is much more common. The *J.N.V.* and the comm. on TS. and AB. read पुरैवाद्य: (पुरा इव आद्य:, the first alternative as in the previous case) which makes very good sense since they do not read the previous line at all, but with विकल्प्या in the 2nd line पुरैवाद्य: becomes meaningless.

1 "ऐन्द्राबार्हस्पत्ये कर्माण्य द्वे याज्यानुवाक्यायुगली समाम्नाते—'इदं वामास्ये हवि:' [ऋ० सं० ४।४९।१] 'अयं वां परि षिच्यते' [ऋ० सं० ४।४९।२] इत्येकं युगलम्, 'अस्मे इन्द्राबृहस्पती' [ऋ० मं० ४।४९।४] 'बृहस्पतिर्न: परि पातु' [ऋ० सं० १०।४२।११] इत्यपरम्। तत्र समुच्चयविकल्पसंशये यथा याज्यापुरोनुवाक्ययो: सत्यपि देवतोपलक्षणार्थत्वेनैकार्थत्वे मिथ: समुच्चय:, तथा युगलयोरपि स्याद् अविशेषात् इति प्राप्त उच्यते—विकल्प एकार्थत्वादिति। याज्यापुरोनुवाक्ययोस्तु पुरोनुवाक्यासमाख्याविशान्न्यायप्राप्तविकल्पबाधेन समुच्चय इति विशेष:।" शास्त्रदीपिका। 'पुर: पूर्वम् अनूच्यत इति समाख्या समानजातीययाज्यापेक्षया पूर्वभावं विना न सम्भवतीति तद्बलात् समुच्चय:।'

* Most editions read एकयुग्मयो:. *Jaiminīyanyāyamālāvistara*, several of M.M.'s MSS. and Sāyaṇa's commentary on TS. and AB., however, show clearly that the correct reading is एकयुग्मगतयो:.

[2] तृतीयमण्डलगतमन्त्राणां द्रष्टुर्महर्षेर्विश्वामित्रस्यैकशतं पुत्रा आसन्। तेषु च पञ्चाशज्ज्यायांसो मधुच्छन्दस: पञ्चाशच्च कनीयांस:। 'वत्सा:, शुन:शेपो[illegible]ा पुत्रत्वेन परिगृह्यते, स एव युष्माकं ज्येष्ठत्वेनावतिष्ठताम्' इति पित्राभ्यर्थितास्ते ज्यायांसो नाभ्यनन्दन्। मधुच्छन्दास्तु पञ्चाशता कनीयोभि: सार्धं पितुर्वचनं बहुमन्यतेत्यैतरेयब्राह्मणे प्रपञ्चितम्।

तदीय ऋषिः। ऋष गतौ[1] [धा० ६।७] इति धातुः। 'सर्वधातुभ्य इन्' [उ० ४।११७]। 'इगुपधात् कित्' [उ० ४।११९]। वेदप्राप्त्यर्थं तपोऽनुतिष्ठतः पुरुषान् स्वयम्भूर्वेदपुरुषः प्राप्नोत्। तथा च श्रूयते—'अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्, त* ऋषयोऽभवन्'[2] [तै० आ० २।९।१] इति। तथातीन्द्रियस्य वेदस्य परमेश्वरानुग्रहेण प्रथमतो दर्शनादृषित्वमित्यभिप्रेत्य स्मर्यते—

'युगान्तेऽन्तर्हितान् वेदान्† सेतिहासान् महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा॥' [महा० शा० २१०।१९]

इति। ऋष्यादिज्ञानाभावे प्रत्यवायः स्मर्यते—

'अविदित्वा ऋषिं छन्दो दैवतं[3] योगमेव च।
योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः॥' [बृहद्देवता ८।१३६]

नाम्नश्च निर्वचनमैतरेयारण्यके [१।१।३] समाम्नातम्—मधु ह स्म वा ऋषिभ्यो मधुच्छन्दाश्छन्दति, तन्मधुच्छन्दसो मधुच्छन्दस्त्वम् इति।

[1] The Dhātupāṭha, however, reads ऋषी गतौ. As the *Bālamanoramā* also shows ऋष we have retained it. The comm. on TA. says ऋषिधात्वर्थविषयत्वादृषयोऽभवन् where ऋषि is formed with इक् for धातुनिर्देश. Sāyaṇa, however, quotes the root correctly under RV. i. 31. 1, iii. 30. 9, etc. Durga's Gaṇapāṭha also shows ऋषी and the comm. *Manoramā* says distinctly: तुर्यस्वरानुबन्धोऽयं स्वरादिर्मूर्धन्यान्तः.

* Printed editions read तदृषयः where ह is evidently taken from the next sentence तदृषीणामृषित्वम्.

[2] ['कल्पादावेव ब्राह्मणाः सृष्टाः न त्वस्मदादिवत् कल्पमध्ये पुनः पुनर्जायन्त इति'] 'अजा नित्याः। पृश्नयः शुक्लाः शुद्धा इति यावत्। तान् तपस्यमानान् तपश्चरतः स्वयम्भु अनादि ब्रह्म वेदः अभ्यानर्षत्। ऋष गतौ। आभिमुख्येन प्राप्नोत्। ते वेदस्यार्षणाद् ऋषिशब्दवाच्या अभवन्निति वेदभाष्यम्।' *Bālamanoramā* on S. K. 1117.

† "सर्गादिसमये वेदान्" इति कौमुदीव्याख्याबालमनोरमाधृतः पाठः।

[3] 'यस्य वाक्यं स ऋषिः। या तेनोच्यते सा देवता। यदक्षरपरिमाणं तच्छन्दः।' [अनु० १।४-६]। योगः विनियोगः।

'ऋषिच्छन्दोदैवतानि ब्राह्मणार्थं[1] स्वराद्यपि ।
अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते ॥'

इति । वेदनविधिश्च स्मर्यते—

'स्वरो वर्णोऽक्षरं मात्रा विनियोगोऽर्थं[2] एव च ।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे ॥' * इति ।

अग्निमित्यादिसूक्तस्य च्छन्दोऽनुक्रमणिकायां यद्यप्यत्र नोक्तं तथापि परिभाषायामेवमुक्तम्—'आदौ गायत्रं प्राग्घिरण्यस्तूपात्'[3] [अनु० १२।१४] इति हिरण्यस्तूप ऋषिर्येषां मन्त्राणां वक्ष्यते ततः प्राचीनेषु मन्त्रेषु सामान्येन गायत्रं

---

[1] ब्राह्मणार्थम् appears to be a समाहार-द्वन्द्व like योगार्थम् and means the *Brāhmaṇas* laying down the विनियोग and the signification, *cf.* मन्त्राणां दैवतं छन्दो निरुक्तं ब्राह्मणानृषीन् । कृत्तद्धितादींश्चाज्ञात्वा यजन्तो यागकण्टकाः ॥ and the variant दैवं योगार्थमेव च for दैवतं योगमेव च.

[2] Uvaṭa (comm. on R. P.) reads दैवं योगार्थमेव च.

* This stanza and the previous one are taken from Ṣaḍguruśiṣya's commentary on Kātyāyana's *Sarvānukramaṇī* (i. 2) which reads अविदित्व for अविदित्वा in the first stanza.

[3] M. M. notes the reading हैरण्यस्तूपात् in some of his MSS. Macdonell adopts the obviously vicious reading हैरण्यस्तूपीयात् in his text of the *Sarvānukramaṇī* and mentions हिरण्यस्तूपात् as the reading in several MSS. Ṣaḍguruśiṣya explains the formation of गायत्रम् but is silent about हिरण्यस्तूपीय which seems to show that he reads हिरण्यस्तूपात् though a few lines later he appears to quote the rule with हैरण्यस्तूपीयात्. The previous rule मण्डलादिष्वाग्नेयमैन्द्रात् does not help us much as the hymns are called आग्नेय, ऐन्द्र, etc. in the *Anukramaṇī* but in the case of the seers no *taddhita* suffix is used. The *paribhāṣā* परं गायत्रं प्राग्वत्सप्रेः (अनुक्रमणी on RV. viii. 1); however, clearly shows that the author merely names the seer without any तद्धित suffix. It may be mentioned in this connexion that in the comm. on i. 12 S. quotes the rule as प्राग्घिरण्यस्तूपात् and there is no variant.

छन्द इत्यर्थः। पुरुषस्य पापसम्बन्धं वारयितुमाच्छादकत्वाच्छन्द इत्युच्यते। तच्चारण्यककाण्डे समाम्नायते—'छादयन्ति ह वा एनं छन्दांसि पापात् कर्मणः' [ऐ० आ० २।१।६] इति। अथवा चीयमानाग्निसन्तापस्याच्छादकत्वाच्छन्दः। तच्च तैत्तिरीया आमनन्ति—'प्रजापतिरग्निमचिनुत। स क्षुरपवि[1]र्भूत्वातिष्ठत्। तं देवा बिभ्यतो नोपायन्। ते छन्दोभिरात्मानं छादयित्वोपायन्। तच्छन्दसां छन्दस्त्वम्' [तै० सं० ५।६।६।१] इति। यद्वा अपमृत्युं वारयितुमाच्छादयतीति छन्दः। तदपि छान्दोग्योपनिषद्याम्नातम्—'देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशन्, ते छन्दोभिरात्मानमाच्छादयन्, यदेभिराच्छादयंस्तच्छन्दसां छन्दस्त्वम्' [छा० उ० १।४।२] इति। तथा द्योतनार्थ-दीव्यति-धातुनिमित्तो देवशब्द इत्येतदाम्नायते—'दिवा वै नोऽभूदिति तद्देवानां देवत्वम्'[2] [तै० ब्रा० २।२।९।९] इति। अतो दीव्यतीति देवः, मन्त्रेण द्योत्यते इत्यर्थः। अस्मिन् सूक्ते स्तूयमानत्वादग्निर्देवः। तथा चानुक्रमणिकायामुक्तम्—'मण्डलादिष्वाग्नेयमैन्द्रात्' [अनु० १२।१२] इति। तस्य सूक्तस्य प्रथमामृचं भगवान् वेदपुरुष आह—

अग्निमीळ इति। अग्निनामकं देवम् ईळे स्तौमि। 'ईड स्तुतौ' [धा० २।९] इति धातुः। डकारस्य ळकारो बह्वृचाध्येतृसम्प्रदायप्राप्तः। तथा च पठ्यते—

'अज्मध्यस्थ-डकारस्य ळकारं बह्वृचा जगुः।
अज्मध्यस्थ-ढकारस्य ळ्हकारं वै यथाक्रमम्॥'[3]

इति। मन्त्रस्य होत्रा प्रयोज्यत्वादहं होता स्तौमीति लभ्यते। कीदृशमग्निम्? **यज्ञस्य पुरोहितम्**। यथा राज्ञः पुरोहितस्तदभीष्टं सम्पादयति तथाग्निरपि यज्ञस्यापेक्षितं होमं सम्पादयति। यद्वा, यज्ञस्य सम्बन्धिनि पूर्वभाग

---

[1] क्षुरधारासमाना धारा यस्य वज्रस्य स क्षुरपविः। तथाविधवज्रवदुग्र इत्यर्थः। S.

[2] देवानामुत्पादिका या प्रजापतेस्तनूः सेयमहोरूपेण निष्पन्ना। अतो देवा हर्षात् 'अस्माकं दिवैवाभूत्' इत्युच्चरितवन्तः। अतो दिवायोगेन देवत्वं सम्पन्नम्। S.

[3] This stanza is from Ṣaḍguruśiṣya's commentary on Kātyāyana's *Sarvānukramaṇī* on RV. i. 28. The third line gives examples: ईळे मीळ्हे पुरोळाशं दृळ्हा साळ्हा निदर्शनम्. The text in Macdonell's edition has to be corrected.

आहवनीयरूपेणावस्थितम्। पुनः कीदृशम्? देवम् दानादिगुणयुक्तम्। पुनः कीदृशम्? होतारम् ऋत्विजम्। देवानां यज्ञेषु होतृनामक ऋत्विगग्निरेव। तथा च श्रूयते—'अग्निर्वै देवानां होता' [ऐ० ब्रा० १२।३] इति। पुनरपि कीदृशम्? रत्नधातमम् यागफलरूपाणां रत्नानामतिशयेन धारयितारं पोषयितारं वा।

[1]अत्राग्निशब्दस्य यास्को बहुधा निर्वचनं दर्शयति [नि० ७।१४]—"अथातोऽनुक्रमिष्यामः। अग्निः पृथिवीस्थानः, तं प्रथमं व्याख्यास्यामः। अग्निः कस्मात्? अग्रणीर्भवति। अग्रं यज्ञेषु प्रणीयते। अङ्गं नयति सन्नममानः। अक्नोपनो भवतीति स्थौलाष्ठीविः, न क्नोपयति न स्नेहयति। त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः—इताद् अक्ताद् दग्धाद् वा नीतात्, स खल्वेतेरकारमादत्ते, गकारमनक्तेर्वा, दहतेर्वा, नीः परः। तस्यैषा भवति—'अग्निमीळे'" इति। अस्यायमर्थः सामान्येन सर्वदेवतानां लक्षणस्याभिहितत्वाद् अनन्तरं यतः प्रतिपदं विशेषेण वक्तव्यत्वमाकाङ्क्षितम् अतोऽनुक्रमेण वक्ष्यामः। तत्र पृथिवीलोके स्थितोऽग्निः प्रथमं व्याख्यास्यते। कस्मात् प्रवृत्तिनिमित्तादग्निशब्देन देवताभिधीयत इति प्रश्नस्य 'अग्रणी'रित्यादिकमुत्तरम्। देवसेनामग्रे स्वयं नयतीत्यग्रणीः। एतदेकमग्निशब्दस्य प्रवृत्तिनिमित्तम्। तथा च ब्राह्मणान्तरम्—'अग्निर्वै देवानां सेनानीः'* इति। एतदेवाभिप्रेत्य बह्वृचा मन्त्रब्राह्मणे[2] आमनन्ति—'अग्निर्मुखं प्रथमो देवतानाम्'[3] [ऐ० ब्रा० १।४] इति मन्त्रः। 'अग्निर्वै देवानामवमः' [ऐ० ब्रा० १।१] इति ब्राह्मणम्। तथा तैत्तिरीयाश्चामनन्ति—'अग्निरग्रे प्रथमो

[1] *Cf.* S. under AV. iii. 1. 1.

* Quoted by Durgācārya in his commentary on Nir. vii. 14. 4 with वै, by Skanda-Maheśvara in the form अग्निर्देवतानां सेनानीः. S. quotes the passage again under AV. iii. 1. 1. As Sāyaṇa generally follows Durga we have added a वै after अग्निः here. Printed editions of RV. and AV. drop the particle वै.

[2] M. reads मन्त्रब्राह्मण, but मन्त्रब्राह्मणे being a dual ending in ए, sandhi is barred. *Cf.* S. on RV. i. 66. 7: अग्निद्वयं यास्केन मन्त्रब्राह्मणे दर्शिते।

[3] This is not found in RV., but is mentioned in the *Aitareya Brāhmaṇa*, *Āśvalāyana Śrautasūtra* and *Kāṭhaka Saṁhitā*.

देवतानाम्' [तै॰ ब्रा॰ २।४।३।३]। 'अग्निरवमो देवतानाम्' [तै॰ सं॰ ५।५।१।४] इति च। वाजसनेयिनस्त्वेवमामनन्ति— 'स वा एषोऽग्रे देवतानामजायत तस्मादग्निर्नाम'[1] इति। यज्ञेष्वग्निहोत्रेष्टिपशुसोमरूपेष्वग्रं पूर्वदिग्वर्त्याहवनीयदेशं प्रति गार्हपत्यात् प्रणीयत इति द्वितीयं प्रवृत्तिनिमित्तम्। सन्नममानः सम्यक् स्वयमेव[2] प्रह्वीभवन्नङ्गं स्वकीयं शरीरं नयति काष्ठदाहे हविष्पाके च प्रेरयतीति तृतीयं प्रवृत्तिनिमित्तम्। स्थूलाष्ठीव-नामकस्य महर्षेः पुत्रो निरुक्तकारः कश्चिदक्नोपन इत्यग्निशब्दं निर्वक्ति—तत्र न क्नोपयतीत्युक्ते न स्नेहयति, किन्तु काष्ठादिकं रूक्षयतीत्युक्तं भवति। शाकपूणिनामको निरुक्तकारो धातुत्रयादग्निशब्दनिष्पत्तिं मन्यते[3]। इतः 'इण् गतौ' [धा॰ २।३४] इति धातुः। अक्तः 'अञ्जू व्यक्ति-म्रक्षण-कान्ति-गतिषु' [धा॰ ७।१] इति धातुः। दग्धो 'दह भस्मीकरणे' [धा॰ १।९७१] इति धातुः। नीतो 'णीञ् प्रापणे' [धा॰ १।८८५] इति धातुः। अग्निशब्दो ह्यकार-गकार-नि-शब्दानपेक्षमाण एति-धातोरुत्पन्ना-

[1] *Cf.* SB. ii. 2. 4. 2: तद्वा एनमेतदग्रे देवानामजनयत तस्मादग्निः। अग्रिर्ह वै नामैतद् यदग्निरिति। SB. vi. 1. 1. 11: स यदस्य सर्वस्याग्रमसृज्यत तस्मादग्रिः। अग्रिर्ह वै तमग्निरित्याचक्षते परोक्षम्, परोक्षकामा हि वै देवाः। Sāyaṇa is evidently quoting here from the Kāṇva recension.

[2] This shows that सन्नममानः is in the कर्मकर्तृवाच्य.

[3] These derivations may appear strange, but we must not forget that they were suggested more than 2500 years ago. In Europe even the other day the Greek word *bathos* 'depth' or 'height' was derived from *bā* (गम्) 'to go', *thē* (धा) 'to make' and *es* (अस्) 'to be' and the Greek verbal form *luthēsomai* (1st sing. future formed from the passive stem in *thē-n* of *lu* to loose) was analysed into (1) the root *lu* 'to loose,' (2) *th* the relic of *thē* of *tithēmi* (दधामि), (3) *ē* representing *jā* 'to go' found in *eimi* (एमि), (4) *so* from *esomai*, the substantive verb, (5) *mai* representing an oblique case of the pronoun of the 1st person (मे) and the whole signifying 'there will be (*so*) a going (*ē*) to make (*th*) me (*mai*) loose (*lu*)'.

दयनशब्दादकारमादत्ते, अनक्ति धातुगतस्य ककारस्य गकारादेशं कृत्वा तमादत्ते, यद्वा दहति-धातुजन्याद् दग्ध-शब्दाद् गकारमादत्ते। नीरिति नयति-धातुः, स च ह्रस्वो भूत्वा परो भवति। ततो धातुत्रयं मिलित्वाग्नि-शब्दो भवति। यज्ञभूमिं गत्वा स्वकीयमङ्गं नयति—काष्ठदाहे हविष्पाके च प्रेरयतीति समुदायार्थः। तस्याग्नि-शब्दार्थस्य देवताविशेषस्य प्राधान्येन स्तुतिप्रदर्शनायैषा 'अग्निमीळे' इत्यृग् भवतीति।

तामेतामृचं यास्क एवं व्याख्यातवान् 'अग्निमीळेऽग्निं याचामि। ईळिरध्येषणाकर्मा पूजाकर्मा वा। पुरोहितो व्याख्यातः। यज्ञस्य*देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा[1]। यो देवः सा देवता। होतारं ह्वातारम्। जुहोतेर्होतेत्यौर्णवाभः। रत्नधातमम् रमणीयानां धनानां दातृतमम्' [नि० ७।१५] इति। अस्यायमर्थः—ईडति-धातोः† स्तुत्यर्थत्वं प्रसिद्धम्। 'धातूनामनेकार्थत्वम्' इति न्यायमाश्रित्य याच्ञाध्येषणापूजा अप्यस्योचितत्वात्तदर्थतया व्याख्याताः।

---

* Both Durga and Skanda-Maheśvara, however, read 'यज्ञस्य', meaning यज्ञस्य व्याख्यातः, the word यज्ञ having been explained in iii. 19.

[1] Patañjali (v. 1. 59) adds another meaning: दिवेरैश्वर्यकर्मणो देवः.

† Printed editions read ईडतिधातोः. where ईडति is grammatically indefensible. With इक् we should say 'ईडि' and with श्तिप् 'ईडिः,' and in both cases धातु will be superfluous, though the commentator uses expressions like अनक्ति-धातु, दहति-धातु etc. There is hardly any doubt that the भाष्यकार wrote ईडधातोः which is strictly correct. Yāska says ईळि and Patañjali writes; ईडिः स्तुतिचोदनायाच्ञासु दृष्टः प्रेरणे चापि वर्तते। अग्निर्वा इतो वृष्टिमीट्टे मरुतोऽमुतश्च्यावयन्तीति। (Mbh. i. 3. 1). In the commentary on AV. we often find the correct form चष्टे instead of the incorrect form चष्टति. Similarly, under RV. iii. 27. 1 जिगातिः is the correct reading and not गातिः.

[2] "निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः।
अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम्॥"
"क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः।
प्रयोगतोऽनुगन्तव्या अनेकार्था हि धातवः॥"

पुरोहितशब्दो द्वितीयेऽध्याये [नि० २।१२]—'यद्देवापिः शन्तनवे पुरोहितः' [ऋ० सं० १०।९८।७] इत्येतामृचमुदाहृत्य 'पुर एनं दधति' इति व्याख्यातः। तैत्तिरीयाश्च पौरोहित्ये स्पर्धमानस्य पश्वनुष्ठानं विधाय तत्फलत्वेन 'पुर एनं दधते' [तै० सं २।१।२।९] इत्यामनन्ति। देवशब्दो दान-दीपन-द्योतनानामन्यतममर्थमाचष्टे। यज्ञस्य दाता दीपयिता द्योतयितायमग्निरित्युक्तं भवति। दीपन-द्योतनयोरेकार्थत्वेऽप्यस्ति धातुभेदः। (यद्यप्यग्निः[1] पृथिवीस्थानस्तथापि देवान् प्रति हविर्वहनाद्* द्युस्थानो भवति। देवशब्द-देवताशब्दयोः पर्यायत्वान्मन्त्रप्रतिपाद्या काचिदग्निव्यतिरिक्ता देवता नान्वेषणीया।) होतृ-शब्दस्य ह्वयतिधातोरुत्पन्नत्वेन देवानामाह्वातारमिति। और्णवाभनामकस्तु मुनिः जुहोति-धातोरुत्पन्नो होतृशब्द इति मन्यते। अग्नेश्च होतृत्वं होमाधिकरणत्वेन द्रष्टव्यम्। रत्न-शब्दो द्वितीयाध्याये मघमित्यादिष्वष्टाविंशतौ धननामसु पठितः [निघ० २।१०]। रमणीयत्वाद्रत्नत्वम्। दधाति-धातुरत्र दानार्थवाचीति। तदिदं निरुक्तकारस्य यास्कस्य मन्त्रव्याख्यानम्।

अथ व्याकरण-प्रक्रियोच्यते। अगि-धातोर्गत्यर्थात्[4] [धा० ५।३८] 'अङ्गेर्नलोपश्च' [उ० ४।५०] इत्यौणादिकसूत्रेण नि-प्रत्ययः[5], इदित्वान्नुमागमेन[6] प्राप्तस्य नकारस्य लोपश्च भवति। अङ्गति स्वर्ग† गच्छति हविर्नेतुमित्यग्निः। तत्र 'धातोः' [६।१।१६२] इत्यकार उदात्तः। 'आद्युदात्तश्च' [३।१।३] इति प्रत्ययगत इकारोऽप्युदात्तः। 'अनुदात्तं पदमेकवर्जम्' [६।१।१५८] इति द्वयोरन्यतरमुदात्तमवशिष्येतरस्यानुदात्तत्वं प्राप्तम्। तत्र धातुस्वरे प्रथमतोऽवस्थिते सति पश्चादुपदिश्यमानः प्रत्ययस्वरोऽवशिष्यते। 'सति शिष्टस्वरो बलीयान्' [*Cf.* ६।१।१५८।९] इति हि न्यायः। ततोऽन्तोदात्तमग्नि-

---

[1] The reference is to *Nirukta* vii. 5. 2: अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वान्तरिक्षस्थानः सूर्यो द्युस्थानः।

* वहन् is a very good variant.

† See note on स्वर्गं गच्छति S. i. 1. 4.

[2] Both धातु and अर्थ are superfluous. [3] अस्यायमर्थः (p. 17)...,इति।

[4] 'उख उखि...रगि लगि अगि वगि...गत्यर्थाः' [धा० १।१२५-१५२]।

[5] 'नेड्वशि कृति' [पा० ७।२।८] इतीट्-प्रतिषेधः। [6] इदितो नुम् धातोः [पा० ७।१।५८]।

प्रातिपदिकम्। 'अनुदात्तौ सुप्पितौ' [३।१।४] इत्यमित्येतद्द्वितीयैकवचनमनुदात्तम्। तस्य 'अमि पूर्वः' [६।१।१०७] इति यत् पूर्वरूपं तदुदात्तम्, 'एकादेश उदात्तेनोदात्तः' [८।२।५] इति सूत्रितत्वात्। अग्निशब्दो धातुजन्मेति मते सेयं प्रक्रिया सर्वापि द्रष्टव्या।

मतद्वयं यास्केन प्रदर्शितम्। 'नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च। न सर्वाणीति गार्ग्यो वैयाकरणानां चैके।' [नि० १।१२] इति। गार्ग्यस्य मतेऽग्निशब्दस्याखण्डप्रातिपदिकत्वात् 'फिषोऽन्त उदात्तः' [फि० सू० १।१] इत्यन्तोदात्तत्वम्। पूर्वोक्तेष्वग्रणीरित्यादिनिर्वचनेषु प्रकृतिप्रत्ययाद्यशेषप्रक्रिया यथोचितं कल्पनीया। एतदेवाभिप्रेत्य यास्क आह। 'अथ निर्वचनम्। तद् येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयात्। अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येन। अविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात्, न त्वेव न निर्ब्रूयात्।' [नि० २।१] इति। अस्यायमर्थः—तत् तत्र निर्वचनीयपदसमूहमध्ये येष्वग्न्यादिपदेषु पूर्वोक्तरीत्या स्वरसंस्कारौ समर्थौ व्याकरणसिद्धौ स्याताम्। स्वर उदात्तादिः। संस्कारो नि-प्रत्ययादिः। किञ्च तौ स्वरसंस्कारौ प्रादेशिकेन गुणेनान्वितौ स्याताम्। शब्दस्यैकदेशः पूर्वोक्तोऽगिधातुः प्रदेशः। तत्र भवो गुणो गतिरूपोऽर्थः। तेनान्वितौ। तान्यग्न्यादिपदानि तथा व्याकरणानुसारेण निर्ब्रूयात्। तच्च निर्वचनमस्माभिः प्रदर्शितम्। अथ पूर्वोक्तवैलक्षण्येन कश्चित् स्वेन विवक्षितोऽर्थो नान्वितस्तस्मिञ्छब्देऽनुगतो न भवेत्, तस्यैव व्याख्यानम्—अप्रादेशिके विकार इति। अग्रनयनादिरूपः क्रियाविशेषो विकारः। स च प्रदेशेनाग्निशब्दैकदेशेनाख नाभिधीयत इत्यप्रादेशिकः। एवं सति यः पुमान् अर्थनित्यः स्वविवक्षितेऽर्थे नियतो निर्बन्धवान्। ब्राह्मणानुसारेण वा देवतान्तरविशेषणत्वेन योजयितुं वा स निर्बन्धः। तदानीं स पुमान् केनचिद्वृत्तिसामान्येन स्वविवक्षितमर्थं परीक्षेत तस्मिञ्छब्दे योजयेत्। वृत्तिः क्रिया, तद्रूपेण सामान्यं सादृश्यम्। अस्माभिश्चाग्रनयनादिरूपं क्रियात्वसामान्यमुपजीव्याग्रणीत्वाद्यर्थो योजितः। तदिदं यास्काभिमतं निर्वचनम्।

स्थौलाष्ठीविरक्षरसाम्यान्निर्वक्ति। अक्नोपनशब्दस्यादौ *निषेधार्थमकाररूपमक्षरं विद्यते। अग्निशब्दस्याप्यादावकारोऽस्ति। तदिदमक्षरसाम्यम्। शाकपूणिस्तु वर्णसाम्यान्निर्ब्रूते। दग्धशब्दाग्निशब्दयोर्गकाररूपवर्णेन† साम्यम्। सर्वथापि निर्वचनं न त्याज्यमिति।

ईळे इत्येतत् पदं कृत्स्नमप्यनुदात्तम्, 'तिङ्ङतिङः' [८।१।२८] इत्यतिङन्तादग्निशब्दात् परस्य 'ईळे' इत्यस्य तिङन्तस्य निघातविधानात्। पद-द्वयसंहिताकाले त्वीकारस्य धातुगतस्य 'उदात्तादनुदात्तस्य स्वरितः' [८।४।६६] इति स्वरितत्वम्। तस्मादूर्ध्वभाविन एकारस्य तिङ्प्रत्ययरूपस्य 'स्वरितात् संहितायामनुदात्तानाम्' [१।२।३९] इत्यैकश्रुत्यं प्रचयनामकं भवति। पुरः-शब्दोऽन्तोदात्तः, 'अयं पुरो भुवः'‡ [तै० सं० ४।३।२।१] इत्यत्र तथैवाम्नातत्वात्। 'पूर्वाधरावराणामसि पुरधवश्चैषाम्' [५।३।३९] इति पूर्वशब्दादसिप्रत्ययः पुरादेशश्च। ततोऽत्र प्रत्ययस्वरः।[1] धाञो निष्ठायां 'दधातेर्हिः' [७।४।४२] इत्यादेशे सति प्रत्ययस्वरेणान्तोदात्तो हितशब्दः। तत्र समासान्तोदात्तत्वे प्राप्ते तदपवादत्वेन 'तत्पुरुषे तुल्यार्थ॰' [६।२।२] इत्यादिनाव्ययपूर्वपदप्रकृतिस्वरत्वम्। यद्वा 'पुरोऽव्ययम्' [१।४।६७] इति गतिसंज्ञायां 'गतिरनन्तरः' [६।२।४९] इति पूर्वपदप्रकृतिस्वरत्वम्। तत ओकार उदात्तः। अवशिष्टानामनुदात्तस्वरितप्रचयाः पूर्व-

---

* S. probably wrote निषेधार्थकम्.

† गकारवर्णेन M. P.

‡ In the printed editions no accent marks are shown. But since this is quoted to establish the correct accent of पुरः, accent marks are absolutely essential here as in the case of रत्न धात later on. In the printed TS. व is marked with the sign of the अनुदात्त because of the following उदात्त.

[1] S. discards the first explanation in his subsequent writings. See S. under. i. 44. 10, i. 55. 3, i. 94. 6, AV. iii. 19. 1, etc.

वद्दृष्ट्याः। आद्याक्षरस्य संहितायां प्रचयस्वरप्राप्तौ' उदात्तस्वरितपरस्य सन्नतरः' [१।२।४०] इत्यतिनीचोऽनुदात्तः।*

'यजयाच°' [३।३।९०] इत्यादिना यजतेर्नङ्प्रत्यये सत्यन्तोदात्तो यज्ञशब्दः। विभक्तेः सुप्स्वरेणानुदात्तत्वे सति पश्चात् स्वरितत्वम्। देव-शब्दः पचाद्यजन्तः। स च फिट्स्वरेण[1] प्रत्ययस्वरेण[2] चित्स्वरेण[3] वान्तोदात्तः। ऋत्विक्-शब्द ऋतौ यजतीति विग्रहे सति 'ऋत्विग्दधृक्°' [३।२।५९] इति निपातितः। 'गतिकारकोपपदात् कृत्' [पा० ६।२।१३९] इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। विभक्तिस्वरः पूर्ववत्। होतृ-शब्दस्तृन्प्रत्ययान्तः, नित्स्वरेणाद्युदात्तः[4]। स्वरितप्रचयौ पूर्ववत्। रत्नशब्दो 'नब्विषयस्यानिसन्तस्य' [फि० २।३] इत्याद्युदात्तः। तथा चाम्नायते 'रत्नं धात' † [ऋ० सं० ४।३५।८] इति। रत्नानि दधातीति विग्रहः। समासत्वादन्तोदात्तो रत्नधा-शब्दः। यद्वा कृदुत्तरपदप्रकृतिस्वरः। तमप्-प्रत्ययस्य

* Some MSS. add यद्यपि पदकाले हितशब्दान्तर्गतस्यैकारस्य स्वरितत्वं दुर्लभमुदात्तपरत्वाभावात्, मात्रा क्रमस्तावदवग्रहान्तरम् [ऋ० प्रा० १।२७-२८] इति प्रातिशाख्येऽवसानविधानात्। अत एव तैत्तिरीया अनुदात्तमेवाधीयते, तथापि

यथा सन्धायमानानामनेकीभवतां स्वरः।
उपदिष्टस्तथा विद्यादक्षराणामवग्रहे ॥

[ऋ० प्रा० ३।२४] इति प्रातिशाख्येऽतिदेशादिष्टसिद्धिः। This would appear to be a later addition from the commentary of Bhaṭṭoji.

[1] फिषोऽन्त उदात्तः [फि० १।१]।

[2] प्रत्ययः। परश्च। आद्युदात्तश्च [पा० ३।१।१-३]।

[3] चितः [पा० ६।१।१६३]।

[4] ञ्नित्यादिर्नित्यम् [पा० ६।१।१९७]।

† M. reads रत्नं धातेति without any accent mark and without any reference. M's followers have tried to improve upon this reading and printed 'रत्नं धाता' इति. Similarly, under i. 157. 2 M. M. prints मधुवाहनो रथ इत्यादिषु and is unable to trace the quotation. His followers go a step further and print 'मधुवाहनो रथः' इत्यादिषु, of course without any reference. The correct reading is 'मधुवाहने रथे' and the expression occurs in RV. i. 34. 2.

पित्स्वरेणानुदात्तत्वे सति स्वरितप्रचितौ। संहितायामाद्याक्षरस्य प्रचयो द्वितीयाक्षरस्य सन्नतरत्वमिति।

वेदार्थवतार आद्याया ऋचोऽर्थश्च प्रपञ्चितः।
विज्ञातं वेदगाम्भीर्यमथ संक्षिप्य वक्ष्यते ॥१॥

अग्निम्—Av. *Ātrem* is a different word altogether. Skt. *agniḥ*, Lat. *igni-s*, Slavonic *ogni*, O. Lithuanian *ungni-s*.

ईळे—ड between two vowels is changed into ळ in RV. In ईळे, ड comes between the vowels ई and ए, so it is changed, but in ईड्यः it stands between the vowel ई and the semi-vowel य and therefore remains unchanged. When, however, we resolve the semi-vowel य् followed by the vowel अ into इ and अ for the sake of the metre, we must read ईळिअ.

Scholars, both Indian and European, have expressed widely divergent views regarding the exact meaning of the root. Yāska explains अग्निमीळे as अग्निं याचामि and says: ईळिरध्येषणाकर्मा पूजाकर्मा वा. Durga explains it thus: ईळिधातुः 'अध्येषणाकर्मा' याच्ञाकर्मा इह, अन्यत्र 'पूजाकर्मा' 'वा' अपि. In the Dhātupāṭha [ii.9] the root is read as ईड स्तुतौ. The *Mahābhāṣya* [i.3.1, vi. 1. 94] says: ईडिः स्तुतिचोदनायाच्ञासु दृष्टः, प्रेरणे चापि वर्तते, *i.e.*, ईड् is found in the senses of praise, prompting and praying (for something), it is also used in the sense of 'sending'. Geldner points out that in iv. 24.2, v. 69.3 etc. ईड् is synonymous with हु. In many passages ईड is followed by हु and in others हु by ईड्. So Geldner thinks ईड् means 'to invoke'. Bloomfield, on the other hand, holds that ईड् is synonymous with इ. Passages like यं वाघतो वृणते अध्वरेषु i. 58. 7 and यं विप्रास ईळते अध्वरेषु x. 30. 4 are quoted by him in support of his contention. Acc. to him ईड् is from इष्ट् (इष् to wish) even as पीड is from पिष्ट्. *Cf*. Goth. *aistan*, *-aida*, to be shy, timid, to honour; Gk. *aidomai* (for **aiz-domai*) to be ashamed, to stand in awe of, to respect another's misfortune, to feel regard for him.

The root ईड् occurs but rarely in classical Sanskrit, one well-known instance being स्थिरं यदरं ब्रह्म मीमांसामीडे.

पुरोहितम् (from पुरस् and हित < *धित)—the domestic priest. ऋत्विज्—the officiating priest at a sacrifice. There were originally seven *ritviks**: होतृ, पोतृ, नेष्टृ, अग्नीध्, प्रशास्तृ (=मैत्रावरुण), अध्वर्यु, ब्रह्मन्. The number later rose to 16: (i) होता, मैत्रावरुणः, अच्छावाकः, ग्रावस्तुत्; (ii) अध्वर्युः, प्रतिप्रस्थाता, नेष्टा, उन्नेता; (iii) ब्रह्मा, ब्राह्मणाच्छंसी, आग्नीध्रः, पोता; (iv) उद्गाता, प्रस्तोता, प्रतिहर्ता, सुब्रह्मण्यः.

पुरः is derived by Indian grammarians from पूर्व with अस्. European scholars point out that both पूर्व and पुरः, पुरा, etc. are derived from the root पॄ or पृ. Av. *purō*, Gk. *páros*, Goth. *faúra*, O.E. *fore*.

धित is found in such compounds as सुधित, दुर्धित, मित्रधित, युवधित, etc. (*cf*. Pāṇini vii.4.45). In Av. and O. Persian we find *dāta* with the full grade. In Lat. *con-ditus*, *ab-ditus*, *crēditus*, etc. *ditus* corresponds to Skt. धित. *Cf*. Gk. *thetós*. In the case of the root रुध्, which became later रुह्, we have a similar breaking down of ध् to ह्, though the original ध is preserved in forms like न्यग्रोध, वीरुध्, etc. Similarly, the imper. 2. sing. ending धि (Gk. *thi*, Av. *δi*) became हि in later Skt., though it is preserved in forms like जुहुधि, पधि, शाधि, etc.

Both पुरोहित and पुरः धा are used in A.B. xl.1: न ह वा अपुरोहितस्य राज्ञो देवा अन्नमदन्ति, तस्माद् राजा यक्ष्यमाणो ब्राह्मणं पुरो दधीत.

यज्ञस्य—is to be construed with ऋत्विजम् and not with पुरोहितम, as the genitive generally precedes the word governing it and as both यज्ञस्य and ऋत्विजम् belong to the same pāda. In viii. 38. 1 Indra and Agni are called the *ritviks* of the Yajña: यज्ञस्य हि स्थ ऋत्विजा. यज्ञ, Av. *yasna*, Gk. *hagnós*; यज्ञस्य Gāθ. *yasnahyā*, Y.AV. *yasnahe*.

देवम्—qualifies ऋत्विजम (the divine priest) or is in apposition with अग्निम् (God, the priest). In view of v. 22. 2 and v. 26. 7 where we find दधाता देवमृत्विजम् the explanations of Mādhava (यज्ञस्य स्वामिनम्)

---

* *Cf*. RV. ii. 1. 2:

तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः।

तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे॥

and Skandasvāmin (यज्ञस्य दातारं दीपयितारं वा। यज्ञं हि देवेभ्यो मनुष्येभ्यश्चापिदंदाति तदायत्तत्वात्. दीपयति च) can hardly be accepted.

Indian commentators are generally agreed in deriving देव from दिव् 'to shine'. The derivation, however, presents two difficulties. In the first place the suffix ought to be क acc. to इगुपधज्ञाप्रीकिरः कः iii. 1. 135.[1] In the second place the feminine will be formed with आ instead of ई. The first difficulty is got over by adding the suffix अच acc. to नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः iii. 1. 134 and the second by reading देवट् in the पचादि list with ट् as the indicatory letter. As is well-known पचाद्यच् can supersede any previous or subsequent rule and when a प्रातिपदिक or प्रत्यय has ट् as an indicatory letter the feminine is formed with unaccented ई acc. to टिड्ढाणञ्° iv. 1. 15.

European commentators, generally, derive देव from दिव् heaven. The word originally meant celestial (or the son of heaven) and then it came to mean God. Even though the secondary suffix अ has been added there is no वृद्धि as in the case of भेषज adj. 'healing', noun 'medicine', from भिषज् physician. We may explain this view-point thus in Sanskrit: स्वर्गवाचकाद 'दिव'शब्दात् 'तस्येदम्' [४।३।१२०] इति वा 'तस्यापत्यम्' [४।१।९२] इति वा अण्। 'देवब्रह्मणोरनुदात्तः' [१।२।३८] इत्यादिनिर्देशाद गुणः। प्रत्ययस्वरेणान्तोदात्तत्वम्।

The root दिव् is merely an extended form of दी to shine, so it is difficult to see how the existence of such a root can be repudiated. The Latin words *divine*, *Diana*, and the Greek words *Di(w)os* and *Zeus* are all connected with this root. See BLOOMFIELD, *The Religion of the Veda*, pp. 108-109.

देव appears as *daēva* in Av. but means (gods of the pre-Zoroastrian period, *i.e.*) 'demon'. Similarly *ahura* corresponding to Sanskrit असुर (which originally meant the highest divinity but later came to signify) 'demon' means God in Av. Skt. *devá-m*, Av. *daēvəm*, Lat. *deu-m*.

[1] With क the form will be दिव and not देव.

ऋत्विजम्—The formation is explained by RV. x. 2. 5 यजिष्ठो देवाँ ऋतुशो यजाति, AB. xxii. 4 ऋत्विज ऋतुयाजान् यजन्ति, etc. Skt. *ṛtúḥ*, Av. *ratu*, Gk. *artú-s*, Lat. *artu-s*. Skt. *yajate*, Av. *yazaite*, Gk. *házomai* (for **hágio-mai*) 'I revere'.

होतारम्—In the 1st pāda Agni is called पुरोहित, the domestic priest, in the 2nd pāda, he is called the priest of the sacrifice and in the third pāda the seer mentions the particular sacrificial priest, *viz.*, Hotṛ. "When the Purohita, who was the spiritual adviser of the king in all his religious duties, actually took part in one of the great sacrifices...he was normally the Hotṛ."

There is a difference of opinion among scholars, both Indian and foreign, regarding the derivation of the word होतृ. Aurṇavābha, a very ancient writer, derives it from हु 'to sacrifice', while Yāska and his followers think that the word comes from ह्वे or हू 'to invoke'. In the *Aitareya Brāhmaṇa* होतृ is derived from आ-वह्*. The function of the होतृ is no doubt to invoke the gods and this is emphasised in the Brāhmaṇa derivation. The word, however, corresponds exactly with Av. *zaotar* and is to be derived from हु (from which, by the way, the English word God is also derived). Thus Macdonell and Keith write in the *Vedic Index*: "होतृ is the name of one of the oldest and most important priests of the Vedic ritual, the counterpart of

* यदन्यो जुहोति, अथ योऽनु चाह यजति च, कस्मात् तं होतेत्याचक्षत इति ? यद्वाव स तत्र यथाभाजनं देवता अमुमावहामुमावहेत्यावाहयति तदेव होतुर्होतृत्वम्। i. 2.

"They say, 'Since another pours the libation, then why do they style Hotṛ him who recites (the invitatory verses) and says the offering verses?' In that he here according to their portion invites the deities. (saying) 'Bring hither N.N., bring hither N.N.', that is why the Hotṛ has the name." (Keith).

S. explains the formation thus:

ण्यन्तस्य वहधातोश्छान्दस्या प्रक्रियया होतृशब्दनिष्पत्तिर्न तु जुहोतिधातोः। तस्माद्धोमकर्तृत्वाभावेऽप्यावाहयितृत्वसद्भावाद्धोतृत्वमुपपन्नम्।

the Zaotar of the Avestan priesthood. The word must be derived from हु 'sacrifice' as was held by Aurṇavābha; this indicates a time when the होतृ was at once sacrificer (the later Adhvaryu) and singer. But the functions were already clearly divided in the Rigveda, where the Hotṛ's chief duty was the recitation of the Śastras. He was also in the older period often the Purohita of the king, an office later filled by the ब्रह्मन् priest."

Macdonell appears to have changed his opinion later, as in the *Vedic Reader* he derives होतृ from ह्वे 'to call'.

Lanman points out that the sense of 'invoker,' naturally suggested by his function in the ritual, was popularly associated with the original sense of 'offerer' and the word thus came to be connected with ह्वे to 'invoke'.

रत्नधातमम्—Masculine words ending in आ like रत्नधा, सोमपा, etc., became practically obsolete in classical Sanskrit, though grammarians mention विश्वपा, शङ्खध्मा, etc. The comparative and superlative suffixes also are much more frequent in Vedic than in classical Sanskrit. For रत्नधातमम् we should probably say नितरां रत्नदम् in classical Skt.

In vii. 16. 6 Agni is invoked thus: अधि रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि. In v. 1.5 Agni is described thus: दमेदमे सप्त रत्ना दधानोऽग्निर्होता निषसादा यजीयान्. In VS. xxvii. 15 Agni is described as वसुधातम. Sometimes रत्न occurs along with द्रविण, as दधासि रत्नं द्रविणं च दाशुषे i. 94. 14, किं नो अस्य द्रविणं कद्ध रत्नम् iv. 5. 12; sometimes with वसु, as, वसु रत्ना दयमानो वि दाशुषे iii. 2. 11. So रत्न must mean jewel, gems, riches, treasure. Geldner says: "ratna 'Kleinod' (gem), especially in its older sense, *viz.*, the prize of victory, reward. The word is often used for the reward which the sacrificer or singer expects." The derivation is uncertain. Some derive it from रा to give, some from रम् to rejoice, while some modern philologists postulate a root **rent* for this word.

The suffixes तर and तम are generally separated by अवग्रह in the pada text, *e.g.*, चित्रश्रवःऽतमः (i. 1. 3) etc.

In the case of words ending in दातर दातम धातम पातम गोपातम भूतर भूतम and हतम, however, it is these words that are separated and not तर and तम. This appears to be due to analogy. We shall see that भ्याम् भिस् भ्यस् and सुप् are not separated after long vowels. So रत्नधाभिः is analysed रत्नऽधाभिः and after रत्नऽधाभिः we have रत्नऽधातमम्, etc. Thus we have वरिवःऽधातमः ix. 1. 3 but वरिवोवित्ऽतरस्य viii. 48. 1. Sk. *dhātamam*, Av. *dātaməm*.

2

अग्निः पूर्वेभिरृषिभि-
रीड्यो नूतनैरुत ।
स देवाँ एह वक्षति ॥२॥

अग्निः । पूर्वेभिः । ऋषिऽभिः ।
ईड्यः । नूतनैः । उत ।
सः । देवान् । आ । इह । वक्षति ॥२॥

Agni (*Agniḥ*) is worthy of being praised (*ī'ḍyaḥ*) by ancient (*pū'rvebhiḥ*) sages (*ṛ'ṣibhiḥ*) and (*utá*) by modern ones (*nū'tanaiḥ*), may he (*sáḥ*) bring (*ā'vakṣati*) hither (*ihá*) the gods (*devā'n*).

[अयम् अग्निः पूर्वेभिः पुरातनै[1]र्भृग्वङ्गिरः-प्रभृतिभिः ऋषिभिः ईड्यः स्तुत्यो नूतनैः उत इदानीन्तनैरस्माभिरपि स्तुत्यः। सः अग्निः स्तुतः सन् इह यज्ञे देवान् हविर्भुज आ वक्षति। 'वह प्रापणे' [धा० ११८५] इति धातुः। आवहत्वित्यर्थः। पूर्वेभिरित्यत्र 'बहुलं छन्दसि' [७।१।१०] इति भिस ऐसादेशाभावः। 'पुर्व* पर्व मर्व पूरणे' [धा० १५६८-७०] इति धातुः। पूर्वति-

---

[1] In the words of RV. पुराणैः.

* पूर्व पर्व मर्व पूरणे—M. P.; under i. 19. 7 M. P. read पूर्व पर्व मर्व पूरणे. Some Dhātupāṭhas read पूर्व with long ऊ, but पुर्व is the correct form of the root. The *Manoramā* on Durga's Dhātupāṭha says: ऊष्मध्यवर्गीयवकारोऽयम्।···दन्त्योष्ठ्योऽयमिति मैत्रेयः।

धातोरन्-प्रत्यय औणादिकः। इन्प्रत्ययान्त ऋषि-शब्दः। 'ऋष्यन्धक°' [४।१।११४] इति निपातनाल्लघूपधगुणाभावः। कित्प्रत्ययो वात्र ज्ञेयः [उ० ४।११९]। तौ शब्दौ नित्स्वरेणाद्युदात्तौ। ईड्यशब्दस्य ण्यत्-प्रत्ययान्तत्वात् "तित् स्वरितम्"* [६।१।१८५] इति स्वरिते शेषानुदात्तत्वे च प्राप्ते तदपवादत्वेन "ईडवन्द°" [६।१।२१४] इत्यादिनाद्युदात्तत्वम्। 'नवस्य नू त्नप्तनन्खाश्च' [५।४।३०।६] इति वार्त्तिकेन† नवशब्दस्य नू इत्यादेशस्तनन्प्रत्ययश्च महावार्त्तिके विहितः। ततो नित्स्वरेणाद्युदात्तः। अवशिष्ट-स्वरा अग्न्यादिषु नूतनान्तेषु पूर्ववदुन्नेयाः। उत-शब्दो यद्यपि विकल्पार्थे प्रसिद्ध-

* The rule is sometimes quoted as तित् स्वरितम् and sometimes as तित् स्वरित:. The latter would appear to be the correct form, but it is difficult to say anything for certain. *Cf.* अनुदात्तौ सुप्पितौ iii. 1. 4 and अनुदात्तं प्रश्नान्ताभिपूजितयो: viii. 2. 100.

† M. M. notes that the portion नवस्य नू त्नप्तनन्खाश्च इति वार्त्तिकेन is added in the margin in several of the MSS. collated *by him.* This shows that it was originally a reader's note which subsequently became a part of the text. S. derives नूतन also under iii. 32. 13 (नवशब्दस्य त्नप्तनन्खाश्च प्रत्यया वक्तव्या नू इत्यादेशश्च) and under iii. 47. 5 (नवशब्दस्य नू इत्यादेश: त्नप्तन[न्]खाश्च प्रत्यया वक्तव्या इति तन[न्]प्रत्यय:) where the printed editions drop the न् after न in two places as is also done in Keilhorn's edition of the *Mahābhāṣya* where we read नवस्य नू त्नप्तनखाश्च। नवस्य नू इत्ययमादेशो वक्तव्य:। त्नप्तनखाश्च प्रत्यया वक्तव्या:. In all these cases the scribes have carelessly written one न for two (*cf.* Haplology in language). Curiously enough in the printed *Kāśikā* (Lazarus, 1898) we find under v. 4. 25: नवस्य नू आदेशस्त्नप्खाश्च प्रत्यया:, where the correct reading would appear to be °स्त्नप्तनप्खाश्च प्रत्यया:. Unfortunately neither the *Nyāsa* nor the *Padamañjarī* comments on this portion. I should prefer महावृत्तौ (meaning काशिकावृत्तौ) to महावार्त्तिके here. If महावार्त्तिके be the correct reading then S. evidently means not the short sūtra-like vārttika but the vārttika as explained by the Mahābhāṣyakāra. See *Mañjūṣā*, October 1954.

स्तथापि निपातत्वेनानेकार्थत्वादौचित्येनात्र समुच्चयार्थो द्रष्टव्यः। 'उच्चावचेष्वर्थेषु निपतन्ति' [नि० १।४] इति निपातत्वम्। तर्हि 'निपाता आद्युदात्ताः' [फि० ४।१२] इत्युकारस्योदात्तः प्राप्त इति चेत्, न, प्रातः-शब्दवदन्तोदात्तत्वात्।[1] यथा प्रातः-शब्दोऽन्तोदात्तत्वेन स्वरादिषु [१।१।३७] पठित एवमुत शब्दस्यापि पाठो द्रष्टव्यः, स्वरादेराकृतिगणत्वात्। यद्वा 'एवादीनामन्तः'[2] [फि० ४।१४] इत्यन्तोदात्तः। स इत्यत्र फिट्स्वरः। देव-शब्दः पूर्ववत्। देवानित्यस्य नकारस्य संहितायां 'दीर्घादटि°' [८।३।९] इति रुत्वम्। 'अत्रानुनासिकः°' [८।३।२] इत्यनुवृत्तौ 'आतोऽटि नित्यम्' [८।३।३] इत्याकारः सानुनासिकः। 'भो भगो°' [८।३।१७] इति रोर्यकारः। स च 'लोपः शाकल्यस्य' [८।३।१९] इति लुप्यते। तस्यासिद्धत्वात्[3] न पुनः सन्धिकार्यम्। आङो निपातत्वादाद्युदात्तत्वम्। इदमो ह-प्रत्यये[4] सति निष्पन्नत्वात् इहशब्दे प्रत्यय-स्वरः। वहति धातोर्लोडर्थे छान्दसो लृट्। तस्य स्य-प्रत्यय[5]गतस्य यकारस्य लोपोऽपि छान्दसः[6]। यद्वा लेटि 'सिब्बहुलम्°' [३।१।३४] इति सिप्प्रत्ययः। 'लेटोऽडाटौ' [३।४।९४] इत्यडागमश्च। ततो वक्षतीति सम्पद्यते। तस्य तिङन्तत्वान्निघातः। संहितास्वराः पूर्ववत् ॥२॥

---

1 On स्वरादिनिपातमव्ययम् i. 1. 37, the *Kāśikā* says: स्वरादीनि शब्दरूपाणि निपाताश्चाव्ययसञ्ज्ञानि भवन्ति। स्वर् अन्तर् प्रातर् एते अन्तोदात्ता पठ्यन्ते। etc.

2 In general the readings of the फिटसूत्र's accepted by the author of the फिटसूत्रवृत्ति are more reliable than those in the *Siddhānta Kaumudī* and other works. The फिट्सूत्रवृत्ति reads एवमादीनामन्त: but in this particular instance एवादीनामन्त: seems preferable. S. appears to vacillate between एवादीनाम and एवमादीनाम्.

3 पूर्वत्रासिद्धम् [पा० ८।२।१]। 4 इदमो हः [पा० ५।३।११]।

5 स्य, सिप, etc., are known as विकरण's. But like क्यच, काम्यच्, etc., they are regarded as प्रत्यय's, as they are read in the प्रत्यय section of the *Aṣṭādhyāyī*. Hence the *Kāśikā* says: धातोर्यथासम्भवं स्यतासी प्रत्ययौ भवत: [iii. 1. 83], धातो: सिपप्रत्ययो भवति बहुलं लेटि परतः [iii. 1. 34], etc.

6 In his subsequent writings Sāyaṇa discards this absurd explanation.

पूर्वेभिः—In the Vedas the Instr. pl. of a-stems is formed both with *-ebhis* and with *-ais*. Thus in the second pāda we have नूतनैः. Sometimes we find *-ebhis* and *-ais* side by side, as in इन्द्रं नमस्यन्नुपमेभिरर्कैः i. 33. 2. In RV. *-ebhis* is used especially with adjectives, and the pronouns यद्, तद्, त्यद्, etc., admit only this ending. Pāṇini framed the rule अतो भिस ऐस् and then made the important reservation बहुलं छन्दसि. The Instr. pl. in *-ebhis* is found in Pali and Prakrit but is conspicuous by its absence in classical Sanskrit, except in एभिः the Instr. pl. of the stem अ (इदम्), where the only monosyllabic ऐस् among forms consisting of more than one syllable sounds discordant. This is the only ending in O. Pers. (*-aibiš*). In the Avesta the normal ending is *-aiš* and the word *aēibiš* (Skt. एभिः from इदम्) is exceptional as in Skt.

The poets often speak of the ancient and modern seers. Sometimes they add a third category—the middlemost; *cf.* vii. 22. 9:

ये च 'पूर्व' ऋषयो ये च 'नूत्ना' इन्द्र ब्रह्माणि जनयन्त विप्राः ।
अस्मे ते सन्तु सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः ॥

"Those old seers and those that are modern, O Indra, who have produced hymns, (as to them, so) to us be thine auspicious friendship; ye gods, preserve us evermore with blessings."

इदा हि ते वेविषतः पुराजाः 'प्रत्नास' आसुः पुरुकृत् सखायः ।
ये 'मध्यमास' उत 'नूतनास' उतावमस्य पुरुहूत बोधि ॥ vi. 21. 5.

"Yea, here were they who, born of old, have served thee, thy friends of ancient time, thou active worker. Bethink thee now of these, invoked of many! the midmost and the recent, and the youngest."

यः स्तोमेभिर्वावृधे पूर्व्येभिर्यो मध्यमेभिरुत नूतनेभिः ॥ iii. 32. 13.

स्तोमेभिः स्तुतिभिः । वावृधे वर्धितः ।

Similarly, "the later Avesta notes the antiquity of the older" (Mills, S.B.E., xxxi, p. 293, f. n. 4): *Staota Yesnya yazamaide, yā dātā aṅhə̄uš paoruyehyā*—We adore the Staota Yesnya (hymns), which (are) the laws (revealed) by the ancient Rulers (TARAPOREWALA, *Selections from the Avesta*, pp. 206,207,213).

ऋषिभिः—ऋषि from ऋष् 'to flow' means one overflowing with inspiration, hence seer. ऋषयो मन्त्रद्रष्टारः. In the Pada text भिः is separated by an अवग्रह, because before भ्याम्, भिस्, भ्यस्, and सुप् words are technically regarded as पद's. Pāṇini's rule on the point is: स्वादिष्वसर्वनामस्थाने, यचि भम् i. 4. 17-18. These endings are, however, never separated after long vowels, hence पूर्वेभिः is not analysed. Since in the case of नूतनैः the ending is not भिस् but ऐस्, the word is not analysed.

ईड्यः—ईळ्यः is used in the same sense. In RV. gerundives are formed with *ya*, *āyya*, *én-ya*[1] and *tva*. Of these *ya* is the most common. *tavyá* and *anīya*, so common in the later language, make their appearance in AV. for the first time. With ईड्यः *cf.* Gk. *aidoios* 'having a claim to regard, reverence, compassion'.

नूतनैः—"With the suffix *-tana* and its syncopated form *-tna* are made, from adverbs or prepositions, a very few adjectives with a temporal sense: *nū́-tana* and *nū́-tna* 'present' (*nū* now), *sanā-tána-*(AV.) and *saná-tna-*(AV.) 'eternal' (*sanā* 'from of old'), *pra-tná-* 'ancient' (*prá* 'before')." [MACDONELL, *Vedic Grammar*, p. 138.] The antonym of नूतन is पुराण and not पुरातन which is not sanctioned by older grammarians. नूनम् 'now' is also derived from this नू (Av. *nū*, Gk. *nu*, Lat. *num*, Goth. *nu*).

उत—(Av. *uta*, O. P. *utā*, 'and', *cf.* Gk. *ēúte* 'as', 'like as', from *ē* and *úte* उत), means 'and' in the Vedas. In classical Skt. it means 'or'. From meaning 'and' it came to mean 'on the one hand......on the other hand' and then 'or'. Thus प्रत्युत in class. Skt. means 'on the contrary'.

---

[1] कृत्यार्थे तवै-केन्-केन्य-त्वनः, iii. 4. 14. See also *Uṇādi*, iii. 96 ff.

देवाँ एह—The Acc. pl. ending was originally *-ns* as we find in sentences like भृत्यांस्ताडयति, जडांश्चलयति, etc. As Skt. does not tolerate a final conjunct the *s* was dropped and the previous vowel if short was lengthened by way of compensation. But the conjunct can be avoided in another way also, *viz.*, by nasalising the *n* and retaining the *s*. Thus *देवान्स् आ इह> देवाँस् आ इह>देवाँः आ इह>देवाँ एह। Similarly in the case of हरीँरिव, the process is as follows: *हरिन्स् इव > हरीँस् इव > हरीँः इव>हरीँरिव. *Cf.* पिबा सोममृतूँरनु i. 15. 5, drink Soma after the Ṛtus. यतः पूर्वाँ इव सखीँरनु ह्वय v. 53. 16 "so call thou unto them who come as ancient friends"; येना स्वर्ण ततनाम नॄँरभि v. 54. 15 "wherewith we may spread forth mid men like as the Sun." Thus final न्, preceded by आ, becomes ँ in RV. when followed by vowels within the pāda; preceded by ई, ऊ or ऋ, it becomes ईँः, ऊँः and ऋँः in the same circumstances.

वक्षति—3 sg. s-aor. subj. of वह् 'to carry.' *vah + s* (the sign of the aorist) + *a* (the sign of the subjunctive + *ti* (primary ending)> *vakṣati*. With secondary ending the form will be वक्षत्. In the present system there will be two forms—वहाति and वहात्.

3

अग्निना रयिमश्नवत्	अग्निना । रयिम् । अश्नवत् ।
पोषमेव दिवेदिवे ।	पोषम् । एव । दिवेऽदिवे ।
यशसं वीरवत्तमम् ॥३॥	यशसम् । वीरवत्ऽतमम् ॥३॥

Through Agni (*Agninā*) may one win (*aśnavat*) day by day (*divédive*) wealth (*rayím*) and prosperity (*póṣam evá*), glorious (*yaśásam*) and most rich in heroes (*vīrávattamam*).

आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या[1] । [सूचितं च—'पुष्टिमन्तावग्निना रयिमश्नवद्, गयस्फानो अमीवहा' इति। आ० श्रौ० २।१।२७]* । सूक्तगता तृतीया ।

योऽयं होता स्तुत्योऽग्निस्तेन अग्निना निमित्तभूतेन यजमानो रयिं धनम् अश्नवत् प्राप्नोति[2] । कीदृशं रयिम्? दिवे दिवे पोषमेव प्रतिदिनं पुष्यमाणतया वर्धमानमेव, न तु कदाचिदपि क्षीयमाणम्। यशसम् दानादिना यशोयुक्तम्। वीरवत्तमम् अतिशयेन पुत्रभृत्यादिवीरपुरुषोपेतम्। सति हि धने पुरुषाः सम्पद्यन्ते ॥ रयि-शब्दो मघमित्यादि-धननामसु पठितः [निघ० २।१०]। तत्र फिट्स्वरः। अश्नोतेर्धातोर्लेटि व्यत्ययेन तिप्। 'इतश्च लोपः°' [३।४।९७] इतीकारलोपः। 'लेटोऽडाटौ' [३।४।९४] इत्यडागमः। ततोऽश्नवदिति भवति। तस्य निघातः। घञन्तत्वात् पोष-शब्द आद्युदात्तः। एव-शब्दस्य निपातत्वेऽपि 'एवादीनामन्तः' [फि° ४।१४] इत्यन्तोदात्तत्वम्। वकारान्ताद्दिव्-शब्दात् परस्याः सप्तम्याः 'सुपां सुलुक्°' [७।१।३९] इत्यादिना शे-भावे[3]

---

[1] आधानमनुपदमेवोक्तम्। तत्र यान्तिमेष्टिस्तस्यामाज्यभागद्वितयमनुष्ठेयम्। तत्र प्रथम आज्यभागोऽग्निदेवताको भवति, उत्तरश्च सोमदेवताकः। तत्र प्रथमस्याज्यभागस्य 'अग्निना रयिमश्नवत्' इत्येषा ऋगनुवाक्या, उत्तरस्य च 'गयस्फानो अमीवहा' [ऋ० सं० १।९१।१२] इत्येषा।

* As Sāyaṇa quotes from Āśvalāyana where possible, he must have written the portion within square brackets which appears to have dropped out subsequently through the carelessness of scribes.

[2] Indian commentators are unanimous in taking अश्नवत् here in the sense of the present indicative. Under i. 40. 6-7, 93. 3, 113. 18, etc., however, अश्नवत् is explained as व्याप्नुयात् or व्याप्नोतु.

[3] This will make दिवे प्रगृह्य acc. to शे i. 1. 13 and complicate matters for the Padapāṭha. The alternative explanation of Bhaṭṭa Bhāskara that चतुर्थी is used here for सप्तमी is much more acceptable.

सति 'सावेकाचः°' [६।१।१६८] इत्यादिना, 'ऊडिदम्पदादि°'[1] [६।१।१७१] इत्यादिना वा तस्योदात्तत्वम्। 'नित्यवीप्सयोः' [८।१।४] इति द्विर्भावे सत्युत्तरभागस्य 'अनुदात्तं च' [८।१।३] इत्यनुदात्तत्वम्। (यशोऽस्यास्तीति विग्रहे सति 'अर्शआदिभ्योऽच्' [५।२।१२७] इत्यच्-प्रत्ययः[2]।) चित्स्वरं व्यत्ययेन बाधित्वा मध्योदात्तत्वम्। फिट्स्वरेणान्तोदात्ताद् वीर[3]-शब्दादुत्तरयोर्मतुप्तमपोः पित्त्वादनुदात्तत्वम्। 'ह्रस्वनुड्भ्याम्°' [६।१।१७६] इति तु न, सावर्णान्तत्वात् 'न गोश्वन्°' [६।१।१८२] इति प्रतिषेधात्[4] ॥३॥

This stanza has been construed differently by different commentators:

Skandasvāmin: अग्निना (दत्तम्, अग्नेर्वा सकाशात्) रयिम्, पोषमेव (पुष्टिं च), वीरवत्तम यशसम् (कीर्त्ति) च दिवेदिवे अश्नवत्।

Mādhava: अग्निना यशसम् (यशस्विनम्) वीरवत्तमम् (बलवत्तमम्) रयिं (पुत्रम्) पोषम् एव च दिवे दिवे अश्नवत्।

Veṅkaṭamādhava: अग्निना [स्तुतेन] रयिं (पशून् प्रजाश्च) अश्नवत् (आप्नोति), पोषम् एव (पोषं च प्रजानां च पशूनां च) दिवे दिवे (अन्वहम्), वीरवत्तमं यशसम् (यशश्च अतिशयेन वीरपुरुषयुक्तम)।

Sāyaṇa (here): अग्निना दिवे दिवे पोषम् एव (प्रतिदिनं पुष्यमाणतया वर्धमानम् एव), यशसम (यशोयुक्तम्) वीरवत्तमम् (अतिशयेन पुत्रपौत्रादिवीरपुरुषोपेतम्) रयिम् अश्नवत्।

Sāyaṇa (on TS. iii. 1. 11. 1, iv. 3. 13. 5): [अनेन] अग्निना रयिं (धनानि) अश्नवत् (सर्वो जन: प्राप्नोति)। (न केवलं धनस्य स्वरूपमात्रं किन्तु) दिवेदिवे (तस्य धनस्य) पोषम् (पुष्टिमेव प्राप्नोति न तु ह्रासम्। कीदृशं पोषम् ?) यशसम् (कीर्त्तिकरम), वीरवत्तमम् (वीरा अस्मदीया: पुत्रा अस्येति वीरवत्, अतिशयेन तथाविधम्)।

---

[1] Later on S. quotes this rule alone as it contains the word दि॰ itself.

[2] This is hardly correct as in the Nom. sing. we find in the Veda यशा: and not यशस:. Similarly we have यशस्तर and यशस्तम and not यशसतर and यशसतम.

[3] In Skt. वीर generally means a hero and नर a man; in Av. *vīra* generally means human being and *nara* a hero. [4] प्रतिषेध: All.

Bhaṭṭa Bhāskara (on TS. iii. 1.11.1): अग्निना हि रयिं (धनं पशुलक्षणम्) अश्नवत् (अश्नुते)। पोषम् एव (तस्य धनस्य अश्नुते अग्निना) दिवे दिवे (दिने दिने)। (रयिर्विशेष्यते) यशसम् (यशस्विनम्) वीरवत्तमम् (अतिशयेन वीरैः पुरुषैः तद्वन्तम्)। [यस्मादीदृशं रयिम् अग्निना सर्वो जनः अश्नुते तस्मात् अहमप्यग्निना ईदृशं रयिम् अश्नुवीय।]

रयिम्—Acc. to philologists it is derived from रि the reduced grade of रा to bestow and means bestowed, possession, wealth, treasure. Skt. रै, Lat. *rēs* (=Skt. राः), etc., are cognate.

अश्नवत्—3 sg. subj. pr. of अश् to attain. In the Vedas the root is predominantly Ātmanepadin, but in classical Sanskrit it is exclusively Ātmanepadin. अश + नु (विकरण) + अ (sign of the subj., strong) + त् (secondary ending)>अश् नो अ त्>अश्नवत्, class. अश्नुवीत. Ved. *aśnoti*, Av. *asnoiti*. S-aor. sub. अक्षत्.

पोषम्—prosperity, *cf.* ix. 66. 21: दधद्रयिं मयि पोषम्. पुष्टि and पुष्ट also are used in the same sense. *Cf.* ŚB. ii. 3. 5. 1 सुप्रजाः प्रजाभिः स्यां सुवीरो वीरैः सुपोषः पोषैः।

दिवेदिवे—Iterative of the loc. sing. of *divá* day. (तस्य परमाम्रेडितम्। अनुदात्तञ्च।) द्यविद्यवि is also used in the same sense. In classical Skt. दिव (day, heaven) is found in the expressions दिवौकस्, अहर्दिवम्, रात्रिन्दिवम्, नक्तन्दिवम्, etc. दिव, द्यु and द्यो (from दिव् to shine) mean 'day' or 'heaven'. Wackernagel contends that the a-stem *divá* is first met with (except at the end of compounds) in the epics. So दिवेदिवे occurring in the Vedas cannot be explained with the help of this *diva*. दिवे is really a dative sing. but came to be regarded as a loc. because of the preponderance of a-stems. (See *Alt-indische Grammatik*, Vol. II. 1, p. 146 § 59*e*). 'The connection in form between the dative and locative is close and the meanings also play easily one into the other.' PEILE. The Avesta has got only three or four instances of iterative compounds: *nmāne nmāne* house by house, *vīsi vīsi* village by village, *narəm narəm* man by man.

यशसम्—Some Indian commentators regard it as a noun meaning 'glory'[1] while others hold that it is an adjective meaning 'glorious' and qualifies रयिम् or पोषम् or both. The former meaning makes very good sense: through Agni one attains (1) wealth, (2) prosperity and (3) fame. But the difficulty is that *as*- and *an*-stems when accented on the suffix as here are not used as abstract nouns. Thus *ápas*—work, *apás*—active; *yáśas*—glory, *yaśás*—glorious, etc. *Cf. vayáṃ syāma yaśáso jáneṣu*—we would be famous among men; *ayáṃ devā'nām apásām apástamaḥ*—he is the most active of the active gods. But this difficulty is not insuperable. Sometimes with the shifting of the accent there is merely a change of gender without any change of meaning, as in the case of *rákṣas* n. and *rakṣás* m. both meaning Rākṣasa. Besides sentences like भूरि पोषं स धत्ते वीरवद् यशः viii. 23. 21 are almost conclusive. *Cf.* also ix. 66. 21, x. 91. 15, etc. यशः शब्दस्य तद्वत्परता मन्त्रान्तरेऽपि दृष्टा। अग्ने त्वं यशा असि [ऋ० सं ८।२३।२०] इति भट्टोजिः।

वीरवत्तमम्—Skt. *vīrá* (Av. *vīra*, Lith. *vyras*) from वी to procreate means man, then man of might, *i.e.*, hero. It appears in Latin with short *i* as *vir* man, husband (*virago*, a man-like vigorous maiden), and in Old English as *were*, *were-wolf* (वीरवृक) meaning 'man-wolf'. In Skt. and Beng., अवीरा means 'a woman without husband and son.' 'अवीरा निष्पति-सुता'. Some philologists have used *Wiros*, the Indo-European form of this word, to designate the people who spoke the primitive Indo-European language which is the source of Vedic, Old Persian and Avestan, of Greek, of Gothic and other Germanic languages, of Latin, of Old Irish and other Keltic speeches, and of the Slav and Baltic languages, of Armenian and Albanian, of Hittite and Tokharian*.

---

[1] यशःशब्दः कीर्तिपर्यायः। छान्दसत्वाद्भामो न लुक्। Skandasvāmin. यशसशब्दो यशःशब्दपर्यायो मध्योदात्तः। Veṅkaṭamādhava.

* S. K. CHATTERJI, *Indo-Aryan and Hindi*, p. 6.

This stanza would be regarded by many as an instance of the figure of speech अप्रस्तुतप्रशंसा. अहम् 'अग्र वीय' इति विशेषे प्रस्तुते 'अग्रवत्' इति सामान्येनोक्तेरप्रस्तुतप्रशंसा।)

अग्ने यं यज्ञमध्वरं
विश्वतः परिभूरसि।
स इद्देवेषु गच्छति ॥४॥

अग्ने। यम्। यज्ञम्। अध्वरम्।
विश्वतः। परिऽभूः। असि।
सः। इत्। देवेषु। गच्छति ॥४॥

O Agni (*ágne*), the worship and sacrifice, which (*yám yajñám adhvarám*) thou encirclest (*paribhū'ḥ ási*) on all sides (*viśvátaḥ*), that (*sáḥ*) goes (*gacchati*) assuredly (*it*) to the gods (*devéṣu*).

अभिप्लवषडहस्य[1] मध्यवर्त्तिषूकथ्येषु तृतीयसवने मैत्रावरुणस्य 'अग्ने यं यज्ञम्' इत्यादिको वैकल्पिकोऽनुरूपस्तृचः। एतच्च सप्तमाध्याये 'एह्य षु' [आ° श्रौ° ७।८।१]

[1] "सोमवल्ल्या रसं निष्कास्य तेन यावद्भिर्दिनैर्यागा अनुष्ठीयन्ते तावद्भिरहोभिस्ते सोमयागा व्यपदिश्यन्ते। तथाहि, एकेन दिनेनानुष्ठान एकाहः, द्वाभ्यां दिनाभ्यां द्व्यहः, त्रिभिर्दिनैस्त्र्यह इत्यादि। एवं षड्भिर्दिनैर्योऽनुष्ठीयते सोमेन यागः स षडहः, इत्युच्यते। तस्य च षडहसोमयागस्यानुष्ठानप्रकारभेदेन द्विविधत्वम्—एकोऽभिप्लवः षडहः, द्वितीयः पृष्ठ्यः षडह इति। अभिप्लवषडहे च प्रथमदिवसे अग्निष्टोमनामकसोमयागवदनुष्ठानम्, षष्ठे दिवसे च। द्वितीयतृतीयचतुर्थपञ्चमेष्वहस्सु उक्थ्यनामकसोमयागवदनुष्ठानं भवति। सोमयागसामान्ये च त्रिः सोमस्य सवनं भवति, प्रतिसवनं निष्कासितेन रसेनानुष्ठीयमाना यागा अपि सवनान्तःपातित्वेन मन्यन्ते। प्रतियागं हवनार्थं ग्रहनामकपात्रविशेषे रसं गृहीत्वा, वेद्यामवस्थाप्य तत्पात्रम्, ततः स्तोत्रशस्त्राणि पठ्यन्ते, अन्तिमे च मन्त्रे पठिते सति, तस्य रसस्य कश्चनांशो हूयतेऽग्नौ, अवशिष्टश्च होत्रादिभिः सर्वैर्ऋत्विग्भिः पीयत इति क्रमः। तत्र स्तोत्रं नाम सामसंज्ञकगानयुतमन्त्रपाठेन स्तुतिः। शस्त्रं नाम केवलैः पठ्यमानैर्मन्त्रैः सम्पाद्यमाना स्तुतिः। अन्ते पठ्यमानश्च मन्त्रः शस्त्रयाज्या याज्येति चोच्यते। तत्र स्तोत्राणि उद्गात्रादिभिर्ऋत्विग्भिः स्तूयन्ते। शस्त्राणि च होत्रा,

इत्यादि[1]खण्डे सूत्रितम्—'अग्निं वो वृधन्तमग्ने यं यज्ञमध्वरम्' [आ° श्रौ° ७।८।१] इति। तस्मिंस्तृचे या प्रथमा सा सूक्ते चतुर्थी। तामेतां चतुर्थीमृचमाह॥

हे अग्ने, त्वं यं यज्ञं विश्वतः सर्वासु दिक्षु परिभूः परितः प्राप्तवान् असि, स इत् स एव यज्ञो देवेषु तृप्तिं प्रणेतुं स्वर्गे* गच्छति। प्राच्यादि-चतुर्दिगन्तेष्वाहवनीय-मार्जालीय-गार्हपत्याग्नीध्रीयस्थानेष्वग्निरस्ति। परि-शब्देन होत्रियादिधिष्ण्यव्याप्तिर्विवक्षिता। कीदृशं यज्ञम्? अध्वरम् हिंसारहितम्[2]। न ह्यग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवन्ति। अग्निशब्दस्य षाष्ठिकम् [६।१।१९८] आमन्त्रिताद्युदात्तत्वम्। न विद्यते ध्वरोऽस्येति बहुव्रीहौ

मैत्रावरुणेन, ब्राह्मणाच्छंसिना, अच्छावाकेन च शंसन्ति। तत्र होतुः प्रतिसवनं शस्त्रद्वयं भवति। तदितरेषां च मैत्रावरुणादीनां प्रातःसवने तृतीयसवने चैकैकं शस्त्रं भवति। एवञ्चाग्नि-ष्टोमे प्रथमे सोमयागे होतुः षट् शस्त्राणि होत्रकाणां मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानां सवनद्वये षट् शस्त्राणीति मिलित्वा द्वादश शस्त्राणि भवन्ति। तानि यथायथं प्रपठ्य तदधिकानि त्रीणि शस्त्राणि उक्थ्यनामके सोमयागे पठनीयानि भवन्ति। एवं चोक्थ्ये साकल्येन पञ्चदश शस्त्राणि भवन्ति। यदा पुनरनेकैर्दिनैरनुष्ठेया भवन्ति सोमयागास्तदानीमभिप्लवादिषु यागेषु मैत्रावरुणादिभिरृत्विग्भिः स्वीयशस्त्रशंसनावसरे तद्दिवसीये उद्गातॄणां स्तोत्रे सामगानार्थं यस्तृच उपात्तस्तस्य शंसनं कर्तव्यं भवति। स चायं तृचः स्तोत्रियशब्देनोच्यते। ततः परस्मिन्दिने यस्मिंस्तृचे उद्गातृभिर्गानं करिष्यते तस्य तृचस्य पूर्वस्मिन्दिने स्तोत्रियशंसनोत्तरं शंसनं कर्तव्यं भवति। तस्य चास्य परदिनीयसामस्तोत्रियस्य तृचस्य पूर्वस्मिन् दिनेऽनुरूपशब्देन व्यवहारः क्रियते याज्ञिकैः। तदुक्तं ब्राह्मणे 'यः श्वः स्तोत्रियस्तमनुरूपं कुर्वन्ति' इति। एवं चात्र यागे मैत्रावरुणनामकेन ऋत्विजाऽनुरूपत्वेन वक्तव्यं तृचद्वयं वैकल्पिकमुक्तमाश्वलायनश्रौतसूत्रे। तत्र 'अग्ने यम्' इत्येकतरस्तृचः। तदेतत्सर्वमवधाय भाष्यकृतोक्तं 'वैकल्पिकोऽनुरूपस्तृचः' इति।"

[1] Later on S. drops the आदि in such cases.

* The Loc. with verbs of motion is rather unusual in classical Skt., but in i. 1 S. seems to be influenced by देवेषु गच्छति, see under i. 1. 1; under ii. 12. 1, etc., he uses the Acc.

[2] अध्वरशब्दोऽयं यज्ञमित्यनेन पौनरुक्त्यान्न यज्ञनाम। किं तर्हि? तद्विशेषणम्। ध्वरतिः हिंसाकर्मा। ध्वरणं ध्वरो हिंसा यस्मिन् नास्ति सोऽध्वरः। यज्ञे हि सर्वस्यानुग्रहो न हिंसा।...अथवा षष्ठ्यर्थे बहुव्रीहिः। अविद्यमानो ध्वरो यस्य सोऽध्वरः। Skandasvāmin.

'नमसुभ्याम्' [६।२।१७२] इत्यन्तोदात्तत्वम्। विश्वत इत्यत्र तसिलः प्रत्ययस्वरत्वं बाधित्वा पूर्ववर्णस्य 'लिति' [६।१।१९३] इत्युदात्तत्वम्। परिभूरित्यत्राव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते तदपवादत्वेन कृदुत्तरपदप्रकृतिस्वरत्वम्। असीति तिङन्तस्य 'यद्वृत्तान्नित्यम्' [८।१।६६] इति निघाताभावः ॥४॥

यज्ञम् अध्वरम्—यज्ञ (worship) is used in a wider sense than अध्वर (sacrificial act, offering). "Possibly in the designation of the sacrifice as यज्ञ the stress was laid on the element of prayer, praises and adoration; in the designation as अध्वर on the actual work which was chiefly done by the Adhvaryu." OLDENBERG. *Cf.* i. 44. 3 यज्ञानामध्वरश्रियम्, iv. 9. 7, अस्माकं जोष्यध्वरमस्माकं यज्ञमङ्गिरः। अस्माकं शृणुधी हवम् ॥ where S. explains अध्वरम् as यागम् and यज्ञम् as यज्ञसाधनं हविः (practically the reverse of what has been said above).

यज्ञ and अध्वर are similarly used together in i. 128. 4 अग्निर्यज्ञस्याध्वरस्य चेतति and viii. 10. 4 ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु.

परिभूः though a noun governs the Acc. See V. G. S., p. 302 top. मत्वर्थे षष्ठ्यर्थे द्वितीया—Skandasvāmin. कृद्योगलक्षणषष्ठ्यभावश्छान्दसः—S. on AV. vii. 84. 4. In i. 91. 19 या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम्, परिभूः is used with यज्ञ, in ii. 2. 5 स होता विश्वं परि भूत्वध्वरम् may he, the Hotṛ, encompass the whole sacrifice, परि-भू is used with अध्वर, in the present stanza परिभूः is used with both यज्ञ and अध्वर.

Skt. *pári*, Av. *pairi*, O. Pers. *pariy*. Gk. *peri*, Lat. *per* ; Skt. *bhū*, Av. *bū*, Gk. *phu-ō* 'I become,' Lat. *fui-t* 'he was,' Eng. *be*.

विश्वतः परिभूरसि—encompassest on all sides. *Cf.* i. 97. 6 त्वं हि विश्वतोमुख विश्वतः परिभूरसि। अप नः शोशुचदघम् ॥ 'for thou indeed whose face is turned on all sides encompassest the world on all sides, chasing away evil from us with thy light.' In several other passages the sense is made clear by the simile of the wheel and its spokes: i. 32. 15 सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव, i.141.9 यत् सीमनु क्रतुना विश्वथा विभुररान्न नेमिः परिभूरजायथाः, etc. विश्वतः would appear superfluous at first sight because the same meaning is expressed by परि of परि-भू. To avoid this difficulty Skandasvāmin

says; परिभूः means परियायी—परिपूर्वो भवतिः परियायार्थे. Venkaṭamādhava says: सर्वतः परिभवसि धिष्ण्यैः which is clarified by Sāyaṇa in his com.: विश्वतः (on every side) is used in reference to the four fires आहवनीय, मार्जालीय, गार्हपत्य and आग्नीध्रीय at the four cardinal points, east, south, west and north respectively, while परि alludes to the धिष्ण्य's of the Hotṛ, Maitrāvaruṇa, Acchāvāka, Neṣṭṛ, Potṛ and Brāhmaṇācchaṃsin. होत्रिय is used in the sense of belonging to the होतृ, hence आदि has been used for the धिष्ण्य's of the other priests. धिष्ण्य is "a sort of subordinate or side-altar (generally a heap of earth covered with sand on which the fire is placed, and of which eight are enumerated), *viz.*, besides the six *mentioned above, the* Āgnīdhrīya and the Mārjālīya, (M. W.). धिष्ण्य may also be taken in a wider sense to include दक्षिणाग्नि on the south-west, आवसथ्य on the north-east and सभ्य on the south-west. *Cf.* Śak. iv. 8: अमी वेदिं परितः क्लृप्तधिष्ण्याः, etc. Mādhava explains the passage with the help of the simile noted above and says: सर्वतः परिभवसि गार्हपत्यादिव्यूहेन, अरान् इव नेमिः. Geldner takes परिभू in a metaphorical sense—'that thou takest wholly under thy protection.'

इद् is the neuter of the pronominal stem इ, which is found in इतर, इतः, etc., (just as कत् in कच्चित् is the neuter of the pronominal stem क) and is an emphatic particle. It emphasises the preceding word and is translated in most cases by laying emphasis on that word. It became altogether obsolete in classical Skt., being retained only in the compound particle चेत् *if* and probably also in चित्. *Cf.* इदा, इत्था, इदानीम्. Skt. *it*, Av. *iṯ*.

देवेषु गच्छति—A blending of the two constructions देवान् गच्छति and देवेषु तिष्ठति. Hence it means goes to the gods and stays there and not merely goes towards them. RV. i. 125. 5 नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति ॥ "On the high ridge of heaven, he stands exalted, yea, to the Gods he goes, the liberal giver." This Loc. grew rarer and rarer. *Cf.* ŚB. ii. 3. 1. 32: यद्वै सत्येन ईयते तत्तु देवान् गच्छति. The Loc. is also found in ŚB.

अग्निर्होता कविक्रतुः
सत्यश्चित्रश्रवस्तमः ।
देवो देवेभिरा गमत् ॥५॥

अग्निः । होता । कविऽक्रतुः ।
सत्यः । चित्रश्रवःऽतमः ।
देवः । देवेभिः । आ । गमत् ॥५॥

May Agni (*agníḥ*) the Hotṛ (*hótā*), of wise intelligence (*kavíkratuḥ*), the true (*satyáḥ*), of most wonderful glory (*citrá-śravastamaḥ*), come hither (*ā' gamat*), a god (*deváḥ*) with the gods (*devébhiḥ*)

अयम् अग्निः देवः अन्यैः [देवेभिः] देवैर्हविर्भोजिभिः सह आगमत् अस्मिन् यज्ञे समागच्छतु । कीदृशोऽग्निः ? होता होमनिष्पादकः[1] । कविक्रतुः कविशब्दोऽत्र क्रान्तवचनः, न तु मेधाविनाम[2] । क्रतुः प्रज्ञानस्य कर्मणो वा नाम[3] ।

[1] होता देवानाम्. Sk.

[2] कविः, मनीषी, विपश्चित्, etc., are read in the *Nighaṇṭu* in the list of मेधाविनाम's [*Nir.* iii. 15] or words denoting wise men. In *Nir.* xii. 13 while explaining विश्वा रूपाणि प्रति मुञ्चते कविः RV. v. 81. 2 Yāska says मेधावी कविः, क्रान्तदर्शनो भवति, कवतेर्वा, *i. e.*, कवि means wise, because he sees what is past and distant, what is beyond the range of vision, or it may have been derived from the root कु to praise. It would appear therefore that acc. to Yāska मेधाविन् is explained by the words क्रान्तदर्शनो भवति and there is no contradiction between the two. Sāyaṇa, however, sometimes regards मेधाविन् and क्रान्त or क्रान्तदर्शिन् as two distinct senses of कवि. *Cf.* S. under RV. v. 11. 3 and i. 117. 23.

[3] क्रतु is read in the *Nighaṇṭu* in the list of words denoting deeds (कर्मनाम) [*Nir.* iii. 1] as also in the list of words denoting insight (प्रज्ञानाम) [*Nir.* iii. 13]. कृ from aor. अक्रत etc.

ततः क्रान्तप्रज्ञः क्रान्तकर्मा[1] वा। सत्यः अनृतरहितः, फलमवश्यं प्रयच्छतीत्यर्थः। चित्रश्रवस्तमः श्रूयते इति श्रवः कीर्तिः, अतिशयेन विविधकीर्तियुक्तः। कविक्रतुश्चित्रश्रवस्तम इत्यत्रोभयत्र बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरत्वम्। सत्सु साधुः सत्यः। 'सत्यादशपथे' [५।४।६६] इत्यत्रान्तोदात्तो हरदत्तेन निपातितः। लोडन्तस्य गच्छत्वितिशब्दस्य छत्वाभावः। उकारलोपश्छान्दसः। ततो रूपं गमदिति भवति[2]। स्पष्टमन्यत् ॥५॥

कविक्रतुः—कवि from कु to observe, to show, to feel means clever, wise; seer, poet.[3] The comparatives कवितर and कवीयः are used in the sense of 'wiser'. क्रतु[4] from कृ to do means strength, power, might. Some compare Gk. *kratos*—strength (of body or of mind), in *e.g.*, autocracy, democracy, etc. In Av. it is *xratu* strength of mind and in Mod. Persian *xirad* understanding. Thus the Bahuvrīhi cd. कविक्रतुः means 'of wise intelligence'. It may be mentioned here that शतक्रतु originally meant 'he whose power or insight is like that of a hundred'.

सत्यः—If the suffix were यत्, the word would have been accented on the 1st syl. acc. to यतोऽनावः. So Haradatta says: Pāṇini reads the word सत्य in his rule सत्यादशपथे as अन्तोदात्त indicating thereby that the suffix is य and not यत्. "सत्सु साधु सत्यम्। प्राग्घितीये यति प्राप्तेऽस्मादेव निपातनाद यः। अन्तोदात्तो हि सत्यशब्दः। सत्येनोत्तभिता भूमिः

---

[1] Of towering intellect or deeds. Skandasvāmin makes *the thing clear*: सर्वत्राप्रतिहतं प्रज्ञानं कर्म वा यस्य स कविक्रतुः.

[2] Under i.5.3 S. gives the correct derivation: गमेर्लेटस्तिप्। इतश्च लोपः परस्मैपदेषु [३।४।९७] इतीकारलोपः। बहुलं छन्दसि [२।४।७३] इति शपो लुक्। लेटोऽडाटौ [३।४।९४] इत्यडागमः। आगमा अनुदात्ताः [३।१।३।७] इति तस्यानुदात्तत्वे धातुस्वर एव शिष्यते। Under i. 30. 8 he proposes an alternative explanation: यद्वा छान्दसे लुङि पुषादिद्युताद्यॢदितः परस्मैपदेषु [३।१।५५] इति च्लेरङादेशः। बहुलं छन्दस्यमाङ्योगेऽपि [६।४।७५] इत्यडभावः।

[3] The *Rājataraṅgiṇī* gives a very fine description of the poet:

कोऽन्यः कालमतिक्रान्तं नेतुं प्रत्यक्षतां क्षमः।
कविप्रजापतींस्त्यक्त्वा रम्यनिर्माणशालिनः ॥

[4] *Cf.* वस्तु-.

[ऋ० १०।८५।१] ऋतञ्च सत्यञ्च [ऋ० १०।१९०।१] इति ।" पदमञ्जरी ५।४।६६. Under १।१४५।५ S. proposes various derivations: सत् क्रियमाणं कर्म, तत्र साधुः । सत्सु भवो वा । सत् फलं तदर्हतीति वा । Skt. *sátya-*, Av. *heiθya-*, O. Pers. *hašiya-*.

चित्रश्रवस्तमः—चित्र (from चित् to perceive, to shine) means noticeable, remarkable, brilliant. Av. *ciθra-*.

श्रवस् from श्रु to hear means 'fame'. It became obsolete in class. Skt. in this sense, though preserved in proper names like भूरिश्रवस्, वाजश्रवस्, etc. Av. *sravah* 'word,' Gk. *klé(w)os* 'fame'. Similar compounds occurring in RV. are उपमश्रवस्तमः, तुवि°, प्रथम°, सु°.

देवो देवेभिः—*cf.* उग्र उग्राभिरूतिभिः RV. i. 7. 4, अग्निनाग्निः समिध्यते, i. 12. 6, सखा सखिभ्य ईड्यः, i. 75. 4, वृषा वृषभिः सखिभिः सखा सन्, i. 100. 4, etc.

देवेभिः—In the Vedas सहार्थे तृतीया (the sociative instrumental) is much more frequent than सहयोगे तृतीया; *e, g.*, अग्निर्देवेभिरा गमत् iii. 10. 4, मरुद्भिरग्न आ गहि, i. 19. 1ff. *Cf.* Gk. *Alómenos* (wandering) *nēi* (with a ship) *te* (and) *kai* (also) *hetároisi* (with comrades); Lat. *si* (if) *aedificabis* (you build), *operis* (with workmen), *iumentis* (with beasts of burden) *materia* (with wood) *ádiuvabunt* (they will assist)[1]; Av. *gaobis syainti* (they live with the cattle).

गमत्—3 sing. subj. root-aorist of गम्. The present subj. would be गच्छाति or गच्छात् and the root aor. ind. अगन्. Skt. *gamyáte*, Gk. *bainō* (for **bám-yō*), Lat. *venio* (cf. *convenient*); Skt. *gácchāmi*, Gk. *báskō*, Av. *jasaiti*.

6

यदङ्ग दाशुषे त्व-	यत् । अङ्ग । दाशुषे । त्वम् ।
मग्ने भद्रं करिष्यसि ।	अग्ने । भद्रम् । करिष्यसि ।
तवेत्तत्सत्यमङ्गिरः ॥६॥	तव । इत् । तत् । सत्यम् । अङ्गिरः ॥६॥

Whatever (*yád aṅgá*) good (*bhadrám*) thou (*tvám*) Agni (*ágne*), wilt grant (*kariṣyási*) to the sacrificer (lit. the presenter of oblation) (*dāśúṣe*), that (*tát it*) of thee (*táva*) comes true (*satyám*), O Aṅgiras (*Áṅgiraḥ*).

[1] GILES, *Comparative Philology*, p. 334.

अङ्गेत्यभिमुखीकरणार्थो निपातः[1]। अङ्ग अग्ने हे अग्ने, त्वं दाशुषे हविर्दत्तवते यजमानाय तत्प्रीत्यर्थम्, यद् भद्रं वित्त-गृह-प्रजा-पशु-रूपं कल्याणं करिष्यसि तद् भद्रं तवेत् तवैव सुखहेतुरिति शेषः। हे अङ्गिरः अग्ने, एतच्च सत्यं न त्वत्र विसंवादोऽस्ति। यजमानस्य वित्तादिसम्पत्तौ सत्याम् उत्तरक्रत्वनुष्ठानेनाग्नेरेव सुखं भवति। भद्रशब्दार्थं शाट्यायनिनः[2] समाम्नन्ति—'यद्वै पुरुषस्य वित्तं तद् भद्रं गृहा भद्रं प्रजा भद्रं पशवो भद्रम्'[3] इति। अङ्गशब्दस्य निपातत्वेऽप्यभ्यादित्वाद्* अन्तोदात्तत्वम्। 'दाश्वान् साह्वान्०' [३।१।१२] इति सूत्रेण 'दाशृ दाने' [धा० १।८६७] इति धातोः क्वसुप्रत्ययो निपातितः। तत्र प्रत्ययस्वरः।

[1] So all Indian commentators and so also S. under AV. i. 16. 2, ii. 3. 2, etc. Under RV. iii. 33. 11 S. says अङ्गेत्यामन्त्रणे and under x. 129. 7 अङ्गेति प्रसिद्धौ. All these senses are more suitable to the *Brāhmaṇas* and class. Skt. than to Vedic.

[2] The *Śāṭyāyana Brāhmaṇa* belonged to the Sāmaveda. No MS. of the work has as yet been discovered.

[3] So also Mādhava. Dyādideva omits गृहा भद्रं and under v. 82. 5. S. quotes: प्रजा वै भद्रं पशवो भद्रं गृहं भद्रम्.

* अभ्यादित्वात् occurs only here in the *Bhāṣya*. अभि, no doubt, is अन्तोदात्त, but so far as we know, there is no gaṇa known as अभ्यादि. अभि is अन्तोदात्त by उपसर्गाश्चाभिवर्जम् (फि० सू० ४।१३.) निपात's like अङ्ग are अन्तोदात्त by the following rule एवादीनामन्तः which is read in the *Phiṭsūtravṛtti*, an authoritative commentary on the *Phiṭsūtras*, as एवमादीनामन्तः. Under i. 5. 1 Sāyaṇa explains the अन्तोदात्तत्व of अभि itself, the *nāyaka* of the gaṇa अभ्यादि as due to the rule उपसर्गाश्चाभिवर्जम्. Under i. 5. 10 and i. 19. 9, however, एवमादीनामन्तः is requisitioned, and under i. 6. 8 we find अभिशब्दः प्रातिपदिकस्वरेणान्तोदात्तः. It is just possible that scribes mistook एवादीनाम् for अभ्यादीनाम् and transcribed accordingly. A somewhat similar instance is found under i. 15. 6 where the printed editions read एवं for भावे. The passage runs thus: दक्षम् दक्षन्त्यनेनेति करणे घञ्। एवं हि पुंलिङ्गत्वनियमः, भावस्यानियम इति नपुंसकत्वम्. There is not the slightest doubt that the commentator wrote भावे here.

आमन्त्रितस्याग्निशब्दस्य पदात् परत्वेनाष्टमिकानुदात्तत्वं [८।१।१९] न शङ्कनीयम्, 'अपादादौ' [८।१।१८] इति पर्युदस्तत्वात्। ततः षाष्ठिकम् [६।१।१९८] आद्युदात्तत्वमेव। भद्रशब्दस्य नब्विषयत्वेन [फि० २।३] आद्युदात्तत्व-प्रसक्तावपि 'भदि कल्याणे'* [धा°१।१२] इति धातोरुपरि† रक्प्रत्ययेन[1] [उ°२।२९] निपातनाद् अन्तोदात्तत्वम्। अस्मिन् वाक्ये यच्छब्दप्रयोगात् 'निपातैर्यद्यदिहन्त°'[2] [८।१।३०] इति निघाते प्रतिषिद्धे स्य-प्रत्ययस्वरेण सतिशिष्टेन करिष्यसि-शब्द उपान्त्योदात्तः। तवेत्यत्र 'युष्मदस्मदोर्ङसि' [६।१।२११] इत्याद्युदात्तत्वम्। 'अङ्गिरा अङ्गाराः‡' इति यास्कः [नि० ३।१७]। ऐतरेयिणोऽपि प्रजापतिदुहितृध्यानो[3]पाख्याने समामनन्ति—'येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्' [ऐ० ब्रा० १३।१०] इति। तस्मादङ्गिरोनामकमुनिकारणत्वाद्[4] अङ्गाररूपस्याग्नेरङ्गिरस्त्वम्। अत्र पदात् परत्वेनाष्टमिकानुदात्तत्वम् ॥६॥

अङ्ग—in the RV. अङ्ग *aṅgá* (accented on the second syllable[5]) is an emphasising particle like एव in the sense of अन्ययोगव्यवच्छेद

---

* In the Pāṇinīya Dhātupāṭha the root is read as भदि कल्याणे सुखे च. भन्दते: स्तुतिकर्मा। भदि कल्याणे सुखे च इति तु धातु:। S. under i.97.3.

† Rather unusual, but so also under RV. iii. 9. 7, TS. i. 1. 2 (p. 46).

[1] In the Uṇādisūtras the suffix is *ran*.

[2] यत् is not a निपात here but a pronoun. So the relevant rule here is यद्वृत्तान्नित्यम् viii. 1. 66. See S. under viii. 6. 26, where the first यद्वृत्तयोगाच्च निघात: appears to have been dropped through the carelessness of scribes.

‡ The printed *Nirukta* reads अङ्गारेष्वङ्गिरा:। अङ्गारा अङ्कना अञ्चना:। which is explained thus by Durga: प्रजापतिना किल शुक्रमात्मीयमादायाग्नौ हुतम्, ततोऽर्चिषि भृगुर्नाम महर्षि: सम्बभूव। व्यपगतेऽर्चिषि योऽङ्गारेषु सम्बभूव सोऽङ्गिरा नामाभवत्। S. quotes अङ्गिरा अङ्गारा अङ्कना अञ्चना under RV. i. 139. 9.

[3] ध्यानम्=भार्यात्वेन ध्यानम्. *Cf*. AB. xiii. 9: प्रजापतिर्वै स्वां दुहितरमभ्यध्यायत्; TS. vi. 1. 3. 6: यज्ञो दक्षिणामभ्यध्यायत्, etc.

[4] कार्यकारणयोरभेदोपचारात्. In another place S. adds: तत्कारणत्वे च मन्त्र:—ये अङ्गिरस: सूनवस्ते अग्ने परि जज्ञिरे [ऋ० सं० १०।६२।५] इति.

[5] *áṅga* (accented on the first syllable) means 'limb'.

(अङ्गेति निपात एवार्थ S. on x. 4. 4). It may be translated by just, only, else. In the Brāhmaṇas अङ्ग sometimes begins a sentence with an adhortative sense, accentuating the verb: अङ्ग नो यज्ञं व्याचक्ष्व *pray explain the sacrifice to us* (V. G. S., p. 214 top). This use gave rise to the idea that अङ्ग was a सम्बोधनार्थक or पूजार्थक निपात and it came to be used in these senses in class. Skt.

दाशुषे—Dat. sing. of the perfect participle of दाश् to make offering. In विद्वस्, दाश्वस्, मीढ्वस् and साह्वस् there is generally no reduplication before वस्, though ददाशुषे occurs four times in RV. and विविद्वान् is sometimes met with. See note on विदुः under i. 19. 3.

भद्रम्—(from भन्द्, to receive praise, to shine) praiseworthy, auspicious; as a noun, welfare, prosperity. Skt. *súbhadra*, Av. *hubadra*.

करिष्यसि = चिकीर्षसि. The verb is accented because of the presence of the pronoun यत् (यद्वृत्तान्नित्यम्).

तवेत्तत् सत्यमङ्गिरः—that (good) of thine comes true, O Aṅgiras. *Cf.* i.98.3: वैश्वानर तव तत् सत्यमस्त्वस्मान् रायो मघवानः सचन्ताम् let that of thee come true, O Vaiśvānara: may riches and liberal patrons follow us.

The second explanation offered by Skandasvāmin is much more satisfactory than that of S.: करिष्यसि चिकीर्षसि। यद् यजमानाय भद्रं धनमन्नं वा चिकीर्षसि तवैव तत् सत्यं नान्यस्य, यदिष्टफलप्रदस्त्वमेव नान्यः।

In उतो तत् सत्यमित्तव viii. 93. 5, इत् is placed after सत्यम्. In विश्वं सत्यं मघवाना युवोरित् ii. 24. 12 again इत् is placed after युवोः (=युवयोः). In iv. 54. 4 सत्यमस्य तत् there is no particle of emphasis.

अङ्गिरः—'He [Agni] brings the gods to the sacrifice, and seats them on the strewn grass. He thus becomes familiar with the roads that connect heaven and earth, and becomes the regular messenger between the two. In this capacity he is associated with the Aṅgiras, a race of mythic semi-divine priests whose name seems to be identical with Greek *ággelos* [pronounced आङ्गेलोस्] (angel), "messenger". They also mediate between gods and men, and naturally Agni is an Aṅgiras, the first seer Aṅgiras, the ancient Aṅgiras, the most inspired of the Aṅgiras.' BLOOMFIELD, *The Religion of the Veda*, pp. 162-163.

* The similarity in sound between the words अङ्गिरस् and अङ्गार gave rise to various myths. One is related in the 13th Chapter of the *Aitareya Brāhmaṇa* and is as follows:

Prajāpati became enamoured of his own daughter and in the form of a stag approached her who had transformed herself into a gazelle. To punish him for his incestual passion the gods created Rudra who aimed his arrow at him and pierced him. As he flew upwards being pierced, his seed ran out. The gods surrounded it with Agni. Being kindled up, the first part of the seed became yonder Āditya, the second part Bhṛgu and the third part the Ādityas. And the coals became the Aṅgirasas.

This myth is alluded to in the well-known stanza of the महिम्नःस्तोत्र—प्रजानाथ नाथ प्रसभमभिकं स्वां दुहितरम्, etc.

7

उप त्वाग्ने दिवेदिवे	उप । त्वा । अग्ने । दिवेऽदिवे ।
दोषावस्तर्धिया वयम् ।	दोषाऽवस्तः । धिया । वयम् ।
नमो भरन्त एमसि ॥७॥	नमः । भरन्तः । आ । इमसि ॥७॥

To thee (*úpa tvā*), Agni (*agne*), day by day (*divédive*), O illuminator of darkness (*dóṣā-vastaḥ*), we (*vayám*) come (*ā' ímasi*) with prayer (*dhiyā'*), making obeisance (*námaḥ bhárantaḥ*).

अग्नीषोम-प्रणयन[1] 'उप त्वाग्ने°' इत्यादिकोऽनुवचनीयस्तृचः । एतच्च

---

[1] "सोमयागे वेदिद्वयं भवति—एका प्राकृती द्वितीया उत्तराख्या। तत्र पश्चिमायां दिशि यजमानस्योच्छ्रितप्रमाणेन निर्मितः पूर्वपश्चिमप्रलम्बः दक्षिणोत्तरव्यायतो मण्डपः प्राचीनवंशमण्डप इत्युच्यते। तत्र मण्डपे प्राकृती वेदिर्भवति। वेदिर्नाम आहवनीयगार्हपत्यनामकाग्निद्वयस्थानमध्यवर्तिनी भूमिः। श्रौतकर्मणां यत्रानुष्ठानं भवति साग्निहोत्रशाला। तस्यां शालायां प्राच्यां दिशि चतुष्कोणेऽग्निस्थाने निहितोऽग्निराहवनीयः। पश्चिमायां च वर्तुलेऽग्निस्थाने निहितोऽग्निर्गार्हपत्यः। तत्रोक्तायां वेद्यां सोमयागे दीक्षणीयेष्टेरनन्तरं सोमं क्रीत्वावस्थापयन्ति। तत आतिथ्येष्टेरनन्तरं स सोम उत्तरस्यां वेद्यां हविर्धानमण्डपे नेयः, एवं तत्र वेद्यामवस्थितस्याहवनीयाग्नेरपि कश्चनांश उत्तरवेद्यां नेयः। तयोश्चानयोरग्नीषोमयोः सह प्रणयनं क्रियते

ब्राह्मणे[1] समाम्नातम्—'उप त्वाग्ने दिवेदिव उप प्रियं पनिप्नतमिति तिस्त्रैकां चान्वाह' [ऐ० ब्रा० ५।४] इति। तस्मिंस्तृचे या प्रथमा सा सूक्ते सप्तमी। तामेतां सप्तमीमृचमाह ॥

हे अग्ने, वयम् अनुष्ठातारो दिवेदिवे प्रतिदिनम् दोषावस्तः रात्रावहनि च धिया बुद्ध्या, नमो भरन्तः नमस्कारं सम्पादयन्तः उप[2] समीपे त्वा एमसि त्वामागच्छामः[3]। उप-शब्दस्य निपातस्वरः[4] [फि० ४।१२]। 'त्वामौ द्वितीयायाः' [८।१।२३] इति युष्मच्छब्दस्यानुदात्तस्त्वादेशः*। [दोषावस्तः] दोषाशब्दो रात्रिवाची। वस्तरित्यहर्वाची। द्वन्द्वसमासे कार्तकौजपादित्वात् [६।२।३७] आद्युदात्तः। 'सावेकाचः°' [६।१।१६८] इति धियो विभक्तिरुदात्ता। नम इति निपातः[5]। भरन्त इत्यत्र शपः पित्त्वाच्छतुर्लसार्वधातुकत्वाच्चानुदात्तत्वे सति धातुस्वरः शिष्यते। इमसीत्यत्र 'इदन्तो मसि'[6] [७।१।४६] इत्यादेशो निघातश्च ॥७॥

तदिदमग्नीषोमप्रणयनम्। तत्र ये मन्त्राः पाठ्यास्तन्मध्ये 'उप त्वाग्ने' इत्यादिरृचः पठनीयो भवति।"

[1] Under उप प्रियं पनिप्नतम् ix. 67. 29, however, S. quotes from Áśvalāyana iv. 10. 3. Here he quotes from the *Aitareya Brāhmaṇa* probably for variety.

[2] So also Sk. and Mahīdhara. But this is merely to show the meanings of the separate parts. Sāyaṇa takes उप with एमसि as is clear from his com. on the next stanza.

[3] 'आङ्त्र धात्वर्थानुवादी। उपगच्छामः।' Sk.

[4] Properly speaking उपसर्गस्वरः acc. to उपसर्गाश्चाभिवर्जम् (फि० ४।१३.)

* Some sentences like the following appear to have been dropped here: दिवेदिवे। दिवश्शब्दादुत्तरस्याः सप्तम्याः 'सुपां सुलुक्°' [७।१।३९] इत्यादिना शे-आदेशः, 'ऊडिदम्°' [६।१।१७१] इत्यादिना च तस्योदात्तत्वम्। 'नित्यवीप्सयोः' [८।१।४] इति द्विर्भावे सत्युत्तरभागस्य 'अनुदात्तं च' [८।१।३] इत्यनुदात्तत्वम्। S. under iv. 8. 7.

[5] अत एवाद्युदात्त इति हृदयम्।

[6] The rule is generally read in this form, but there is reason to suppose that it was originally इदन्तो मसिः.

उप एमसि>उपेमसि, class. उपेम:. There is the maximum of space between the prep. and the root here. 'व्यवहिताश्च' Pā. i. 4. 82. *Cf.* 'वि' मृळीकाय ते मनो रथीरश्वं न सन्दितम्। गीर्भिर्वरुण 'सीमहि' ॥ RV. i. 25. 3. We would unloosen thy mind, O Varuṇa, towards mercy, with our hymns, as a charioteer unloosens the yoked steed.

दिवेदिवे—See p. 27.

दोषावस्त:—Most Indian commentators take it as a voc. in the sense of 'illuminator of darkness'. Sk.: रात्रौ स्वेन ज्योतिषा तमसामाच्छादयित:. Mādhava: दोषाया आच्छादयित:। दोषा निशा भवति। Mādhava (SV. i. 24): दोषेति रात्रेर्नाम। वस्ता आच्छादयिता। रात्रौ स्वेन ज्योतिषा तम आच्छादयितरित्यर्थ:। Bharata: दोषा रात्रि: तस्या विवासयित:, तमोनाशकेत्यर्थ: etc. Sāyaṇa offers this as an alternative explanation under iv. 4. 9 and as the only one under vii. 15. 15. भवति विज्ञतम: क्रमशो जन:. Uvaṭa and Mahīdhara also regard दोषावस्त: as a vocative (under VS. iii. 22) though they explain it as रात्रौ वसनशील.

It cannot be regarded as a Dvandva, for in that case the word could not be accented on the first syllable. Following in the footsteps of Bhaṭṭa Bhāskara, Sāyaṇa tried to get over the difficulty with the help of the rule कार्त-कौजपादयश्च. But even if कार्तकौजपादि be regarded as an आकृतिगण, दोषावस्त: would have the natural accent of the first member and would be accented on the second syllable. The Pada-pāṭha also is against Sāyaṇa. As a rule Dvandva compounds are not analysed by Śākalya. Now since दोषावस्त: is analysed it is reasonable to suppose that it was not regarded as a Dvandva by Śākalya who may be looked upon as the earliest commentator of RV. In a mantra quoted in *Āśvalāyana Śrauta Sūtra* iii. 12. 4 and *Śāṅkhāyana Gṛhya Sūtra* v. 5. 4, Agni is addressed as दोषावस्त: and प्रातर्वस्त: meaning evidently 'shining in the evening' and 'shining in the morning.' In RV. iii. 49. 4 Indra is described as क्षपां वस्ता जनिता सूर्यस्य 'the illuminer of nights, the begetter of the sun'. And what appears to clinch the matter is that in RV. vii. 15. 15 दोषावस्त: is used along with दिवा नक्तम् in the same connexion. दोषावस्त: may also be taken to mean 'O

thou shining in darkness'. There is a good article on दोषावस्तः in *the Princess of Wales Sarasvatī Bhavana Studies*, Vol. VII, pp. 91-96.

धिया—धी thought, religious thought, devotion, prayer, hence धीर means thoughtful, wise, intelligent. Av. *dī*, *δi*, wisdom.

नमः—Av. *nəmah*-(नमः सोमाय=Av. *nəmō haomāi*) is derived from नम् to bend and was originally declined as a neuter substantive. Thus in RV. we find नमः, नमसा, नमसे, नमसः, नमसि and नमोभिः. In AV. नमांसि is met with. In Av. also we find forms like *nəmō*, *nəmaṅhā*, *nəmaṅhe*, *nəmaṅhō*, etc. Modern Persian *namāz* 'prayer' is cognate.

भरन्तः—Gk. *pherontes*, Av. *barantō*.

एमसि—The primary endings for the 1st person plural were मसि and मस् in the Vedas. "In the RV. *masi* is more than five times as common as *mas*, but in the AV. *mas* is rather commoner than *masi*." (V.G.S., p. 125, f.n. 2). This *masi* is found only in Vedic and in Iranian where it is the only ending for the 1st pl. Ved. *s-masi*, O. Persian *a-mahy*, Av. *mahi**; Ved. *bharā-masi*, Av. *barā-mahi*. Pāṇini's rule is इदन्तो मसि.

8

राजन्तमध्वराणां	राजन्तम् । अध्वराणाम् ।
गोपामृतस्य दीदिविम् ।	गोपाम् । ऋतस्य । दीदिविम् ।
वर्धमानं स्वे दमे ॥८॥	वर्धमानम् । स्वे । दमे ॥८॥

(We come to thee) ruling over (*rā'jantam*) sacrifices (*adhvarā'ṇām*), the guardian (*gopā'm*) of truth or moral order (*ṛtásya*), the shining one (*dī'divim*), increasing (*várdhamānam*) in thine own abode (*své dáme*).

* Initial *sm* becomes *m* in the Avesta through loss of *h*, so that only the suffix remains here.

"पूर्वमन्त्रे त्वामुपेम* इत्यग्निमुद्दिश्योक्तम्। कीदृशं त्वाम्? राजन्तम् दीप्यमानम्। अध्वराणां राक्षसकृतहिंसारहितानां यज्ञानाम् गोपाम् रक्षकम्, ऋतस्य[1] सत्यस्यावश्यम्भाविनः कर्मफलस्य दीदिविम् पौनःपुन्येन भृशं वा द्योतकम्। आहुत्याधारमग्निं दृष्ट्वा शास्त्रप्रसिद्धं कर्मफलं स्मर्यते[2]। स्वे दमे स्वकीयगृहे यज्ञशालायां हविर्भिः वर्धमानम्[3]।" राजन्तं वर्धमानमित्यत्रोभयत्र[4] पूर्ववद्धातुस्वरः शिष्यते। दीदिवि-शब्दस्य 'अभ्यस्तानामादिः' [६।१।१८९] इत्याद्युदात्तत्वम्। दम-शब्दो वृषादित्वात्[5] [६।१।२०३] आद्युदात्तः ॥८॥

Stanzas 7 and 8 form a युग्मक. 'द्वाभ्यां तु युग्मकं प्रोक्तम्।'

राजन्तम्—As the genitive normally preceded the word governing it, Indian commentators generally construe अध्वराणाम् with गोपाम् and ऋतस्य with दीदिविम्. But in this particular case since राजन्तम् requires a genitive, अध्वराणाम् should be construed with it. Skandasvāmin explains correctly: राजन्तम् ईशानम्। कस्य? अध्वराणां

*उपेम:—M.P. But the correct form is उपेम: and S. in his com. on TS. says: उपेमसि उपगच्छाम:. Uvaṭa, Veṅkaṭamādhava and others also write उपेम:.

1 ऋतस्य...यज्ञस्य गोपा:...रक्षक:. S. on x. 8. 5. The derivation of गोपा: is discussed fully under v. 11. 1. कर्मफलस्य under iii. 12. 7.

2 See S. on RV. iii. 26. 7.

3 AB. v. 2: अग्निर्वै देवानां होता। तस्यैष स्वो लोको यदुत्तरवेदीनाभि:. See S. under i. 94. 14. स्वे दमे आहवनीये समिध्यमानम्—Veṅkaṭamādhava. स्वे स्वकीये दमे गृहे उत्तरवेद्याम्—S. under i. 143. 4. वर्धमानं समिद्भिर्हविर्भिश्च—Bh. on TS. i. 5. 6. 2.

4 So also under St. 5 and St. 9. Later on S drops the अत्र.

5 Sāyaṇa is evidently thinking of the Phiṭsūtra गेहार्थानामस्त्रियाम् i. 3. But in that case he ought to defend the आद्युदात्तत्व by including the word under ग्रामादि (P.S. ii.15). He gives the correct derivation, etc. acc. to Pāṇini under i. 61. 9: दम उपशमे इत्यस्मात् कर्मणि घञ् 'नोदात्तोपदेशस्य मान्तस्यानाचमे:' [७।३।३४] इति वृद्धिप्रतिषेध:। घञो ञित्त्वादाद्युदात्तत्वम्।

यज्ञानाम्। गोपां रक्षितारं च ऋतस्य यज्ञस्यैव। दीदिविम् अत्यर्थदीप्तम्। वर्धमानं स्व आत्मीये दमे यज्ञगृहे। राजन्तमध्वराणाम् occurs again in i. 45. 4 where Veṅkaṭamādhava explains it as ईशानं यज्ञानाम्. Though Pāṇini does not put अर्थं after ईश् in his rule अधीगर्थदयेशां कर्मणि still all verbs signifying to rule over, as a rule, govern the Genitive in RV.*; *e.g.*, त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि i. 25. 20. By a curious irony it is ईश् that is sometimes found used with the Acc. In Avesta, Greek and Latin also verbs of ruling are used with the Genitive. Av. *kat̲ mōi urvā išē cahyā avaṅhō* Y. 50. 1 that my soul rules over (*i. e.*, obtains) any help. Gk. *Agamém-nōn méga pántōn Argeiōn ē'nassen. Iliad*, x. 32. Agamemnon ruled mightily over all the Argives. Lat. *ut salvi poteremur domi*. Plautus, *Amph*. 187. That we might make ourselves masters of the house in safety (*i.e.* get safe home). GILES, *A Short Manual of Comparative Philology*, p. 315.

गोपाम्—The Sumerian word for 'cow' was *gud* which was pronounced *gu* with the loss of the final consonant about B.C. 2700. This *gu* was borrowed by the Indo-Europeans in the form *gwōus* and became गौः in Sanskrit.† The stem गो compounded with पा to protect gives गोपा lit. protector of cows (RV. x. 19. 4, 5), then a protector in general since most words with गो as the first member had a tendency to lose the reference to cattle and become generalised in sense. From this गोपा or its later form गोप there arose the denominative root गोपाय 'to act like a protector', then 'to protect' which led people to think of a root गुप् to which was added आय regularly before सार्वधातुक endings and optionally before आर्धधातुक endings.‡ This is the

* Even in classical Skt. we find sentences like प्रभवति निजस्य कन्यकाजनस्य महाराजः.

† This view has not yet found general acceptance.

‡ जुगुपुः is used once and गुपित twice in RV.

reason why गोपाम् is not analysed in the Pada-text, though अनृतुपा, ऋतुपा, पशुपा, पूर्वपा, शेवधिपा, सोमपा, etc., are all analysed. Skt. *gauḥ*, Av. *gāus*, Gk. *bous*, Lat. *bos*, all meaning 'ox or cow'; Skt. *pāti*, Av. *pāiti*, Gk. *pō-u* 'herd', Av. *rāna-pā* (पादत्राण).

ऋतस्य—"ṛtá means the regular order of nature, such as the unvarying course of the sun and the moon, and of the seasons; then, on one hand, the regular course of sacrifice (rite); on the other, moral order (right), a sense replaced in Skt. by dharma. Agni is specially the guardian of *ṛtá* in the ritual sense, because the sacrificial fire is regularly kindled every day; Varuṇa is specially the guardian of *ṛta* in the moral sense." MACDONELL, *Vedic Reader*, p. 9.

Skt. *ṛtasya*, *cf*. Y. Av. *aṣahe*, G. Av. *aṣahyā*

दीदिविम्—Acc. to Uṇādi iv. 55 दिवो हे दीर्घश्चाभ्यासस्य, दीदिवि is formed from दिव् with क्विन् with the reduplication of the root and lengthening of the reduplicative syllable. From the fact that दीदिवः, दीदिवांसम्, etc., occur fairly frequently in RV. it would seem more reasonable to derive the word from दी 'to shine' with the suffix वि. Sāyaṇa evidently derives the word with the suffix कि as in the case of ददि, पपि, दधि, etc., otherwise it would be unnecessary for him to quote the rule, अभ्यस्तानामादिः, the आद्युदात्तत्व being prescribed by ञ्नित्यादिर्नित्यम्. "दिवे: किप्रत्ययो बाहुलकात्। लिड्वद्भावाद् द्वित्वम्। 'तुजादीनां दीर्घोऽभ्यासस्य' [६।१।७] इत्यभ्यासदीर्घः।" Mahīdhara. गोपामृतस्य दीदिविम्—class. Skt. गोपायितारं यज्ञस्य देदीप्यमानम्.

वर्धमानं स्वे दमे—'यद्वै देवेज्ञोयते हविस्तद्विरिमावं वर्धते' Sruti quoted by Sāyaṇa under RV. iv. 6. 4.

दमे—*dáma* accented on the 1st syllable means 'a house'. Gk. *dómo-s*, Lat. *domu-s*, Av. *dam*. In class. Skt. we should say गृहे or आगारे. *damá* means 'self-control' and at the end of compounds 'conquering'. Skt. *dáme*, Lat. *domī*, Av. *dəmāne*, *māne*.

दम् also means a house, and this दम् is preserved in दम्पती in Skt.

स नः पितेव सूनवे-	सः । नः । पिताऽइव । सूनवे ।
ऽग्ने सूपायनो भव ।	अग्ने । सुऽउपायनः । भव ।
सचस्वा नः स्वस्तये ॥९॥	सचस्व । नः । स्वस्तये ॥९॥

Thus thou (*sáḥ*), to us (*naḥ*), like a father (*pitā' iva*) to his son (*sūnáve*), Agni (*ágne*), be (*bhava*) easy of access (*sūpāyanáḥ*). Abide (*sácasva*) with us (*naḥ*) for our welfare (*svastáye*).

हे अग्ने, स त्वं नः अस्मदर्थं सूपायनः शोभनप्राप्तियुक्तो[1] भव। तथा नः अस्माकं स्वस्तये विनाशराहित्यार्थं सचस्व समवेतो भव। तत्रोभयत्र दृष्टान्तः--यथा सूनवे पुत्रार्थं पिता सुप्रापः प्रायेण समवेतो भवति तद्वत्। अस्मच्छब्दादेशस्य न इत्येतस्य 'अनुदात्तं सर्वम्°' [८।१।१८] इत्यनुदात्तत्वम्। 'चादयोऽनुदात्ताः' [फि° ४।१६] इति इव-शब्दोऽनुदात्तः। 'इवेन नित्यसमासः* पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्' [२।१।४।२] इति समस्तः

[1] Under TS. i. 5. 6. 2 S. explains it as प्राप्तुं शक्यो भव where
evidently सुखेन has been dropped through the error of scribes.
Bhāskara says: सूपायनः सूपचरणः सुखेनोपचरणीयः परिचरणीयो वा भव।
"छन्दसि गत्यर्थेभ्यः" [३।३।१२९] इति युच्। शोभनोपायनो वा। S. accepts the
last explanation here. Under RV. x. 18. 11 he explains सूपायना
f. as: शोभनोपगमना सूपचारिका. Under AV. xviii. 3. 50. सूपायनास्मै भव
सूपसर्पणा S. says: सूपायना सुखेनोपगन्तुमर्हा सूपसर्पणा शोभनोपसर्पणयुक्ता च भव.

* This Vārttika is read in the *Mahābhāṣya* under सह सुपा
ii. 1. 4 and कुगतिप्रादयः ii. 2. 18 in the form इवेन विभक्त्यलोपः पूर्वपदप्रकृति-
स्वरत्वं च and explained by Patañjali thus: इवेन सह समासो विभक्त्यलोपः
पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्. Though the word नित्य is not placed
before समास in the explanation it is clear that the Vārttikakāra
means नित्यसमास as the Vārttika is read under नित्याधिकार.

पितेवेति-शब्दो मध्योदात्तः। [सूपायनशब्दस्य] शोभनमुपायनं यस्येति बहुव्रीहौ 'नञ्सुभ्याम्' [६।२।१७२] इत्यन्तोदात्तत्वम्। सचस्वेत्यस्य पदात्परत्वं नास्तीति न निघातः, छसार्वधातुकानुदात्तत्वे सति धातु-स्वरावशेषः ॥९॥

पितेव—Note that the Pada text regards पितेव as a compound and separates पिता and इव by means of the अवग्रह. Since इव is accentless and since in the vast majority of cases it is connected in sense with the word immediately preceding and since in a few cases the विभक्तिs of the preceding word appear to have been dropped before this इव, it was naturally thought in ancient times that इव was compounded with the preceding word and the authors of the Padapāṭha of RV. and AV. followed this tradition, though they did not recognise the elision of the case-endings. In गातूयन्तीव i. 169. 5 इव comes after a finite verb, in यथेव x. 86. 7 it comes after an अव्यय, in वीव x. 86. 7 it comes after an उपसर्ग, in नेव i. 161. 8 it comes after a निपात, in यमितवा इव i. 28. 4 it comes after an infinitive, in रथ्येव चक्रा i. 180. 4, सूर्यस्येव रश्मयः x. 91. 4, etc., it is भिन्नक्रम, but in all these cases it is separated by means of the अवग्रह.

पितेव सूनवे[1]—*Cf.* वयं स्याम मातुर्न सूनवः vii. 81. 4, may we be [to the Goddess Dawn] as sons to the mother; पितेव सोम सूनवे सुशेवः

Hence later commentators generally quote the Vārttika in the form इवेन सह नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्च वक्तव्यम्, (*vide* Mallinātha on Raghu I. 1), though commentators on grammar have spared no pains to show that the समास prescribed by the Vārttika is not नित्य. So far as RV. is concerned the समास must be regarded as नित्य, so here at least नित्यसमासः is the correct reading. But विभक्त्यलोपः appears to have been dropped after नित्यसमासः through the carelessness of scribes. In the later portions of the commentary (i. 3. 8, i. 8. 7, i. 53. 1, iii. 30. 4, etc.) the Vārttika is generally quoted in the form इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्च.

[1] Because of the plural in नः, the *Kāṭhaka Saṃhitā* reads: पितेव पुत्रेभ्यः.

(gracious) viii. 48. 4; *cf*. also ii. 1. 9: त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचम्। त्वं पुत्रो भवसि यस्तेऽविधत् त्वं सखा सुशेवः पास्याधृषः ॥ "Agni, men *seek thee as a Father with their prayers, win thee bright-formed to brotherhood with holy act.* Thou art a son to him who daily *worships* thee, and as trusty Friend thou guardest from attack." अग्निं मन्ये पितरमग्निमापिमग्निं भ्रातरं सदमित् सखायम् x. 7. 3, Agni I deem my father, Agni my kinsman, Agni my brother and my friend for ever. Skt. *pitā*, Av. *pitā*, Gk. *patēr*, Lat. *pater*, Goth. *fadar*, Eng. *father*. Skt. *sūnú-ḥ*, Av. *hunu-s*, Goth. *sunu-s*, Lith. *sūnú-s*, Eng. *son*; Skt. *sūnáve*, Av. *hunave*.

पितेव सूनवे is like नलिनीदलतालवृन्तैः (Śak. iii), स्थलनलिनीवनात् सरसिजसम्भवः परागः (Kirāt. v. 39), हिरण्यगर्भाङ्गभुवं मुनिम् (Śiś. i. 1), etc., for सूनु from सू signifying प्राणिगर्भविमोचन (parturition) literally means 'borne' and not 'begotten'. "रूढिर्योगमपहरति".

The *a* of *agne* has to be restored to make up the eight syllables required by a गायत्रीपाद. Similarly स्वस्तये in the next line will have to be read सु अस्तये. The *a* of *agne* is accented acc. to आमन्त्रितस्य च vi. 1. 198 where there is एकादेश acc. to एङः पदान्तादति vi. 1. 109, the *e* of *sūnáve* becomes accented acc. to एकादेश उदात्तेनोदात्तः viii. 2. 5.

सूपायनः—सूपगमः, सुखोपक्रमः। सु सुखेन उपायनम् उपगमनम् प्रापणं यस्य सः. Bahuvrīhis generally retain the normal accent of the first member, but when this happens to be नञ् or सु, the final vowel is accented. उपायन from इ or अय् to go means 'access'. It occurs by itself in ii. 28. 2. In Skt. the word means presents, but not in Vedic. Hence Dyādideva is wrong in explaining सूपायनः as शोभनधनादिप्राप्तियुक्तः. We can explain सूपायन as an उपपद compound also, सुखेन उपेयते इति छन्दसि गत्यर्थेभ्य इति युच्. But in that case युच् being a स्वार्थ suffix, the genitive in नः will be difficult to defend.

सचस्वा—Metrical lengthening, hence short in Pp. The root is preserved in Skt. सचिव and सक्तु. षच सेचने or सेवने is आत्मनेपदी, षच समवाये is उभयपदी. The root generally means to accompany. From it is derived सचा (Av. *haca*, O. Persian *hacā* with, together with, from, governing the Abl., then Inst. and Acc.) which means सह in RV. but governs the locative.

Skt. *sacate*, Av. *hacaite*, Gk. *ἕπεται*, Lat. *sequitur*; Skt. *sacasva*, Av. *sacaṅuha*, Gk. *σπεῖο* Lat. *sequere*.

स्वस्तये ('अस्तिरभिपूजितः सु अस्तीति,' *well-being*)—In RV. स्वस्ति was declined. But as it was used predominantly in the Instr. sg. which normally would give स्वस्ती but which was often shortened to स्वस्ति (*e.g.*, पर्षि णः पारमंहसः स्वस्ति ii. 33. 3) it came to be regarded as an indeclinable in Skt.[1] In ŚB. i. 9. 1. 27 स्वस्ति declined is explained with the help of स्वस्ति indeclinable thus: 'देवी स्वस्तिरस्ति नः स्वस्तिर्मानुषेभ्यः' इति। स्वस्ति नो देववास्तु स्वस्ति मनुष्येभ्यइत्येवैतदाह। The forms स्वस्तिः, स्वस्तिम्, स्वस्तौ, स्वस्ति, स्वस्तये, स्वस्ती and स्वस्तिभिः occur in RV. It is not analysed in Pp. probably because अस्ति does not occur independently as a noun. Philologists point out that *asti* occurs as *sti* at the end of compounds; thus we have Skt. *abhiṣṭi* help, *abhiṣṭi* helper, Av. *aiwišti* study, Skt. *úpasti* subordinate, etc. Since स्वस्ति shows the full form अस्ति, it must be a later formation.

THE MARUTS

Characteristic Features

Along with Vāta, Indra, Parjanya and Rudra, the Maruts are the gods of the atmosphere. They occupy a fairly prominent position in RV. being praised in about thirty* entire hymns and sharing seven with Indra†, two with Agni‡ and

[1] This has led Bhāskara to remark: स्वस्त्य इति विभक्त्यन्तप्रतिरूपोऽव्ययः. Sāyaṇa also says under स्वस्ती ii. 38. 1: यद्यपि स्वस्तिशब्दो विभक्त्यन्तनिर्दिष्टः शब्दपरस्तथाप्यपर्यवसानादर्थपरो भवति।

* i. 37-39, 64, 85-88, 166, 168, 171, 172, ii. 34; v. 52-59, 61, 87; vi. 66, vii. 56-59; viii. 7, 20, 94; x. 77, 78. All these have been translated and annotated by Max Müller in SBE. xxxii.

† i. 6, 165, 167, 171, etc. ‡ i. 19, v. 60.

one with Pūṣan. Their troop (गण, शर्ध, व्रात*) is often mentioned and they are thrice seven (त्रिसप्तैः शूर सत्वभिः RV. i. 133. 6) or thrice sixty (त्रिः षष्टिस्त्वा मरुतो वावृधानाः RV. viii. 96. 8), or seven times seven and the Maruts were reckoned in later literature as forty-nine†. Their father is Rudra, hence they are called रुद्रासः, रुद्रियासः, रुद्रसूनवः, etc. and their mother is पृश्नि or the mottled cow whence they derive the designations गोमातरः, पृश्निमातरः, etc. They are also called दिवस्पुत्रासः (x. 77. 2) 'sons of Heaven' and सिन्धुमातरः (x. 78. 6) 'having the ocean for their mother'. They are closely associated with Indra‡ and in one passage they are said to be like sons to Indra (स सूनुभिर्न रुद्रेभिः i. 100. 5) and in another they are called his brothers (भ्रातरो मरुतस्तव i. 170. 2). Because of this close association with the Maruts, Indra came to be known as मरुत्वत् (i. 100).

---

* शर्धंशर्धं व एषां व्रातंव्रातं गणंगणं सुशस्तिभिः । अनु क्रामेम धीतिभिः ॥ RV. v. 53. 11. "With eulogies and hymns may we follow your army, troop by troop and band by band, and company by company."

† The no. seven is intimately connected with the Maruts. सप्त मे सप्त शाकिन एकमेका शता ददुः । यमुनायामधि श्रुतमुद्राधो गव्यं मृजे नि राधो अश्व्यं मृजे ॥ RV. v. 52. 17. "The mighty ones, the seven times seven, have singly given me hundred gifts. I have obtained on Yamunā famed wealth in kine and wealth in steeds." सप्तानां सप्त ऋष्टयः सप्त द्युम्नान्येषाम् । सप्तो अधि श्रियो धिरे ॥ viii. 28. 5. "The seven carry seven spears, seven are the splendours they possess, and seven the glories they assume." सप्त-सप्त हि मारुतो गणः SB. ii. 5.1.13.

‡ The *Sarvānukramaṇī* notes this in the rule: प्रायेणैन्द्रे मरुतः ii. 22 which is explained by Ṣaḍguruśiṣya thus: इन्द्रसूक्ते मरुतः प्रायेण बाहुल्येन निपातभाजो भवन्ति । ऐन्द्रे तु प्रायेण, अनैन्द्रे त्वल्पश इति प्रायशब्दार्थः । निपातो आगतपूजनमित्यनुक्रमणीविदः । The *Aitareya Brāhmaṇa* xii. 9. relates how the Maruts did not abandon Indra when all other gods ran away at the snorting of Vṛtra but encouraged him saying: Smite, O blessed one ; strike, show thy strength.

The Maruts are brothers and grew up together (अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय v. 60. 5). They are of the same age and same abode (सवयसः सनीळाः i. 165. 1) and of the same mind (समन्यवः viii. 20. 1, 21), like twins of noble aspect and lovely form (यमा इव सुसदृशः सुपेशसः v. 57. 4).

They are golden (हिरण्ययान् vi. 66. 2), like blazing fires (अग्नयो न शोशुचन् vi. 66. 2), are brilliant like the sun (सूर्यत्वचः vii. 59. 11) and self-luminous (स्वभानवः i. 37. 2). In vii. 59. 7 they are compared to blue-backed swans (आ हंसासो नीलपृष्ठा अपप्तन्).

Many of their characteristics can be gathered from the following stanza:

अंसेषु व ऋष्टयः पत्सु खादयो वक्षःसु रुक्मा मरुतो रथे शुभः ।
अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययीः ॥ v. 54. 11.

"On your shoulders gleam spears, on your feet anklets, on your breasts golden ornaments, on your chariot gems, on your hands lightning bright as fire and on your heads are spread golden helmets." (See also i. 64. 4, 166. 9-10, v. 57. 6).

They ride on golden cars (हिरण्यरथाः v. 57. 1) with golden wheels (हिरण्यचक्रान् i. 88. 5) and their steeds are spotted mares (पृषतीः i. 85. 5), or horses golden-footed (अश्वैर्हिरण्यपाणिभिः viii. 7.27)*. They yoked the winds to their pole (वातान् ह्यश्वान् धुर्यायुयुज्रे v. 58. 7) and their carriers are swift as thought (मनोजुवः i. 85. 4).

Like Indra they shake what is unshakable (प्रच्यावयन्तो अच्युता चिदोजसा i. 85. 4)—the earth and mountains and forests. All creatures are afraid of them (भयन्ते विश्वा भुवना मरुद्भ्यः i. 85. 8). They tear asunder lords of the forest (वि विञ्चन्ति वनस्पतीन्, i. 39. 5) and split the firm mountain (दाहृहाणं चिद्बिभिदुर्वि पर्वतम् i. 85. 10) and like wild elephants they devour the forests (मृगा इव हस्तिनः खादथा वना i. 64. 7).

---

* युङ्ग्ध्वं ह्यरुषी[1] रथे युङ्ग्ध्वं रथेषु रोहितः[2] ।
युङ्ग्ध्वं हरी[3] अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ॥ v. 56.6.
ruddy mares. [2] red coursers. [3] bay steeds.

They are not without their beneficent aspect. When Gotama was dying with thirst they poured the golden stream into his parched throat (अभिस्वरन्नुत्सं गोतमाय तृष्णजे i. 85. 11). They are also known to possess healing remedies like their father Rudra.

The etymology of the word मरुत् is uncertain[1]. Some derive it from a root मृ 'to shine' (which appears in Skt. *marīci*, Gk. *marmairein* to gleam, Lat. *merus* pure, unmixed) because of the constant mention of their brilliance and of their association with the lightning. Others derive the word form मृ 'to die' and think that the Maruts are personifications of the souls of the dead. Still others think that the word is connected with मरु desert.

For their song see under अर्कम्, RV. i. 19. 4

Hymn No. 2

AGNI AND MARUTS

i. 19

म० १ काण्वो मेधातिथिर्ऋषिः । अग्निर्मरुतश्च देवता । गायत्री छन्दः । सू० १९

1

प्रति त्यं चारुमध्वरं	प्रति । त्यम् । चारुम् । अध्वरम् ।
गोपीथाय प्र हूयसे ।	गोऽपीथाय । प्र । हूयसे ॥
मरुद्भिरग्न आ गहि ॥१॥	मरुत्ऽभिः । अग्ने । आ । गहि ॥१॥

Earnestly (*prá*) art thou invoked (*hūyase*) to (*práti*) this (*tyám*) perfect (*cā́rum*) rite (*adhvarám*) to drink the Soma juice (*gopīthā́ya*). With the Maruts (*marúdbhiḥ*), O Agni (*agne*), come (*ā́ gahi*).

---

[1] Fanciful etymologies are found in *Nir.* xi. 14: मरुतो मितराविणो वा मितरोचिनो वा महद् द्रवन्तीति वा.

'प्रति त्यमि'ति नवर्चं द्वितीयं सूक्तम्[1]। ऋषिच्छन्दसी पूर्ववत्[2]। देवता त्वनुक्रम्यते—'प्रति त्यमाग्निमारुतम्'[3] इति। कारीरीष्टौ[4] 'प्रति त्यम्' इत्येषा धाय्या। तथा च सूत्रितम्—'वर्षकामेष्टिः कारीरी' [आ° श्रौ° २।१३।१]। 'तस्यां प्रति त्यं चारुमध्वरमीळे अग्निं स्ववसं नमोभिरिति धाय्ये' [आ° श्रौ° २।१३।२]। इति॥

---

[1] प्रथममण्डलस्य पञ्चमेऽनुवाके षट् सूक्तानि, तत्र प्रति त्यमिति द्वितीयं सूक्तम्।

[2] 'ऋषिश्चान्यस्मादृषेरवाविशिष्टः' [अनु° १२।१] इति हि सर्वानुक्रमणी-परिभाषा। 'सूक्तसंख्यानुवर्तेत आन्यस्याः सूक्तसंख्यायाः' [अनु° १२।३] इति पूर्वसूत्रतः 'अनुवर्तते' इत्यनुवर्तते। 'अन्यस्मात् ऋषेः आ' ऋष्यन्तरनामसमुच्चारणात् प्राक् 'ऋषिश्च' न केवलं छन्दः अपि तु प्रकृत ऋषिरपि अनुवर्तेत, 'अ-वाविशिष्टः' स चेत् प्रकृतर्षिर्वाविशिष्टो न भवति। अनुक्रमण्यां यस्यर्षेर्नाम्नोऽनन्तरं वाशब्दस्योपादानं तस्यर्षेरुत्तरवर्त्तिषु सूक्तेषु नानुवृत्तिरिति बोध्यम्। प्रकृते परिभाषयानया 'अग्निं' द्वादश मेधातिथिः काण्वः' इति द्वादशसूक्तगतानुक्रमणीतः 'मेधातिथिः काण्वः' इत्यनुवर्तते। अत एवात्रापि कण्वपुत्रो मेधातिथिरृषिः। इदानीम् 'अवाविशिष्टः' इत्यस्य व्यावृत्तिः प्रदर्श्यते। तथाहि 'चन्द्रमा अप्स्वन्तः' [१।१०५] इति सूक्तमधिकृत्यानुक्रान्तम् 'चन्द्रमा एकोनाप्त्यस्त्रितो वा' इति। 'इमं षोळश कुत्सः' इति चतुर्नवतितमसूक्तानुक्रमणीतः 'कुत्सः' इत्यनुवर्तते। अत्र 'आप्त्यस्त्रितो वा' इत्यनेन कुत्सस्याप्त्यवंशसमुद्भूतेन त्रितेन विकल्पो भवति। एवं चाप्त्यस्त्रितो वाविशिष्टत्वादुत्तरत्र नानुवर्तते, कुत्स एवानुवर्तते 'नासत्याभ्यां पञ्चाधिका कक्षीवान् दैर्घतमस उशिक्प्रसूत आश्विनं वै' [१।११६ अनु°] इत्यतः प्राक्।

इदानीं छन्दो विचार्यते। तत्रापि जागर्ति परिभाषा 'आदौ गायत्रं प्राग्घिरण्यस्तूपात्' [अनु° १२।१४] इति। दशमसूक्तानुक्रमणिकायां 'गायन्ति द्वादशानुष्टुभं तु' इत्यत्र विशेषतः तु-विशिष्टस्यानुष्टुभस्योपादानात् तस्य तदुत्तरवर्त्तिनश्च सूक्तस्यानुष्टुप् छन्दः। अत्र पुनरपवादाभावाद् गायत्रं छन्दः।

[3] अग्निश्च मरुतश्च देवता अस्येत्याग्निमारुतं सूक्तम्।

[4] वर्षकामेन कारीरीष्टिरनुष्ठेया। करीरफलनिष्पाद्यत्वात् कर्मणः कारीरीष्टिरिति नामधेयम्। तत्र यजमानः कृष्णदशं कृष्णं वासः परिधत्ते, अग्निर्धामच्छत् मरुतः सूर्यश्च देवता भवन्ति। 'दर्शपूर्णमासाविष्टीनां प्रकृतिः' इत्युक्तेः सामान्यतो दर्शपूर्णमासयोरितिकर्तव्यता-कलाप एवेष्ट्यन्तरेषु प्रवर्त्तते। अग्निसमिन्धनावसरे पठ्यमानाः सामिधेनीमन्त्राः दर्शपूर्णमासयोः पञ्चदश, कारीरीष्टौ पुनर्विशेषविधानात् सप्तदश सामिधेन्योऽनुवक्तव्याः। तदर्थं चातिरिक्तम् ऋग्द्वयमपेक्ष्यते। सामिधेनीषु चातिरिक्ततया विधीयमाना ऋग् धाय्येति व्यपदिश्यते। प्रकृतेष्टौ च 'प्रति त्यं चारुमध्वरम्' 'ईळे अग्निं स्ववसं नमोभि'रिति धाय्ये।

त्यच्छब्दः सर्वनाम तच्छब्दपर्यायः। हे अग्ने, यो यज्ञः चारुः अङ्गवैकल्य[1]-रहितः त्यम् तथाविधं चारुम् अध्वरं प्रतिलभ्य* गोपीथाय सोमपानाय प्रहूयसे प्रकर्षेण त्वं हूयसे। तस्मादस्मिन्नध्वरे त्वं मरुद्भिः देवविशेषैः सह आगहि आगच्छ। सेयमृग् यास्केनैवं व्याख्याता—'तं प्रति चारुमध्वरं सोमपानाय प्रहूयसे सोऽग्ने मरुद्भिः सहागच्छ' [नि° १०।३६] इति। प्रति। निपात आद्युदात्तः। त्यम्। 'त्यदादीनामः' [७।२।१०२]। प्रातिपदिकस्वरः। चारुम्। दृसनिजनि-चरि°'[उ° १।३]इत्यादिना ञुण्। 'अत उपधायाः' [७।२।११६] इति† वृद्धिः। ञित्त्वादाद्युदात्तः। गोपीथाय। 'निशीथगोपीथावगथाः'[2] [उ° २।९] इति थक्-प्रत्ययान्तो निपातितः। प्र। निपातस्वरः[3] ॥१॥

The metre of this hymn, like that of the preceding one is Gāyatrī which is the most sacred metre and which stands second in order of frequency in RV., about one-fourth of the hymns being composed in it. It consists of three octo-syllabic verses (अष्टाक्षरास्त्रयः पादाः). In the first-half of each verse known as the opening, the second and fourth sylls. are preferably long, in the

---

[1] This fine expression is borrowed by S. from Durga's commentary on *Nirukta* x. 66, others generally paraphrase with the hackneyed शोभनम्.

* The correct reading appears to be प्रतिलक्ष्य. Sk. says: लक्षणे कर्मप्रवचनीयः प्रतिः. Similarly, Bharata (SV. 1. 2. 6) says: प्रति उद्दिश्य.

† इति dropped in one or two MSS. Both readings are possible.

[2] There is some difference of opinion regarding the meaning of this rule. According to Ujjvala थक् is added to पा preceded by गो. Acc. to Bhaṭṭa Bhāskara गुपेरौणादिकस्थक्प्रत्यय ईकारागमश्च.

Since the previous rule makes provision for पीथ from पा, Bhaṭṭa Bhāskara's explanation is preferable.

[3] निपाता आद्युदात्ताः। फि॰ ४।१२॥ Strangely enough S. explains the formation of गहि not here but under the next stanza.

second half known as the cadence the first and third syllables are generally short and the second long. The Gāyatrī Chandaḥ disappeared entirely from classical Sanskrit but is found in the Avesta.

प्रति—preposition governing अध्वरम्. The corresponding particle in the Avesta is *paiti* which is used in a much larger no. of senses and consequently with a larger no. of case-endings. In this particular sense *paiti* governs the Acc. and the Loc.; *e.g.*, *paiti adwanəm*, प्रति अध्वानम्, *kamərəδe paiti daēvanam*,* कुमूर्धनि प्रति देवानाम्. The corresponding Greek word is *proti* which appears as *pros* and *poti* also and which in Homer generally governs the Acc.: *hoi* (ते) *tón* (तम्) *ge* (अपि) *proti* (प्रति) *ástu* (वास्तु) *phéron* (अभरन्). Il. xiii. 538. 'They bore him to the city.'

त्यम्—Grammarians from Pāṇini downwards recognise two pronouns त्यद् and तद् having the same sense and similar forms, त्यद् (तद् + यद्) is, however, very rare in classical Sanskrit, the only well-known instance of its occurrence being:

सूतो वा सूतपुत्रो वा यो वा को* वा भवाम्यहम् ।
दैवायत्तं कुले जन्म मदायत्तं हि पौरुषम् ॥ [वेणीसंहार ३।३७]

The pronoun is found in O. Persian also as *tya-*, Nom. sing. masc. *hya*, fem. *hyā*, but is entirely absent in the Avesta. Several forms of this pron. are found in Pali also.

चारुम्—dear, pleasing from चन्, to gladden; *cf.* चारुर्मित्रे वरुणे च ix. 61. 9, dear to Mitra and Varuṇa. Lat. *carus*. चारु चर्तेर्विपरीतस्य *Nir.* xi 5.

गोपीथाय—पीथ is derived from the root पा. But there are two पा's in Sanskrit, one meaning to drink and the other to protect. Thus पीथ means draught and protection. Hence गोपीथ means (1) a draught of milk or by लक्षणा a draught of Soma and (2) protection of cows, hence protection (for the generalisation of meaning see p. 52). In the present instance both senses are

* Even here there is the variant यो वा को वा.

possible though Indian commentators from Yāska downwards accept the first meaning and Geldner and a few European scholars the second. The Pada-text does not analyse गोपा, but dissolves गोपीथ into गो and पीथ, so Śākalya also appears to think that the word means 'a draught of milk'. In the first stanza the poet invites Agni to come to his sacrifice for drinking Soma and in the last also he concludes by offering Soma to Agni. Stanzas like विश्वान् देवान् हवामहे मरुतः सोमपीतये। उग्रा हि पृश्निमातरः॥ i. 23. 10. 'We invoke the All-Gods and the Maruts for drinking Soma; for strong are they whose mother is Pṛśni (the Maruts),' support the traditional interpretation. Geldner believes 'protection' is the only sense of the word in RV. गोपीथाय occurs several times in the Bhāgavata in the sense of रक्षणाय.

Forms with थ became rare in the later language and only a few words like अर्थ, काष्ठा, गाथा, निशीथ, रथ, शपथ, वेपथु survived. In निर्विघ्नः सोमपीथी आवुत्तो मे भगवानृष्यशृङ्गः, आर्या च शान्ता? (*Uttararāmacarita*, Act I) सोमपीथी became सोमपीती in the hands of later scribes.

गहि—The original ending for the imp. second sing. was -धि (Av. δi, Gk. -*thi*) which became broken down into -*hi* in most cases in Sanskrit but which is preserved in forms like एधि, जुहुधि, शाधि, etc. This ending is accented and consequently weak. In the root-aorist system it is added directly to the root: *gám(d)hi*>*gam(d)hi*>*gm(d)hi*>*gm̥(d)hi*>*ga(d)hi*. The ending being accented the root becomes unaccented and the *a* of the unaccented syllable is dropped. As it is difficult to pronounce the three consonants gm(d)h without any intervening vowel, the consonant *m* is changed into the sonant *m̥*. In course of time even sonant nasals were found difficult to pronounce and were replaced in Skt. and Gk. by *a*. Thus we have *gadhi* and *gahi* in the root-aor. system; in the present system the forms are *gáccha* and *gácchatāt*; e.g., एन्द्र नो गधि प्रियः viii. 98. 4, गच्छामित्रान् प्र पद्यस्व vi. 75. 16. Skt. *gadhi*, Av. *gaidī*.

प्र—Av. *frā*, *fra*; Gk. *pró*, Lat. *prŏ*, *prō*. In Av., Gk. and Latin the particle is used as a कर्मप्रवचनीय also, but not so in Sanskrit.

मरुद्भिः—Sociative Instrumental; see p. 43. *Cf.* Av. *aθrā tū aredrāiš idī*, Y. xlvi. 16 'come here with the pious.'

नहि देवो न मर्त्यो	नहि । देवः । न । मर्त्यः ।
महस्तव क्रतुं परः ।	महः । तव । क्रतुम् । परः ।
मरुद्भिरग्न आ गहि ॥२॥	मरुत्ऽभिः । अग्ने । आ । गहि ॥२॥

Nor (*nahi*) god (*deváḥ*), nor (*ná*) mortal (*mártyaḥ*) surpasses (*paráḥ*) the power (*krátum*) of thee (*táva*), the great one (*maháḥ*).

हे अग्ने, महः महतः तव सम्बन्धिनं क्रतुम् कर्मविशेषमुल्लङ्घ्य [देवः] परो नहि उत्कृष्टो देवो न भवति खलु। तथा मर्त्यो मनुष्यश्च परो न भवति। ये मनुष्यास्त्वदीयं क्रतुमनुतिष्ठन्ति ये च देवास्त्वदीये क्रताविज्यन्ते त एवोत्कृष्टा इत्यर्थः। मरुद्भिरित्यादि पूर्ववत् ॥ नहि। 'एवमादीनामन्तः'* [फि° ४।१४] इत्यन्तोदात्तः। देवः[1]। पचाद्यजन्तश्चित्त्वादन्तोदात्तः। महः। महतस्तलोपश्छान्दसः। 'बृहन्महतोरुपसंख्यानम्' [६।१।१७३ का।†] इति विभक्तेरुदात्तत्वम्। तव। 'युष्मदस्मदोर्ङसि' [६।१।२११] इत्याद्युदात्तत्वम्। क्रतुम्। 'कृञः कतुः' [उ° १।७८]। प्रत्ययाद्युदात्तत्वम्। गहि। 'गम्लृ सृप्लृ गतौ' [धा° १। ९६३-९६४]। लोटः सेर्हिः[2]। 'बहुलं छन्दसि' [२।४।७३] इति शपो लुक्।[3]

* See p. 29.

1 See pp. 23-24.

† The Vārttika is found in this form in the *Kāśikā*. In the *Mahābhāṣya* under शतुरनुमो नद्यजादी vi. 1. 173 occurs the Vārttika नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानम्.

2 सेर्ह्यपिच्च ३।४।८७ इति सूत्रेण।

3 ततश्च "सार्वधातुकमपित्" इति हेरपित्त्वेन ङित्त्वात्।

'अनुदात्तोपदेश°' [६।४।३७] इत्यादिनानुनासिकलोपः । तस्य 'असिद्धवदत्राभात्' [६।४।२२] इत्यसिद्धत्वाद् 'अतो हेः' [६।४।१०५] इति लुक् न भवति[1] । निघातः ॥२॥

नहि—regarded as one word. Lith. *nègi*.

मर्त्यं—Av. *maśyō*. *mártya* 'mortal' must not be confused with *márya* man, young man.

महः—The stem is *mah* m. n. (Av. *maz*). [The fem. is *mahī*, great, the earth.] The forms actually occurring are: *mah-ā́*, *mah-é*, *mah-áḥ*; neut. du. *mah-ī́*, Acc. pl. masc. *mah-áḥ*, Gen. pl. m. *mah-ā́m*; neut. sing. Nom. Acc. *máhi* (Gk. *méga*). Note that *maháḥ* = *mahataḥ*, but *máhaḥ* = splendour.

क्रतुम्—See p. 42.

परः—Note that the pronoun is accented on the first syllable and the adverb and preposition on the second. The latter meaning 'beyond' generally governs the Instr. but sometimes it takes the Acc. and the Abl. and once it is used with the Loc. (see MACDONELL's *Vedic Grammar*, p. 423); *e.g.*, इन्द्रं को वीर्या परः i 80. 15 'who excels Indra in might?' परः मात्रया[2] vii. 99. 1 'beyond measure,' अस्मात्...परः viii. 27. 18 'far away from him.'

The word became obsolete in class. Skt. and so Pāṇini did not include it in his rule पूर्वाधरावराणामसि पुरधवश्चैषाम् v. 3. 39. Like many other similar words, however, it was preserved in compds. like परोक्ष- 'beyond the range of vision,' परःसहस्र- 'more than a thousand,' परोरजाः 'beyond the dust,' 'untouched by passion,' परोवरीयान् 'better than better, most excellent,' etc. And commentators of Pāṇini found it difficult to explain these forms.

---

[1] 'अतो हेः' इत्याभाच्छास्त्रीये लुकि कर्तव्ये 'अनुदात्तोपदेश°' इत्याभाच्छास्त्रीयो मकारलोपोऽसिद्धवद् भवति। तेन शास्त्रदृष्ट्या अतः परत्वाभावात् हिलोपशास्त्रस्याप्रवृत्तिः।

[2] परः इति सकारान्तं परस्तादित्यस्यार्थे। परशब्दाच्छान्दसोऽसिप्रत्ययः। परो दिवा पर एना पृथिव्या [ऋ° सं° १०।८२।५] इति यथा। मात्रयेति व्यत्ययेन तृतीया। मात्रया परः परिच्छिद्यमानया, अपरिमितया। S. Under नैनाम् नमसा परो अस्ति कश्चन AV. vii. 8. 5, S. says: परशब्दयोगेन पञ्चम्या भवितव्यम्। अत्र छान्दसो विभक्तिव्यत्ययः।

Sāyaṇa recognised the word in this sense but unfortunately hethought that it governed the Ins. only. Thus under x. 125. 8 he says : पर इति सकारान्त' परस्तादित्यर्थे वर्तते, यथा अध इत्यधस्तादित्यर्थे। तद्योगे च तृतीया सर्वत्र दृश्यते।

The corresponding word in the Avesta is *parō (parə)* which is a prep. governing the Acc. : *yā sruyē parə magaonō*, Y. 33. 7, that I may be heard outside those who-have-the-gifts, (SMITH).

We should therefore construe the sentence as it is and translate with Macdonell (*Vedic Grammar*, p. 423) : for neither god nor mortal (goes) beyond the might of thee, the great.

3

ये महो रजसो विदु-
विश्वे देवासो अद्रुहः ।
मरुद्भिरग्न आ गहि ॥३॥

ये । महः । रजसः । विदुः ।
विश्वे । देवासः । अद्रुहः ।
मरुत्ऽभिः । अग्ने । आ । गहि ॥३॥

They that (*yé*) know (*vidúḥ*) of the great (*maháḥ*) [atmospheric] region (*rájasaḥ*), the All-gods (*víśve devā'saḥ*) that are free from malice (*adrúhaḥ*),

हे अग्ने, ये मरुतो महो रजसः महत उदकस्य[1] वर्षणप्रकारं विदुः तैः मरुद्भिरित्यन्वयः। कीदृशा मरुतः? विश्वे[2] सर्वे सप्तविधगणोपेताः। 'सप्तगणा वै मरुतः' [तै° सं° २।२।११।१] इति श्रुतेः[3]। देवासः द्योतमानाः।

[1] The two Mādhavas explain रजस् as अन्तरिक्ष. Skanda says : रजःशब्दो लोकवचन उदकवचनो वा। महो रजस इति चोभयत्र द्वितीयार्थे षष्ठी : ये महद् रजः लोकम् अन्तरिक्षाख्यम्, उदकं वा मेघं विदुः।

[2] विश्वे व्याप्ताः M., V. M.; सर्वे Sk.

[3] Under v. 52. 17 S. adds: अदितिगर्भे वर्तमानं वायुमिन्द्रः प्रविश्य सप्तधा विदार्य पुनरेकैकं सप्तधा व्यदारयत्। त एकोनपञ्चाशन्मरुद्गणा अभवन्निति पुराणेषु प्रसिद्धम्।

अद्रुहः द्रोहरहिताः,[1] वर्षणेन सर्वभूतोपकारित्वात्। तथा चोपरिष्टादाम्नायते 'उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा[2] पुरीषिणः'[2] [ऋ° सं° ५।५५।५] इति। शाखान्तरेऽपि मन्त्रान्तरस्य ब्राह्मणमेवमाम्नायते—'मरुतां पृषतयः स्थेत्याह मरुतो वै वृष्ट्या ईशते'[3] [तै° ब्रा° ३।३।९।४]। रजःशब्दो यास्केन बहुधा व्याख्यातः—'रजो रजतेः, ज्योती रज उच्यते, उदकं रज उच्यते, लोका रजांस्युच्यन्ते, असृगहनी रजसी उच्येते'[4] [नि° ४।१९] इति॥ रजसः। 'नब्विषयस्यानिसन्तस्य' [फि° २।३] इत्याद्युदात्तः। विदुः। 'विद ज्ञाने [धा° २।५४]। 'विदो लटो वा' [३।४।८३] इति झेरुसादेशः। प्रत्ययस्वरः। यद्वृत्तयोगान्निघाताभावः। विश्वे। विशेः क्वन्नन्तस्य नित्त्वादाद्युदात्तत्वम्। देवासः। 'आज्जसेरसुक्' [७।१।५०]। देवशब्दः पचाद्यजन्तः। चित्त्वादन्तोदात्तः। अद्रुहः। सम्पदादित्वाद्भावे क्विपि बहुव्रीहौ 'नञ्सुभ्याम्' [६।२।१७२] इत्यन्तोदात्तत्वम्।[5] कर्तरि वा क्विप्। तत्पुरुषे ह्यव्ययपूर्वपदप्रकृतिस्वरत्वं स्यात्, न तु*

[1] "अद्रुहः अद्रोग्धव्या अद्रोग्धारो वा स्तोतॄणां यष्टॄणां च।" Sk. 'अहिंसितारः' Uv. (VS. xii. 10). 'न द्रुह्यन्तीत्यद्रुहः, अहिंसितारः।' Mah. अद्रोग्धारः Mādhava and Bharata (SV. iii. 2. 3). अद्रोग्धारः, अनुग्रहशीलाः. S. (AV. vi. 7. 1, p. 16).

[2] "You raise, O Maruts, the rain from the sea and rain it down, O ye fraught with vaporous moisture."

[3] A piece of grass is cast from the *prastara* towards the east and the *mantra* 'Ye are the spotted steeds of the Maruts'- uttered, for the *Maruts rule over rain*. Cf. also मरुतो वै वर्षस्येशते SB. ix. 1. 2. 5. This is the reason why most of the mantras used in the Kārīrīṣṭi are मरुद्देवताक.

[4] रजस् is derived from *raj* 'to colour' and means (i) light, (ii) water, (iii) region, (iv) [menstrual] blood and (v) day.

[5] So also under i. 3. 9, iii. 9. 4. But under ii. 1. 14, iii. 22. 4, etc. S. himself explains it as अद्रोग्धारः. Under vi. 11. 2 he explains अद्रुह् in both ways: अद्रोग्धा, अस्मदर्थं द्रोहरहितो वा.

* न च—M. P. This can be somehow defended by supplying इति वाच्यम् after अदुत्तरपदप्रकृतिस्वरत्वम्. But न तु appears to have been written by the commentator.

कृदुत्तरपदप्रकृतिस्वरत्वम्[1] । यतो 'नञ् न गतिर्न च कारकम्'* [महाभाष्य ७।१।३७] इति ॥३॥

Stanzas 3-9 are in praise of the Maruts. Because of यद् in the first hemistich, we have to supply the correlative तद् in the second. In the सजनीय hymn (ii 12) both the correlatives are expressly stated.

रजसः—The two Mādhavas explain रजस् as अन्तरिक्ष, so also Skandasvāmin who offers मेघोदकम् as an alternative meaning. Gk. *Erebos*, a place of nether darkness, forming a passage from earth to Hades, Armenian *erek*, *erekoy* evening, Goth. *riquis*, *riquizis*, darkness. English region is not cognate.

विदुः (Gk. *isāsi*, Lat. *vīdērē*, Goth. *witun*)—Of the five विद्'s known to classical Skt. only the अदादि and तुदादि ones are found in the Vedas. The original meaning of the root is 'to see'—a sense still preserved in Greek and Latin. On the one hand, चाक्षुषज्ञान was either generalised into ज्ञानसामान्य or 'to see' was specialised into 'to see with the mind's eye' and the अदादि root came to mean 'to know'. On the other hand, 'to see' was specialised into 'seeing an object looked for' and so the तुदादि root came to mean 'to find'. Skt. *vēda*, Av. *vaēδa*, Gk. *oîda* (for **woîda*),

---

[1] The difficulty with regard to accentuation can, no doubt, be easily got over with the help of परादिश्छन्दसि बहुलम् vi. 2. 199 (*cf.* S. under iii. 16. 5 न वीरता अवीरता । नञः स्वरे प्राप्ते परादिश्छन्दसि बहुलम् इति नञ उत्तरस्यादिरुदात्तता ।), but द्रुह् appears to have meant originally द्रोह, so it is better to regard compounds like अद्रुह and पुरुद्रुह् as Bahuvrīhis.

* कारकः—M. P. But this is a quotation from the *Mahābhāṣya* where we find: अयं हि नञ् न गतिर्न च कारकम् (ed. Kielhorn, Vol. III, p. 256, 1. 5) and किं नञः प्रतिषेधेन न गति र्न च कारकम् (*Ibid*, 1. 9). Under RV. i. 53.7 the quotation is found printed correctly in M. and P.

Lat. *vidī*, Goth. *wait*. The अदादि root forms an additional perfect without reduplication with the sense of the present. The fact that the perfect of this root is formed in Skt., Gk., Av., Lat. and Gothic without reduplication shows that there was an Indo-European perfect type without reduplication. The present sense is explained thus: *vidúḥ* means they have seen, *i.e.*, they know.

विद् to know is used with both the Acc. and the Gen.) With the Acc. it means 'to know fully' and with the Gen. 'to know'; *cf.* 'to know' and 'to know of' in English. सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन RV. x. 85. 3. 'Of him whom Brāhmaṇas *truly know* as Soma no one ever tastes.' विदुर्देवाः सहसामानमर्कम् x. 114. 1. '*Well* do the gods *know* the praise-song along with the Sāman.' नाहं वेद भ्रातृत्वं नो स्वसृत्वम् x. 108. 10. 'Neither brotherhood nor sisterhood do I know.' In the Avesta also *vaēd* to know, *aipi vat* to know thoroughly, etc., govern the Accusative and the Genitive. Similarly, *oida* in Gk. is used both with the Acc. and the Gen. In the sense of 'to be cunning with' it governs the Gen. in Homer.

विश्वे—Av. *vispa-*, *vīspa-*, O. Pers. *vispa-*. *Cf.* Av. *vīspō-tanūm* (Skt.* विश्वतनुम्), *vīspō-paēsaṅhəm* (Skt. विश्वपेशसम्).

देवासः—Some philologists are of opinion that since in the case of disyllabic *i-* and *u-*stems the Nom. pl. consists of three syllables, it was felt that in the case of disyllabic *a-*stems also, the Nom. pl. should consist of three syllables, and consequently the ending *-as* was added twice to make up the requisite no. of syllables.) Exactly the same thing happened in the domain of conjugation. The ending for the 1 pres. ind. of *a-*stems was आ (Skt. भरामि but Gk. *phérō*, Lat. *ferō*) and that for other stems was मि (Skt. *ásmi*, Gk. *eimi*, Lat. *esmi*). So we should expect भवा, भरा, वहा, etc., instead of भवामि, भरामि, वहामि, etc. But since the other eight forms भवति, भवतः, भवन्ति, भवसि, भवथः, भवथ, भवावः, भवामः all consist of three syllables it was felt that the first person singular also should consist of three syllables and so to the ending आ was added the ending मि converting भवा, भरा, वहा, etc., into भवामि, भरामि, वहामि, etc.

The ending *-āsaḥ* is already becoming archaic in RV. It appears as *-āoṅhō* in Av., but here also it is archaic. Because of the frequency of the form जनासः in RV. we find एतमग्निं तवैव प्रवक्ष्यन्ति जनासः in *Kaṭhopaniṣad* i. 1. 19. The ending occurs in Pali Gāthās as *-āse*. The double ending appears also in O. Pers. ; *e.g.*, *aniyāha bagāna* 'the other gods'.

अद्रुहः—द्रुह् is an abstract noun meaning 'malice', Av. *drug* lying, deceit. द्रोघ (later द्रोह) is used in the same sense. Av. *draoga*, O.P. *drauga*. Eng. *dream* is also cognate.

ये उग्रा अर्कमानृचु-
रनाधृष्टास ओजसा ।
मरुद्भिरग्न आ गहि ॥४॥

ये । उग्राः । अर्कम् । आनृचुः ।
अनाधृष्टासः । ओजसा ।
मरुत्ऽभिः । अग्ने । आ । गहि ॥४॥

The mighty ones (*ugrā́ḥ*) that (*yé*) sang (*ā́nṛcúḥ*) their song (*arkám*), invincible (*ánādhṛṣṭāsaḥ*) in their might (*ójasā*—इतौ तृतीया) or unconquerable by force (*ójasā*—करणे तृतीया) ।

ये मरुत उग्राः तीव्राः सन्तः अर्कम् उदकम् आनृचुः अर्चितवन्तः, वर्षणेन सम्पादितवन्त इत्यर्थः । तैः मरुद्भिः इत्यन्वयः । कीदृशा मरुतः ? ओजसा बलेन अनाधृष्टासः अतिरस्कृताः । सर्वेभ्योऽपि प्रबला इत्यर्थः । अर्कशब्दस्योदकवाचित्वं वाजसनेयिन आमनन्ति—'आपो वा अर्कः' [शत° ब्रा° १०।६।५।२] इति । तन्निर्वचनञ्च त एवमामनन्ति—'सोऽर्चन्नचरत् । तस्यार्चत आपोऽजायन्त—अर्चतो* वै मे कमभूदिति । तदेवार्कस्यार्कत्वम्' [शत° ब्रा°

* SB. reads अर्चते but here evidently the reading accepted by Sāyaṇa is अर्चतो for he himself explains हिरण्यगर्भस्य सकाशादुदकमुत्पन्नम् and says further अर्चतो मत्तः. Under iii. 26. 7, however, the passage is quoted with अर्चते.

१०।६।५।१] इति। 'सः' जगत् सृष्ट्वा हिरण्यगर्भं उदकं स्रष्टुमुद्युक्तः 'अर्चन्' सत्यसङ्कल्पमहिमप्रख्यापनेन स्वात्मानं पूजयन् 'अचरत्'। तथा पूजयतो हिरण्यगर्भस्य सकाशादुदकमुत्पन्नम्। तदानीम् 'अर्चतः' मत्तः 'कमभूत्' इत्यवोचत्। तेनोदकस्यार्कंनाम निष्पन्नमित्यर्थः॥ आनृचुः। अर्चतेर् [लिटि] 'अपस्पृधेथाम्°' [६।१।३६] इत्यादिना निपातितः। प्रत्ययस्वरः। यद्वृत्तयोगाच्च निघातः। अनाधृष्टासः। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। ओजसा। 'उब्जेर्बलोपश्च'[1] [उ° ४।१९१] इत्यसुन्। नित्त्वादाद्युदात्तः[2] ॥४॥

उग्राः—mighty. Av. *ugra-*. ओजस् Av. *aojah-*, *aogah-*, Lat. *augustus* are cognate. Comp. ओजीयस Av. *aojyah-*. Super. ओजिष्ठ Av. *aojišta-*. *Cf.* य उग्रेभ्यश्चिदोजीयाञ्छूरेभ्यश्चिच्छूरतरः। भूरिदाभ्यश्चिन्मंहीयान्॥ RV. ix. 66. 17. ओजोभिरुग्राः vii. 56. 6, उग्रं व ओजः vii. 56. 7. under iii. 26. 5 S. says: उद्गच्छतीत्युग्रः; deriving it from उद्-गम् with the Uṇādi suffix र.

अर्कम्—Acc. to philologists अर्च् originally means 'to beam,' thence 'to praise,' 'to sing'; hence the noun अर्क means on the one hand 'the sun' (अर्चिः flame), on the other 'song.' Hence अर्कमानृचुः means 'sang their song.' "The Maruts are the bards of Indra." (G.) "For Indra when he slew the dragon, they sang a song and pressed Soma (v. 29. 2, 30. 6). In singing a song they created Indra-might. Though their song must primarily have represented the sound of the winds (cp. iv. 22. 4) it is also conceived as a hymn of praise (iii. 14. 4)." MACDONELL, *Vedic Mythology*, p. 80.

SKANDASVĀMIN explains the stanza thus: ये उग्रा अन्येनाप्रसह्याः क्रूरा अर्कं देवम्। कतमम्? इन्द्रम्। कुत एतत्? 'आर्चन्नत्र मरुतः सस्मिन्नाजौ' [ऋ° सं° १।५२।१५] इतीन्द्रस्य मरुत्स्तुतिसम्बन्धदर्शनात्। आनृचुः। अर्चतेः स्तुतिकर्मण इदं रूपम्।

---

1 Uj. Bh. and others read उब्जेर्बले बलोपश्च. *Mādhavīya-dhātuvṛtti* and *Prakriyā-sarvasva*, however, read उब्जेर्बलोपश्च. The comm. on AV. iii. 19. 2 shows the बले. The Kātantra school derives ओजस् from उष् 'to burn'.

2 Under 1. 11. 8, S. says: नब्विषयत्वादाद्युदात्तः.

इन्द्रं तं 'प्रहर भगवो जहि वीरयस्व' [ऐ° ब्रा° १३।१९] इत्यादिभिर्वचनैः स्तुतवन्तः। The two Mādhavas follow Sk. in his explanation of अर्कमानृचुः.

आनृचुः—आन् for the reduplicating syll. must have first been used in roots beginning with vowels followed by a conjunct nasal, as for instance आनञ्ज from अञ्ज् and then it must have extended to other roots (तस्मान्नुड् द्विहलः P. vii 4. 71).

अर्कमानृचुः—Cognate Acc. समानमञ्ज्यञ्जते vii. 57. 3 lit. they adorn themselves with like adornment; in class. Skt. तपस्तप्यते, वाचमुवाच, etc.; in Av. *yō narəm āgərəptəm āgəurvayeiti* lit. who threatens a threat against a man; in Gk. *mákhēn mákhesthai* fight a battle, *boulàs bouleúousi*, Il. xxiv. 652, take counsel; in Lat. *vitam vivere, somnium somniare* etc.

अनाधृष्टासः—अनाधर्षिताः Sk. = अनभिभूतपूर्वाः Sk. = अनाधृष्याः. क्त here has the force of तव्य of class. Skt. *Cf. Uttara Megha* 6: संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः; Eng. *untold, unnumbered*, etc. In v. 87. 2 the Maruts are described as अधृष्टासो नाद्रयः.

Skt. धृष्, Goth. *ġa-daursts*, Germ. *dreist*, Av. *daršam* adv. 'violently, very,' *daršita-* keen, O. Persian *adaršnauš* he dared, Gk. *thérsos* spirit, keenness, *tharséō* I own good courage, Lat. *fastus* pride, Eng. *dare* and the second element of *in-fest*, *mani-fest*, etc. धृषित is the alt. form of धृष्.

ओजसा—Av. *aojaṅha*. Lat. *augēre* increase, *augustus* majestic, Eng. *eke*. *Cf.* vii. 56. 6 यामं येष्ठाः शुभा शोभिष्ठाः श्रिया संमिश्ला ओजोभिरुग्राः। 'Fleetest on their way, most splendid with their splendour, close-knit to glory, strong with varied strength.' Their might also helps those whom they take under their protection. *Cf.* v. 54. 7 न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति। नास्य राय उप दस्यन्ति नोतय ऋषिं वा यं राजानं वा सुषूदथ॥ "Never is he, O Maruts, slain or overcome, never doth he decay, ne'er is distressed or harmed; his treasures, his resources, never waste away, whom, whether he be prince or Rishi, ye direct." ओजस् is explained more fully in the com. on AV. iii. 99. 2: येन बलेन चेतनस्य शरीरेऽवस्थितिर्भवति तदोजःशब्दवाच्यम्। उक्तं ह्याचार्यैः—[ओजो नामाष्टमी दशा॥] चेतनस्य तदोजस्तु केवलाश्रय इष्यते। यथा स्नेहः प्रदीपस्य यथाभ्रमशनित्विषः॥ तादृशं शरीरदार्ढ्यनिमित्तमोजः।

ये शुभ्रा घोरवर्पसः	ये । शुभ्राः । घोरऽवर्पसः ।
सुक्षत्रासो रिशादसः ।	सुऽक्षत्रासः । रिशादसः ।
मरुद्भिरग्न आ गहि ॥५॥	मरुत्ऽभिः । अग्ने । आ । गहि ॥५॥

Who, (*yé*) are brilliant (*śubhrā'ḥ*), of terrific forms (*ghorávarpasaḥ*), who are possessors of great wealth (*sukṣatrā'saḥ*) and are devourers of the malignant (*riśā'dasaḥ*),...

(ये मरुतः शुभ्रत्वादिगुणोपेतास्तैर्मरुद्भिरित्यन्वयः । शुभ्राः शोभमानाः घोरवर्पसः उग्ररूपधराः सुक्षत्रासः शोभनधनोपेताः । रिशादसः हिंसकानां भक्षकाः । 'मघम्'इत्यादिष्वष्टाविंशतिसंख्याकेषु धननामसु 'क्षत्रं भगः' [निघ॰ २।१०] इति पठितम् । शुभ्राः । 'स्फायितञ्चि॰' [उ॰ २।१३] इत्यादिना शुभेरौणादिको रक्प्रत्ययः । प्रत्ययस्वरः । घोरवर्पसः । घोरं वर्पो येषाम् [ते] । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । सुक्षत्रासः । बहुव्रीहौ 'नञ्सुभ्याम्' [६।२।१७२] इत्युत्तरपदान्तोदात्तत्वम् । 'आद्युदात्तं द्व्यच् छन्दसि' [६।२।११९] इति* तु न भवति क्षत्रशब्दस्यान्तोदात्तत्वात् । रिशन्ति हिंसन्तीति रिशाः, तानदन्तीति रिशादसः । 'सर्वधातुभ्योऽसुन्'† [उ॰ ४।१८८] । नित्स्वरेणोत्तर-पदमाद्युदात्तम् । कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते ॥५॥

शुभ्राः:—beautiful, bright from शुभ् to shine, to adorn. Arm. *surb* clean, bright. In class. Skt. the sense has been specialised.

घोरवर्पसः:—*ghorá* terrible, Goth. *gaurs* afflicted, grieved; *várpas* form. Acc. to some scholars *várpas* is cognate with *rūpá*.

---

* इत्येव All.

† सर्वधातुभ्योऽसुन्प्रत्ययः:—All. But Sāyaṇa is evidently quoting the rule, so प्रत्ययः seems to be some reader's note.

सुक्षत्रासः—*kṣatrá* from क्षि 'to rule', 'to possess' means 'dominion') Av. O. Per. *xšaθra-*. It is a new formation in Aryan from *kṣayati* (Av. *xšayeiti*, Gk. *ktáomai*) where *y* was regarded as a विकरण, otherwise we should expect क्षेत्र. From Skt. *kṣatrapa*, O. Pers. *xšaθrapāvan* comes the Eng. *satrap* through Gk. *satrapes*. Skt. *sukṣatra-*, Av. *huxšaθra*. The superl. form *huxšaθrōtəma-* is found in Av., though सुक्षत्रतम does not occur in Skt.

रिशादसः—This word is not analysed in the Pada text* and the meaning remains to a certain extent doubtful even to this day. Commentators have dissolved it into रिशत् or रिशा and अदस् or into रिश् and अदस् or into रिशत् and दस्, or into रिशत् and अस्. *Nirukta* vi. 14 explains it as रेशयदारिन् tearing to pieces those who seek to injure others or रेशयदासिन् hurling away those who seek to injure others. (यो हि रेशयति हिंसावान् भवति तस्मै त आयुधान्यस्यन्ति। रेशयदारिण इति केचिदधीयते निर्वचनम् तेषां रेशयन्तं हिंसन्तं दारयन्तीत्यर्थः। (Durga.) रिशतां हिंसतां रेशयतां वा घ्नतां घातयतां वा शत्रूणाम् असितारः क्षेप्तारो नाशयितार इत्यर्थः। तेन रिशदसितारो रेशयदसितार इति वाक्यम्। Skanda-maheśvara). Under RV. i. 2. 7 Sk. explains रिशादसम् thus हिंसकक्षेप्तारम्। रिशि हिंसायाम्। रिशतः अस्यतीति छान्दसं ह्रस्वत्वम्†। Under i. 39. 4 Sk. explains रिशादसः as हिंसितॄणां प्रतिहिंसितारः. Veṅkaṭamādhava explains it as रिशतामसि(शि)तारः. Under RV. i.2.7 Mādhava evidently derives it from दस् and explains प[रिपन्थिनामुप]क्षपयितारम् or प[ापानामुप]-क्षपयितारम्. Curiously enough, he does not explain the word in its subsequent occurrences. Mahīdhara also seems to incline towards दस्—रिशां वैरिकृतां हिंसां दस्यन्ति उपक्षपयन्ति..। यद्वा रिशान् हिंसकान् दस्यन्ति...। यद्वा रिशतः अस्यन्ति क्षिपन्ति।

Thus the exact meaning of the word is not known. The fact that it is not analysed in the Pada text, that TS. scrupulously

---

* दस्यतेरस्तेर्वा रूपमित्यनवधारणादनवग्रहः: S. on AV. vii. 82. 1.

† The reading in the Trivandrum edition is much better रिशतोऽस्यन्तीति रिशादसः। रिशदासः इति प्राप्ते छान्दसो ह्रस्वदीर्घव्यत्ययः.

refrains from using the word, replacing in one instance मरुतश्च रिशादसः by मरुतो यज्ञवाहसः and that it is included in the list of obscure words in the *Nighaṇṭu* points to some irregularity in the formation of the word. It is just possible that the components are रिशत् and दस् and by a Prākritism we have रिशादस् instead of रिशद्दस्. And the accent on the second syllable indicates that it is a governing compound like धारयत्कवि, etc. दस् does not occur as an independent word, but that need not detain us, for even अम् does not occur as an independent word. Thus रिशादस् would mean 'tearing asunder those that are injurious.' And in some passages the meaning may have been generalised into tearing down, bearing down, rushing headlong. Thus Skandasvāmin [under RV. i. 39. 4] is not far wrong in assigning the meaning हिंसितॄणां प्रतिहिंसितारः to रिशादसः, though the derivation is different. In x. 77. 3 we have रिशादसो न मर्या अभिद्यवः and in x. 78. 4 जिगीवांसो न शूरा अभिद्यवः. This shows that रिशादसः and जिगीवांसः have similar meanings and supports our explanation.

The *Nirukta* (vi. 14) reads रेशयदासिन् or रेशयदारिन्. But since रेशयदारिन् is evidently a corruption for रेशयद्दारिन् it stands to reason that रेशयदासिन् should also be रेशयद्दासिन्. And it has already been pointed out that Mādhava in his com. on RV. i. 2. 7 and Mahīdhara in his com. on VS. iii. 44 derive the word from दस्.

Among European commentators, some accept the meanings suggested by Yāska and others, while others do not. Acc. to Grassmann the word means 'those who eat violently' while Ludwig thinks 'those who eat in small bits' is the correct meaning. Aufrecht thinks रिशाद is a corruption of अरिशाद corresponding to Gk. *erikūdes* meaning very famous, glorious and used of gods and their descendants. Oldenberg translates with a query 'triumphant with riches' and remarks in a note: "Can रिशादस् be explained as a compound of रि (the weak grade of रै as गु is

the weak grade of गौ) and *शादस् from the root शद् 'to be triumphant'? Prof. Aufrecht connects रि with the Gk. *eri* (*erikudēs*, etc.); our hypothesis has the advantage of not leaving the limits of Sanskrit." Pischel (*Vedische Studien*, Vol. III, pp. 191-192) believes that the sense of the word is clear from RV. x. 77. 5 where the Maruts are described as श्येनासो न स्वयशसो रिशादसः प्रवासो न प्रसितासः परिप्रुषः where स्वयशस् and रिशादस् are epithets of श्येन, even as प्रसित and परिप्रुष् are epithets of प्रव or प्लव. And the chief characteristic of the श्येन would appear from RV. to be its speed. Further, the words श्येनासो न स्वयशसो रिशादसः correspond to अश्वासो न ये ज्येष्ठास आशवः of the very next hymn by the same author. So the primary meaning of रिशादस् must be 'tearing' from रिश् to rend, to tear. And as रिश हिंसायाम् [धा° २८।१२६] is identical with लिष गतौ [धा° २८।१२७] the sense of speed, argues Pischel, is easily obtained. Even as late as 1932 Geldner is not sure of the meaning of the word and generally translates "überlegen (?)" *i.e.*, superior. In the new edition we find 'those triumphing over their enemies'.

ये नाकस्याधि रोचने	ये | नाकस्य | अधि | रोचने |
दिवि देवास आसते।	दिवि | देवासः | आसते।
मरुद्भिरग्न आ गहि ॥६॥	मरुत्ऽभिः | अग्ने | आ | गहि ॥६॥

Who (*yé*) sit (*ā'sate*) as gods (*devā'saḥ*) in heaven (*divi*) in the light (*rocané*) above (*ádhi*) the firmament (*nā'kasya*),...

ये मरुतो नाकस्य अधि दुःखरहितस्य सूर्यस्योपरि दिवि द्युलोके रोचने दीप्यमाने ये* देवासः स्वयमपि दीप्यमाना आसते। तैः मरुद्भिः इत्यन्वयः॥ नाकस्य। कं सुखम् तद्यस्मिन्नास्त्यसावक इति बहुव्रीहिं कृत्वा पश्चात् † न अको नाक इति नञा तत्पुरुषः। 'नलोपो नञः' [६।३।७३] इति लोपो न

* So all. † पश्चान्नञ्। न अको नाक इति नञ्तत्पुरुषः—M.P.

भवति, 'नभ्राण्नपाद्°' [६।३।७५] इत्यादिना प्रकृतिभावात्। 'तत्पुरुषे तुल्यार्थ°' [६।२।२] इत्यादिनाव्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तत्वम्*।[1] प्रथमतस्तत्पुरुषं कृत्वा पश्चाद् बहुव्रीहावुत्तरपदान्तोदात्तत्वं स्यात्। अधिशब्द उपर्यर्थे। उपसर्गप्रतिरूपको निपातः। रोचने। 'रुच दीप्तौ'† [धा° १।७३२]। 'अनुदात्तेतश्च हलादेः' [३।२।१४९] इति युच्। 'चितः' [६।१।१६३] इत्यन्तोदात्तत्वम्। दिवि। 'ऊडिदम्°'[2] [६।१।१७१] इत्यादिना विभक्तेरुदात्तत्वम्। देवासः। 'आज्जसेरसुक्' [७।१।५०] इत्यसुक्। आसते। 'आस उपवेशने [धा° २।११]। अनुदात्तेत्त्वादात्मनेपदम्। झस्यादादेशः। 'अदिप्रभृतिभ्यः शपः' [२।४।७२] इति शपो लुक्। अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वम्। यद्वृत्तयोगान्न निघातः ॥६॥

नाकस्य—The derivation of this word is doubtful. The current derivation was first suggested in TS. v. 3. 7. 1: सुवर्गो वै लोको नाकः। यस्यैता उपधीयन्ते नास्मा अकं भवति। The same thing was repeated in SB. viii. 4. 1. 24: तद् यत् तमाह नाक इति। न हि तत्र गताय कस्मै चनाकं भवति। *Nirukta* (ii. 14) alternatively derives it from नी—नाक आदित्यो भवति। नेता रसानाम्, नेता भासाम्, ज्योतिषां प्रणयः। अथ द्यौः। कमिति सुखनाम। तत् प्रतिषिद्धं प्रतिषिध्येत। "न वा अमुं लोकं जग्मुषे किञ्चनाकम्।" [का°सं°२१।२]' न वा अमुं लोकं गतवते किञ्चनासुखम्। पुण्यकृतो ह्येव तत्र गच्छन्ति। Pāṇini accepts the derivation proposed in the Brāhmaṇas. Western scholars are inclined to derive the word from नम् 'to bend'.

---

* °त्वेनोदात्तत्वम्—All.

[1] This is directly against the Saṃhitās, Brāhmaṇas and Nirukta. Fortunately this is the only place where S. proposes it. See under iii. 2. 12, v. 54. 12, 81. 2, x. 130. 2. The difficulty regarding accentuation probably shows that this is not the correct derivation and is answered in the com. on AV. i. 9. 2 thus: 'नञ्सुभ्याम्' इति तु व्यत्ययेन न प्रवर्तते.

† The root is read in the Pāṇinīya Dhātupāṭha as रुच दीप्तावभिप्रीतौ च and Durga's Dhātupāṭha as द्युत शुभ रुच दीप्तौ.

[2] See p. 26, f.n. 2. "यद्यपि 'सावेकाचः°' इति सूत्रेणैतत् सिद्धं तथापि द्वितीयाबहुवचनार्थमस्य सूत्रस्य वक्तव्यत्वादनेन विशेषसूत्रेणोदात्तो विधेयः," S. on TS. i. 1. 8.

Indian commentators, generally, take नाक here in the sense of the sun (*cf.* या रोचने परस्तात् सूर्यस्य iii. 22. 3) and construe रोचने as an adj. to दिवि ; but since दिव् is fem., we should take रोचने as an independent substantive and नाक should have its usual sense of firmament.* "The world as a whole is regarded as divided into the three domains of earth, air or atmosphere and heaven or sky (दिव्), or alternatively into 'heaven and earth' (द्यावापृथिवी) which two are then considered as comprising the universe, the atmosphere being included in the sky. In some passages the vault (नाक) of the sky is added after the usual triad, and before the celestial light (स्वर्, ज्योतिः). The threefold division of the universe is reflected in a threefold division of the three elements —earth, air and sky. [त्रिरन्तरिक्षं सविता महित्वना त्री रजांसि परिभूस्त्रीणि रोचना[1] । तिस्रो दिवः पृथिवीस्तिस्र इन्वति त्रिभिर्व्रतैरभि नो रक्षति त्मना ॥ Rv. iv. 53. 5. Savitṛ encompasses with his greatness the three-fold atmospheric region, the three worlds, the three regions of light, the three heavens, the three earths he sets in motion, with three laws he himself protects us]. *Heaven is frequently called* व्योमन् *as well as* रोचन *(properly the 'luminous space' of heaven), and the dividing firmament which separates the visible upper world from the highest heaven is called, besides* नाक *'vault',* सानु *'summit'* विष्टप् 'surface' and पृष्ठ 'ridge,' and even 'ridge of the vault,' or 'summit of the vault'." (*Vedic Index*, pp. 360-361).

अधि—(O. Pers. *adiy*) preposition in the sense of 'over, on' governing the Loc. (As अधि is construed separately the rule अधिशीङ्स्थासां कर्म does not apply here.) *Cf.* दृशं रथमधि क्षमि RV. i. 25. 18, 'I have seen the chariot on the earth.' सम्राज्ञी अधि देवृषु [भव] RV. x. 85. 46, 'rule supreme over your husband's younger brothers.' ये देवा अग्रह्नो यज्ञमुषोऽन्तरिक्षेऽध्यासते TS. iii. 5. 4. 1. आ is used

* In viii. 97. 5 (यद्वासि रोचने दिवः समुद्रस्याधि विष्टपि । यत् पार्थिवे सदने वृत्रहन्तम यदन्तरिक्ष आ गहि ॥) अन्तरिक्ष is mentioned instead of नाक ; this also shows that नाक means अन्तरिक्ष.

1 त्री(णि) रोचना(नि) RV. i. 102. 8, i. 149. 4. v. 69. 1.

in the sense of अधि in i. 105. 5: अमी ये देवाः स्थन त्रिष्वा रोचने दिवः. In अध ज्मो अध वा दिवो बृहतो रोचनादधि viii. 1. 18, 'whether there comes from the earth or from the lustre of the lofty heaven,' अधि governs the Abl. So also in अतः परिज्मन्नागहि दिवो वा रोचनादधि i. 6. 9, 'come from this place, O wanderer, or from the bright realm of heaven.' It is also used with the Acc. and Instr. See MACDONELL'S, *Vedic Grammar*, p. 417.

रोचने—(from रुच् to shine) is used first as an adj. (shining) then as a noun (light, luminous sphere). Av. *raocant*, shining, O. Persian *raucah* light, Mod. Pers. *rošan* to shine, Lat. *lūcēre* to shine, Gk. *leukós* bright, shining, white. The root originally meant 'to shine' then 'to appear resplendent,' then 'to appear beautiful or good or sweet' (the sense in classical Sanskrit).

आसते—(Av. *āoṅhəntē*, Gk. *heiatai*, *hēatai*) 3. pl. pr. ind. Ā of आस् (IE. **ēs*) to sit. Acc. to philologists the root has grown out of सद् to sit. **ā-sad-te*>**ā s(d) te*>*āste*. Skt. *āste*, Gk. *hēstai*, *h* probably from *hed*, Skt. *sad*.

7

य ईङ्खयन्ति पर्वतान्	ये । ईङ्खयन्ति । पर्वतान् ।
तिरः समुद्रमर्णवम् ।	तिरः । समुद्रम् । अर्णवम् ।
मरुद्भिरग्न आ गहि ॥७॥	मरुत्ऽभिः । अग्ने । आ । गहि ॥७॥

Who (*yé*) shake (*īṅkháyanti*) the mountains (*pā'rvatān*) and come across (*tiráḥ*) the billowy (*arṇavám*) ocean (*samudrám*), ("who toss the clouds across the surging sea"—M. M.),....

ये मरुतः पर्वतान् मेघान् ईङ्खयन्ति चालयन्ति* । तथा अर्णवम् उदकयुक्तं समुद्रं तिरः कुर्वन्तीति शेषः । निश्चलस्य जलस्य तरङ्गाद्युत्पत्तये चालनं

* From the fact that the root वेप् has been used in several other passages it is clear that ईङ्ख has the sense of कम्पन here. Now

तिरस्कारः। तैर्मरुद्भिरित्यन्वयः। ईङ्खयन्ति। 'उख उखि°' [धा° १।१२५-१५२] इत्यादावीखिर्गत्यर्थः। 'हेतुमति च' [३।१।२६] इति णिच्। 'इदितो नुम् धातोः' [७।१।५८] इति नुम्। णिजन्तधातोः 'चितः' [६।१।१६३] इत्यन्तोदात्तत्वम्। शपः पित्त्वादनुदात्तत्वम्, तिङश्च लसार्वधातुकस्वरेण। धातुस्वर एव शिष्यते। पर्वतान्। 'पुर्व* पर्व मर्व पूरणे' [धा° १।५३८-५७०] । औणादिकोऽतन्†। प्रत्ययस्वरः ॥७॥

---

there is a *gaṇasūtra* कम्पने चलिः which means that the root चल् is technically regarded as मित् in the sense of shaking. The root being मित्, मितां ह्रस्वः will stand in the way of the lengthening of the च and the form will be चलयन् and not चालयन्. चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् [१०।२३] in the *Saptaśatī* is regarded as an आर्षप्रयोग. Kālidāsa writes चलयन् भृङ्गकचस्तवालकान् *Raghu* viii. 54. चलयन् is the form used by the two Mādhava's who were anterior to Sāyaṇa. In S's Bhāṣya on RV., however, चालयन् is found every time and never चलयन् (v. 45. 3, 54. 12. etc. etc.). See Śaṅkara on B. S. iii. 3. 26 and Jīvātu on *Naiṣadha* x. 96.

* पूर्व All. But see p. 27.

† As the word पर्वत occurs here for the first time Sāyaṇa is expected to refer to the relevant rule, but he contents himself with mentioning the प्रत्यय. Uṇādi iii. 110 reads: भृमृदृशियजिपर्विपच्यमितमिनमिहर्येभ्योऽतच्. Since भरत, दर्शत, यजत, पचत etc. are accented on the final syllable there is no reason to doubt that the suffix is read here as अतच् and not अतन्. One of M.M.'s MSS. shows the reading: औणादिको भृमृदृशीत्यादिना र वृषादित्वात् आद्युदात्तः अतच् which evidently stands for औणादिको भृमृदृशीत्यादिनातच्। वृषादित्वादाद्युदात्तः। On this particular MS. M.M. remarks: "It is advantageously distinguished from the rest, in so far as some very considerable omissions common to all the C MSS. have been supplied in C_1 from another source." And the wretched state of this particular passage shows that the copyist could hardly have added it himself. It would therefore appear that भृमृदृशीत्यादिनौणादिकोऽतच्। वृषादित्वादाद्युदात्तः। is the correct reading here. Under iii. 26. 4 we find 'पर्व पूरणे' इत्यस्मात् भृमृदृशीत्यादिनातच्।...व्यत्ययेनाद्युदात्तः।

वेपयन्ति—cause to swing, caus. of वेप to swing; the root is not much used in class. Skt., but is preserved in प्रेङ्ख (= झोला). वाचमीङ्खय (lit. word-moving) and समुद्रमीङ्खय (causing the Soma vessel to shake) are used in RV.

पर्वतान् तिर:—Acc. to RP. iv. 76 final न् is changed before initial त् only in the following cases: तांस्ते, सर्वांस्तान्, देवांस्त्वम्, तांस्तायस्व and आवदंस्त्वम्.

पर्वतान्—पर्व means 'joint,' hence पर्वत means 'mountain' because the hills rise tier on tier. As clouds appear exactly like mountains* from a distance पर्वत means 'cloud' also. The English word 'cloud' is from O.E. *clūd* which meant 'rock'. 'In early Middle English cloud is still used in this sense'. S. takes पर्वत in the sense of मेघ. Skandasvāmin and Veṅkaṭamādhava take the word in its usual sense: ये महाबलत्वात् समुद्रे पर्वतक्षेपणसमर्थाः SK., ये चलयन्ति पर्वतान् V.M. Here, as in many other places, Veṅkaṭamādhava's explanation is the right one. *Cf.* i. 39. 5 प्र वेपयन्ति पर्वतान् वि विञ्चन्ति वनस्पतीन्। प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा ॥ "They make the mountains rock and reel, they rend the forest-kings apart. Onward, ye Maruts, drive, like creatures drunk with wine, ye Gods, with all your company." iii. 26. 4 इन्द्रक्षो मरुतो विश्ववेदस. प्र वेपयन्ति पर्वताँ अदाभ्याः "Pourers of floods, the Maruts, Masters of all wealth, they who can ne'er be conquered, make the mountains shake." viii. 7. 4 वपन्ति मरुतो मिहं प्र वेपयन्ति पर्वतान्। यद् यामं यान्ति वायुभिः ॥ "The Maruts spread the mist abroad and make the mountains rock and reel, when with the winds they go their way." v. 56. 4 अश्मानं चित् स्वर्यं पर्वतं गिरिं प्र च्यावयन्ति यामभिः "cause e'en the heavenly stone to shake, yea, shake the rocky mountain

In the Vedas and Brāhmaṇas पर्वत is accented on the first syllable. This Uṇādi rule seems to show that in classical Sanskrit it was accented on the final syllable. This appears all the more probable from the Vārttika पर्वमरुद्भ्यां तप् v. 2. 122. 10.

* मेघमालेव यश्चायमारादपि विभाव्यते।
गिरिः प्रस्रवणः सोऽयं यत्र गोदावरी नदी ॥ उत्तररामचरित १।२४ ।

as they race along"; i. 167.8 उत च्यवन्ते अच्युता ध्रुवाणि "firm things are overthrown that ne'er were shaken"; v. 57. 3. धूनुथ द्यां पर्वतान् दाशुषे वसु नि वो वना जिहते यामनो भिया। कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृषतीरयुग्ध्वम्॥ "You shake the sky and mountains for wealth to the liberal giver; the forests bend down out of your way from fear. O sons of Pṛśni, you rouse the earth when you, O terrible ones, have harnessed the spotted deer for triumph" (M.M.); v. 60.2 वना चिदुग्रा जिहते नि वो भिया पृथिवी चिद्रेजते पर्वतश्चित्। 'Through fear of you, fierce ones, woods bow down, even the Earth trembles, even the mountain'. In v. 54. 3 they are called पर्वतच्युतः. In the *Meghadūta* [i. 14] also we find अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः* ।

तिरः—across, cross-wise from तॄ to cross, exactly as पुरः is derived from पॄ. Av. *tarō*. Both Skt. *tiraḥ*, and Av. *tarō* when used as prepositions govern the Acc. The two Mādhavas and Sāyaṇa supply कुर्वन्ति after तिरः. Max Müller takes तिरः as a prep. and translates 'across the surging sea'. Geldner supplies 'kommen' (come) and translates—'who shake the mountains and come over the billowy sea.' Since, however, समुद्रमीङ्खय occurs in RV. may we not take तिरः as an adverb and supply ईङ्खयन्ति in the second clause—अर्णवं समुद्रं तिर ईङ्खयन्ति agitate crosswise the billowy ocean? Or, may we not construe समुद्रं तिरः अर्णवम् ईङ्खयन्ति toss billows across the sea? In AV. xiii. 1. 36 we have तिरः समुद्रमति रोचसेऽर्णवम् which may be translated as 'thou shinest over the billows across the ocean'.

समुद्रम्—is not analysed in the Pada text probably owing to a doubt as to whether it should be सऽमुद्र or सम्ऽउद्र. The latter, however, is the correct analysis. The word lit. means 'a collection of waters'. उदक appears in three forms: उदक, उदन् and उदर्.

---

* Raghu II. 34 न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य and VIII. 90 द्रुमसानुमतां किमन्तरं यदि वायौ द्वितयेऽपि ते चलाः are, however, positively against the shaking of the mountains by storms.

The last stem is found in Skt. *udrá* 'otter' and Gk. *húdōr* 'water'. Skt. *ánudraḥ* 'waterless', Gk. *ánudros*.

ऊर्मिवम्—derived from ऊर्मि (ऊर्मिस् acc. to Indian commentators) 'wave' with the possessive suffix व.

8

आ ये तन्वन्ति रश्मिभि-
स्तिरः समुद्रमोजसा ।
मरुद्भिरग्न आ गहि ॥८॥

आ । ये । तन्वन्ति । रश्मिऽभिः ।
तिरः । समुद्रम् । ओजसा ।
मरुत्ऽभिः । अग्ने । आ । गहि ॥८॥

Who (*yé*) spread (*ā' tanvánti*) [through the firmament], along with the rays (*raśmíbhiḥ*) [of the sun], and, with their strength (*ójasā*), agitate (*tiráḥ*) the ocean (*samudrám*), ("who shoot with their darts (lightnings) across the sea with might"—M.M.)...

ये मरुतो रश्मिभिः सूर्यकिरणैः सह[1] आतन्वन्ति व्याप्नुवन्ति* आकाशमिति शेषः । किञ्च ओजसा स्वकीयबलेन समुद्रं तिरस्कुर्वन्ति तैः मरुद्भिः इत्यन्वयः ॥ तन्वन्ति । 'तनु विस्तारे' [धा° ८।१] । लटो 'झऽन्तः' [७।१।३] । 'तनादिकृञ्भ्य उः' [३।१।७९] । 'सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः' [परिभाषा] इति तिङ एवाद्युदात्तत्वम् । समुद्रम् । 'उन्दी क्लेदने' [धा° ७।२०] । 'स्फायितञ्चि°'[2] [उ° २।१३] इति रक् । समासे कृदुत्तरपदप्रकृतिस्वरत्वम् ॥८॥

आ...तन्वन्ति—extend to [the atmospheric region]. Skt. *tan*, Av. *tan* to stretch, extend. *Cf.* Gk. *tánumai*, Lat. *tendo*, I stretch.

रश्मिभिः—with the rays [of the sun]. As Geldner points out, after the thunderstorm the Maruts make the path clear for the

---

[1] स्वतेजोभिः Sk., रश्मिसदृशैः प्रत्यक्षमारुतैः V.M.

* व्याप्नुवन्ति—M.P. But several of M. M.'s MSS. show व्याप्नुवन्ति which is also the explanation of Sk.

sun. He compares viii. 7.8 सृजन्ति रश्मिमोजसा पन्थां सूर्याय यातवे। ते भानुभिर्वि तस्थिरे॥ "With might they drop the loosened rein so that the Sun may run his course, and spread themselves with beams of light."

9

अभि त्वा पूर्वपीतये	अभि । त्वा । पूर्वऽपीतये ।
सृजामि सोम्यं मधु ।	सृजामि । सोम्यम् । मधु ।
मरुद्भिरग्न आ गहि ॥९॥	मरुत्ऽभिः । अग्ने । आ । गहि ॥९॥

I pour out (*sṛjā'mi*) the sweet Soma juice (*somyám mádhu*) for thee (*tvā abhí*) *pūrvápītaye* (for drinking as of old). . .

हे अग्ने पूर्वपीतये[1] पूर्वकाले प्रवृत्ताय पानाय[2] त्वा त्वां प्रति सोम्यं मधु[3] सोमसम्बन्धिनं मधुररसम्* अभिसृजामि[4] सर्वतः सम्पादयामि। अतस्त्वं मरुद्भिः सह [आगहि] अत्रागच्छ। अभि। 'एवमादीनामन्तः'† [फि° ४।१४] इत्यन्तोदात्तत्वम्। 'त्वामौ द्वितीयायाः' [८।१।२३] इति त्वादेशः सर्वानुदात्तः।

---

1 कृदुत्तरपदप्रकृतिस्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वम्। अथवा...बहुव्रीहौ प्रकृत्या पूर्वपदम्... S. under i. 8. 10. इतरदेवेभ्यः पुरा पानाय। मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम्। S. under 1. 134. 1. सोमपीतये। दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम्। S. under i. 92. 18, viii. 3. 17, TS. 1. i. 5, etc.

2 This is after Sk. who adds अनादिकालप्रवृत्तं यत् पानं तदर्थम्.

3 मधुरं सोमरसम् S. under viii. 10. 4.

* Some MSS. read मधुरसम्. Under AV. iii. 14. 3 also we find मधुरसम्. Under vii. 74. 2, however, we find मधु मधुररसम्. several MSS. reading मधुरं रसम् and only one मधुरसम्. Under viii. 10. 4 we read मधुरं सोमरसम्. So मधुररसम् appears to be the correct reading.

4 Sk. rightly regards अभि as a कर्मप्रवचनीय governing त्वा acc. to अभिरभागे P. i. 4. 9, and explains सृजामि as उत्सृजामि, ददामि.

† See p. 29.

पूर्वंपीतये। पूर्वा चासौ पीतिश्च। 'पुंवत्कर्मधारय°' [६।३।४२] इत्यादिना पुंवद्भावः। सृजामि। 'सृज विसर्गे' [धा° ६।१३०]। मिपः पित्त्वादनुदात्तत्वम्। विकरणस्वरः। सोम्यम्। 'सोममर्हति यः'* [४।४।१३७]। प्रत्ययस्वरेणान्तोदात्तः। मधु। 'फलिपाटिनमि°' [उ° १।१९] इत्यादिना उ-प्रत्ययः। 'नित्' इत्यनुवृत्तेराद्युदात्तत्वम्। अन्यद् गतम्। अत्र यास्कः—'अभि सृजामि त्वा पूर्वपीतये पूर्वपानाय सोम्यं मधु सोममयं सोऽग्ने मरुद्भिः सहागच्छ'† [नि° १०।३७] इति ॥९॥

पूर्वपीतये—पीति means the same thing as पीथ. पूर्व—Av. *paurva-*, *pourva-*, O. Pers. *paruva*. पीति—O. Bulg. *piti*, Gk. *pósis*, Lat. *pōti-o*, a draught, drink. The first member of a तत्पुरुष is accented when it is dependent on an action noun in ति. V. G. S., p. 456, 2*a*; P. vi. 2. 42 °दासीभाराणाम्°.

Cf. RV. viii. 3. 7 अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः "men with their lauds are urging thee, Indra, to drink the Soma first;" viii. 45.22 अभि त्वा वृषभा सुते सुतं सृजामि पीतये, here, the Soma being shed, I pour the juice for thee to drink.

---

* सोममर्हति यः—All. But the rule is applicable in those cases where the word सोम्य is an epithet to a deity as in द्युक्षी श्लोकी स सोम्यः viii. 93.8 "bright, meet for Soma, famed in song," etc. but not in cases like सोम्यं मधु, सोम्यो रसः, etc. The relevant rule here is the next one मये च which means [the taddhita suffix य is added to सोम] also in the sense of मय. Under i. 14. 10 S. says: सोम्यम्। 'सोममर्हति यः' इत्यनुवृत्तौ 'मये च' इति यप्रत्ययः। सोमस्य विकार इत्यर्थः। 'यस्येति च' इत्यकारलोपः। प्रत्ययस्वरः। Under iii. 53. 10, etc. Sāyaṇa simply quotes the rule मये च. Under AV. iii. 14. 3 also we find 'सोममर्हति यः' 'मये च' इति सोमशब्दाद् यत्प्रत्ययः. The correct reading, therefore, is: 'सोममर्हति यः' [४।४।१३७] इत्यनुवृत्तौ 'मये च' [४।४।१३८] इति यप्रत्ययः It is perfectly clear the scribe after writing the first यः thought he had transcribed the यः of प्रत्ययः and the reading became corrupt.

† This quotation is found in a few MSS. only.

सृजामि—Skt. *sṛjati*, Av. *hərəzaiti*, *harəzaiti*; Skt. *sṛṣṭa-*, Av. *harəšta-*.

सोम्यम्—relating to or pertaining to Soma. When it is an adj. to a deity it means Soma-loving.

मधु—Gk. *méthu*, Av. *maδu*, Lith. *medù-s*. Eng. *mead*. See IHQ. Vol. XII, p. 10. "द्रवत्वसाम्यान्मृष्टत्वाच्च सोमरसो मधु इत्युच्यते।" Sk.

SŪRYA

Characteristic features.

The line सूर्य आत्मा जगतस्तस्थुषश्च leaps to the lips of every Indian when he thinks of the Vedic god Sūrya. The Sun, the noblest visible form of the gods, is regarded as the soul of all that moves and all that stands.* "Since his name designates the orb of the sun as well, Sūrya is the most concrete of the solar deities, his connexion with the luminary never being lost sight of" (MACDONELL, *Vedic Mythology*. p. 30). He is the eye† of Mitra, Varuṇa and Agni (चक्षुर्मित्रस्य वरुणस्याग्नेः). He is far-seeing (उरुचक्षाः vii. 35. 8, दूरेदृशे x. 37. 1), all-seeing (सूराय विश्वचक्षसे i. 50. 2), beholds all beings (पश्यञ्जन्मानि सूर्य i. 50. 7) and the good and bad deeds of mortals (ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान् vi. 51. 2, विश्वस्य स्थातुर्जगतश्च गोपा ऋजु मर्तेषु वृजिना च पश्यन् vii. 60. 2).

His car is drawn by one steed named Etaśa or seven mares called हरितः (सप्त स्वसारः सुविताय सूर्यं वहन्ति हरितो रथे vii. 66. 15) or seven horses (सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा। त्रिनाभि चक्रमजरमनर्वं

---

* एकैव वा महानात्मा देवता। तं सूर्य इत्याचक्षते। स हि सर्वभूतात्मा। तदुक्तमृषिणा—'सूर्य आत्मा जगतस्तस्थुषश्च' इति। तद्विभूतयोऽन्या देवताः। तदेतदृचोक्तम्—'इन्द्रं मित्रं वरुणमग्निमाहुः' इति। *Sarvānukramaṇī*, ii. 14-20.

भवद्भूतस्य भव्यस्य जङ्गमस्थावरस्य च।
अस्यैके सूर्यमेवैकं प्रभवं प्रलयं विदुः।—*Bṛhaddevatā*, i. 61.

† तच्चक्षुर्देवहितं शुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतम्॥ vii. 66. 16. That eye, placed by the gods, bright and rising, we would see for a hundred years, we would live for a hundred years.

यत्रेमा विश्वा भुवनाधि तस्थुः ॥ इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्यश्वाः । सप्त स्वसारो अभि सं नवन्ते यत्र गवां निहिता सप्त नाम ॥ i. 164. 2-3). His messenger is Pūṣan, and Varuṇa prepares his path for him (यास्ते पूषन् नावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति । ताभिर्यासि दूत्यां सूर्यस्य··· ॥ vi. 58. 3, उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ ॥ i. 24. 8).

Since the sun appears on the horizon immediately after dawn, he is described as following the Goddess Dawn even as a young man follows a lovely damsel (सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्) and Dawn is described as Sūrya's wife (वाजिनीवती सूर्यस्य योषा vii. 75. 5). "The same sequence, however, led the Vedic poets to think of the Dawn as the mother of Sūrya (अजीजनन् सूर्यं यज्ञमग्निम् vii. 78. 3) and to describe the Sun as shining from the lap of the Dawns (विभ्राजमान उषसामुपस्थात् vii. 63.3). In one passage the Dawn is described as leading a bright beautiful horse (श्वेतं नयन्ती सुदृशीकमश्वम् vii. 77. 3)." Just as in later literature the Sun is regarded as a swan, in RV. he is in several passages described as a bird.

The sun shines for the world (इशे विश्वाय), dispels darkness with his light and stirs men to activity (येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना x. 37. 4).

"Sūrya measures the days (अहा मिमानो अक्तुभिः i. 50. 7) and prolongs the days of life (प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि viii. 48. 7). He drives away sickness, disease and every evil dream"(अपामीवामप दुष्ष्वप्न्यं सुव x. 37. 4). In later literature also we find that the sun is to be worshipped for the cure of diseases (आरोग्यं भास्करादिच्छेत्). There are two things, however, which we miss in the Veda—the reference to the lotus and to the Cakravāka.

In the *Nirukta* (xii. 14) Sūrya is derived from √सृ or √सू or सु+ईर् (सूर्यः सर्तेर्वा, सुवतेर्वा स्वीर्यतेर्वा). But the word is evidently derived from स्वर् light. It is cognate with Gk. *hēlios* and Av. *hvarə*, In the Avesta also *hvarə* is the eye of Ahura Mazda and has swift horses.

Hymns i. 50, i. 115, x. 37 and x. 158 are addressed to Sūrya.

[MACDONELL, *Vedic Mythology*, pp. 30-32; MUIR, *Original Sanskrit Texts*, Vol..v, pp. 155-61,]

Hymn No. 3

SŪRYA

i. 115

म० १ सू० ११५

कुत्स ऋषिः । सूर्यो देवता । त्रिष्टुप् छन्दः ।

1

चित्रं देवानामुदगादनीकं
चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं
सूर्य आत्मा जगतस्तस्थुषश्च ॥१॥

चित्रम् । देवानाम् । उत् । अगात् । अनीकम् ।
चक्षुः । मित्रस्य । वरुणस्य । अग्नेः ।
आ । अप्राः । द्यावापृथिवी इति । अन्तरिक्षम् ।
सूर्यः । आत्मा । जगतः । तस्थुषः । च ॥१॥

The shining (*citrám*) face (*ánīkam*) of the Gods (*devā'nām*) has risen (*úd agāt*), or resplendently (*citrám*) has the face of the Gods risen (*devā'nām ánīkam úd agāt*), the eye (*cákṣuḥ*) of Mitra (*mitrásya*), Varuna (*váruṇasya*) and Agni (*agnéḥ*). Surya (*Sū'ryaḥ*) the soul (*ātmā'*) of that which moves (*jágataḥ*) and (*ca*) that which stands (*tasthúṣaḥ*), has pervaded (*ā' aprāḥ*) heaven and earth (*dyā'vā pṛthivī*) and the space between (*antárikṣam*)

'चित्रमि'ति षडृचं दशमं सूक्तं[1] कुत्सस्यार्षं[2] त्रैष्टुभं सूर्यदेवताकम् । तथा चानुक्रान्तम्—'चित्रं षट् सौर्यम्'[3] इति । [4]आश्विनशस्त्रे सूर्योदयादूर्ध्वं सौर्याणि

1 प्रथममण्डलस्य षोडशेऽनुवाके दश सूक्तानि । तत्र 'चित्रं देवानाम्' इत्यन्तिमं सूक्तम् ।

2 आर्षम् = ऋषकर्मः (composition) प्राणभृज्जाति° [५।१।१२९] इत्यञ् ; cf. B. D. आग्नेयं प्रथमं सूक्तं मधुच्छन्दस आर्षकम् ।

3 ऋषिश्चान्यस्मादृषेरवाविशिष्टः' [अनु० १२।२] इति परिभाषया 'प्र मन्दिन एकादश कुत्सः' इत्येकशततमसूक्तानुक्रमणिकातः कुत्स एवानुवर्तते । अत एव प्रकृतस्य सूक्तस्याङ्गिरसः कुत्स ऋषिः । स च प्रथममण्डलस्य नवममण्डलस्य च केषाञ्चन सूक्तानां द्रष्टा । [अनादेशे] 'त्रिष्टुप् छन्दः' [अनु° १४।६] इत्यनादेश-परिभाषया त्रिष्टुप् छन्दः ।

4 प्रातरनुवाकः पूर्वसूक्त. (पृ: ८-९) । सोमस्य सप्त संस्था भवन्ति । संस्था नामानुष्ठानप्रकार-विशेषः । ताश्च अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, अप्तोर्याम

सूक्तानि शंसनीयानि। तत्रेदं सूक्तं शंसनीयम्। सूत्रितञ्च—'चित्रं देवानां, नमो मित्रस्य' [आ° श्रौ° ६।५।१८] इति। आदितस्तिस्र ऋचः सौर्यस्य पशोर्वपापुरोडाश-हविषां क्रमेणानुवाक्याः। ततो द्वे वपापुरोडाशयोर्याज्ये। तथा च सूत्रितम् —'चित्रं देवानामुदगादनीकमिति पञ्च शं नो भव चक्षसा शं नो अह्ना' [आ° श्रौ° ३।८।१] इति। अतिमूर्तिनाम्न्येकाहे[1] शुनासीर्ये* पर्वणि च सूर्यस्य हविषः 'चित्रं

इति सप्त। तत्रातिरात्रसंस्थायामग्निष्टोमोक्थ्यषोडशिसंस्थानां दिनेऽनुष्ठानं कृत्वा रात्रौ पर्याय-त्रयानुष्ठानं करणीयं भवति। प्रतिपर्यायं च शस्त्रचतुष्टयवचनं भवति। त्रयाणां पर्यायाणां समाप्तावाश्विनं शस्त्रं शंसनीयं भवति। तस्मिन्नाश्विनशस्त्रेऽपि प्रातरनुवाकवदेवाग्न्यादयस्तिस्रो देवताः स्तूयन्ते। प्रातरनुवाकतो विशेषस्त्वसावेव यदत्र सहस्रं ततोऽधिका वा मन्त्रा आसूर्योदयं वक्तव्या भवन्ति। प्रातरनुवाके पुनः शतं ततोऽधिका वा मन्त्राः पठ्यन्ते पत्यारावतश्च पूर्वमेव समापनीयो भवति प्रातरनुवाकः।) तदुक्तमाश्वलायनेन "प्रातरनुवाक-न्यायेन तस्यैव समाम्नायस्य सहस्रावममोदेतोः शंसेत्" [आ° श्रौ° ६।५।८] इति, "प्राग्-वयसां प्रवादात्" [४।१३।१] "शतप्रभृत्यपरिमितः" [आ° श्रौ° ४।१५।२] इति च। (एतच्चा-सूर्योदयं शसनीयं भवति। तत ऊर्ध्वं सौर्याणि सूक्तानि शंसनीयानि तत्र 'चित्रं देवानाम्' इति शंसनीयम्। सूर्यदेवताकपशुयागानुष्ठाने वपायागे पशुपुरोडाशयागे हृदयादिप्रधानहविर्यागे च एतत्सूक्तप्रारम्भगतास्तिस्र ऋचः क्रमेणैकैकस्यैकैकानुवाक्या. ततो मन्त्रद्वयं च वपापुरोडाशयागयो-र्याज्यात्वेन विनियुज्यते)

[1] स्वर्गकामेण यजमानेनैकदिनावसेयोऽतिमूर्तिनामकः सोमयागोऽनुष्ठातव्यः, "अतिमूर्तिना यक्ष्यमाणो मासं सौर्याचान्द्रमसीभ्यामिष्टिभ्यां यजेत। शुक्लं चान्द्रमस्या, सौर्ययेतरम्" [आ° श्रौ° ९।८।१-२] इति। तत्र कृष्णपक्षे यदहरहः सौर्यया इष्ट्या यजनं तत्र सूर्यदेवताकं हविः 'तरणिर्विश्वदर्शतः' इत्यृचा गृहीत्वा 'चित्रं देवानाम्' इत्यृचा होतव्यम। एवं चातुर्मास्यगत-पर्वचतुष्टयगते शुनासीर्ये पर्वणि सौर्यस्य यागस्य 'चित्रम्' इत्येषा ऋग् याज्यात्वेन विनियुज्यते।

* P. notes that शुनासीरीये is the reading in three MSS. Though acc. to P. iv. 2. 32 द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृह-मेधाच्छ च both शुनासीर्य and शुनासीरीय are available, still S. appears to write शुनासीर्य here, under i. 50. 4 and in his com. on TS. Under RV. iii. 30.1, iv. 57. 5, vii. 90. 2, vii. 92. 1, 3, viii. 26. 25 and x. 160. 5 the correct reading appears to be शुनासीरीय which is also found in *Aśvalāyana Śrauta Sūtra* and other works.

देवानाम्' इत्येषा याज्या । सूत्रितञ्च—'तरणिर्विश्वदर्शतश्चित्रं देवानामुदगादनीकमिति याज्यानुवाक्याः' [आ॰ श्रौ॰ ९।८।३, २।२०।४*] इति ॥

देवानाम्[1] दीव्यन्तीति देवा रश्मयस्तेषाम्, देवजनानामेव वा अनीकम्[1] तेजःसमूहरूपं† चित्रम्[2] आश्चर्यकरं सूर्यस्य मण्डलम् उदगात्[3] उदयाचलं प्राप्तमासीत् । कीदृशम्? मित्रस्य वरुणस्य अग्नेः च । उपलक्षणमेतत् । तदुपलक्षितानां जगतां चक्षुः[4] प्रकाशकम्, चक्षुरिन्द्रियस्थानीयं वा । उदयं प्राप्य च

---

* M. and P. omit २।२०।४, but since Sāyaṇa says प्रतिमूर्तिनामप्रकाहे गुनासीरं पर्वणि च the reference is absolutely essential. See S. under i. 50.4.

[1] देवानाम् अनीकम्—देवानां रश्मीनां यदेतदुदगात् अनीकं समूहः Durga on *Nir*. xii. 6. दीव्यन्ति द्योतन्त इति देवाः किरणाः, तेषाम अनीकं मुखम् आश्रय इत्यर्थः । यद्वा, अनीकं समूहः, किरणपुञ्ज इत्यर्थः । Mah. on VS. vii. 42 देवानां रश्मीनाम् अनीकं सैन्यसदृशं मण्डलम् S. on TS. दीप्यमानबहुरश्मिरूपाणां देवानां सैन्यसदृशम S. on TB. अन्धकाररूपशत्रुशरीरात्मकस्य शत्रोर्विनाशकत्वेन देवसैन्यरूपमादित्यमण्डलम् S. on TA.

† तेजः dropped in P.

[2] चित्रम्—Acc. to Uvaṭa, Mahīdhara and others it is an adv. meaning brilliantly, wonderfully. Acc. to the *Nirukta*, Durga, Skanda, Sāyaṇa and others it is adj. to अनीकम्. सूर्यश्चात्र परापररूपेणावस्थितः सूयते ।...उदयकालादारभ्य तावदपररूपेण सूयते । चित्रमिति क्रियाविशेषणम् । यच्चित्रमुदगात् चित्रमाश्चर्यभूतम् उदगमत् । आश्चर्यं हि यत् स्वकीयेन ज्योतिषा शार्वरं तमोऽपहत्यान्येषां ज्योतिषां ज्योतिरादायोद्गच्छति । Uvaṭa on VS. vii. 42. चित्रं रक्तश्वेतादिविविधवर्णम S. on TS. i. 4. 43. 1, ii. 4. 14. 4. ताम्रारुणबभ्रुत्वादिरूपेण विचित्रम ।...तदेव वैचित्र्यम आम्नातम्—'असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः' इति । S. on TB. ii. 8. 7. 4. बहुमण्डलरूपत्वेन विचित्रम् S. on TA. 1. 7. 6. कालभेदेनारुणशुक्लादिवर्णोपेतत्वात् चित्रम् । S. on TA. 2. 13. 1. चायनीयं पूजनीयम् S. on SB. iv. 3. 4. 10 चायनीयं पूजनीयम् । यद्वा सर्वदिक्षु रश्मिप्रसारणेन विचित्रम् । S. on AA. ii. 2. 4. 7.

[3] उदगात् उदेति । छान्दसो लुङ् । Bhāskara on TS. छन्दसि लुङ्लङ्लिटः [३।४।६] इति लुङ् । S. on SB. iv, 3. 4. 10.

[4] मित्रादीनां देवानामपि चक्षुःस्थानम् । तेऽपि हि तेन प्रकाशितं पश्यन्ति । यद्वा, मित्रत्वादिपदप्राप्तिहेतुत्वाच्चक्षुरित्युपचर्यते । उपलक्षणं चैतत्, सर्वदेवतापदलाभहेतुत्वात् ।

द्यावापृथिवी दिवं पृथिवीमन्तरिक्षं च आप्राः[1] स्वकीयेन तेजसा आ समन्तादपूरयत्। ईदृग्भूतमण्डलान्तर्वर्ती सूर्योऽन्तर्यामितया सर्वस्य प्रेरकः परमात्मा जगतः जङ्गमस्य तस्थुषः स्थावरस्य च आत्मा[2] स्वरूपभूतः। स हि सर्वस्य स्थावरजङ्गमात्मकस्य कार्यवर्गस्य कारणम्। कारणाच्च कार्यं नातिरिच्यते। तथाच पारमर्षं सूत्रम्—'तदनन्यत्वमारम्भणशब्दादिभ्यः'[3] [ब्र॰ सू॰ २।१।१४] इति। यद्वा, स्थावरजङ्गमात्मकस्य सर्वस्य प्राणिजातस्य जीवात्मा। उदिते हि सूर्ये मृतप्रायं सर्वं जगत् पुनश्चेतनायुक्तं सदुपलभ्यते। तथा च श्रूयते—'योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेति' [तै॰ आ॰ १।१४।१] इति॥ आप्राः। 'प्रा पूरणे' [धा॰ २।५१]। लङि पुरुषव्यत्ययः। अदादित्वाच्छपो लुक्। जगतः। 'गमेर्द्वे च' [३।२।१७८।३] इति क्विप् द्विर्वचनं च। 'गमः क्वौ' [६।४।४०] इत्यनुनासिकलोपः। तस्थुषः। तिष्ठतेर्लिटः क्वसुः। द्विर्वचनम्।* 'शर्पूर्वाः खयः' [७।४।६१]। षष्ठ्येकवचने 'वसोः सम्प्रसारणम्' [६।४।१३१] इति

Bhāskara on TS. i.4. 43. 2. चक्षुर्मित्रादिकस्य सदेवमनुष्यस्य जगतः। आदित्योदये हि रूपाण्यभिव्यज्यन्ते। Uvaṭa मित्रादिग्रहणं च प्रदर्शनार्थम्। देवानां मनुष्याणामन्येषां च प्राणिनामित्यर्थः। SK. M. on *Nir*. xii. 16.

[1] आप्राः—आपूपुरत् [आपूरयति D.] द्यावापृथिवी चान्तरिक्षं च महत्त्वेन, तेन सूर्य आत्मा etc. *Nir*. xii. 4.

[2] अथेदानीं पररूपेण स्तौति—सूर्य आत्मा। पुरुषाभिप्रायमेतत्।...तथा च श्रुतिः—'यमेतमादित्ये पुरुषं वेदयन्ते स इन्द्रः प्रजापतिस्तद्ब्रह्म' इति। सूर्याद्वैतमनेन मन्त्रेण व्याख्यते। स सूर्यात्मत्वेनोपास्यः। Uvaṭa. जगतो जङ्गमस्य प्राणिजातस्य तस्थुषश्च स्थावरस्याप्यात्मा प्रत्यगात्मत्वेन हृदयेऽवस्थितः सूर्यः लोकत्रयम् आप्राः सर्वतः स्वचैतन्येन स्वरश्मिना च पूरितवान्। S. on TB.

[3] "तत् तस्मात् कारणात् ब्रह्मणः कार्यस्य जगतः अनन्यत्वं पृथक्सत्ताराहित्यम्। कुतः? आरम्भणशब्दादिभ्यः 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' [छा॰ उ॰ ६।१।४] 'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा' [छा॰ उ॰ ६।८।७] 'ब्रह्मैवेदं सर्वम्' [बृ॰ उ॰ ७।३] इत्यादिशब्देभ्यः।" सदाशिवेन्द्रसरस्वतीवृत्तिः।

* P. notes that all MSS. but two read द्विर्वचने.

सम्प्रसारणम्। 'आतो लोप इटि च' [६।४।६४] इत्याकारलोपः। 'शासिवसि°'[1] इति [८।३।६०] षत्वम् ॥१॥

The metre of this hymn is Triṣṭubh in which the largest no. of the hymns of RV. are composed. Hence the *Sarvānukramaṇī* [xiv. 5-6] says: [अनादेशे त्विन्द्रो देवता।] त्रिष्टुप् छन्दः। It consists of four verses of eleven syllables (चतुश्चत्वारिंशत्त्रिष्टुबक्षराणि चतुष्पदा। एकादशाक्षरैः पादैः RP. xvi. 64). An exactly similar metre is found in the Avesta also.

चित्रम्—see p. 42.

देवानाम्—see pp. 23-24.

उदगात्—3 sing root aor. ind. of गा 'to go'. जिगाति is read in the *Nighaṇṭu* in the list of गतिकर्मक roots. In the Dhātupāṭha, however, गाङ् गतौ is read in the भू class and गा स्तुतौ च छन्दसि in the हु class. As गा became obsolete in classical Skt., Pāṇini had to frame the rule इणो गा लुङि ii. 4. 45 to explain this form.

अनीकम्—(Av. *ainīkəm*, *cf.* mod. Pers. *peš-ānī*) face, thence front of troops, troops, multitude. Most probably it is derived from अन् to breathe, though the first element has been regarded as cognate with नि of निज and the second element with अक् of अक्षि. Uvaṭa explains अनीकम् as face. Mādhava says: अनीकं चक्षुः, आदित्ये हि सर्वे देवा वसन्तीति. S. evidently borrows his explanation from Sk. who says: देवानाम् अनीकं समूहं रश्मिसमूहमित्यर्थः. The mention of चक्षुः in the second pāda appears to support Uvaṭa's explanation. Mādhava in his com. on SV. also says: अनीकशब्दो मुखवचनः। खड्गानीकं खड्गस्य मुखमुच्यते। *Cf.* अग्निर्वै देवतानामनीकम्, सेनाया वै सेनापतिरनीकम् SB. 5.3.1.1.

[1] वसि in the rule can only mean the root वस्, so the relevant rule here is आदेशप्रत्यययोः P. viii. 3. 59. But S. probably thought that with इक् the form would be उषि and so generally takes वसि in the sense of the suffix क्वसु though it is difficult to understand how वसि with indicatory इ can stand for क्वसु with the indicatory उ. By a curious irony of fate, S. interprets the rule correctly under iii. 58, 4, but makes a mistake in another direction.

चक्षुः—In the *Nighaṇṭu* (*Nir.* iii. 13) चष्टे is read in the list of roots meaning 'to see'. In the Dhātupāṭha, however, the sense is changed and we find चक्षिङ् व्यक्तायां वाचि. The original meaning of the root appears to have been अभिव्यक्ति. Thus, on the one hand it means चाक्षुषी अभिव्यक्ति, on the other वाचिकी अभिव्यक्ति (*cf.* S. on RV. iii 22. 2: अभिचक्षणावागुवाच्यर्थं धातुरत्राभिव्यक्तिमात्रे वर्तते). So चष्टे means to appear, to see, to show, to speak. In AV. *cašte* means to teach, Av. and O. Pers. *cašman* eye, Mod. Persian *cašm* eye, Beng. *caśmā* spectacles. चक्षुः orig. 'seeing', thence brightness, countenance, eye.

चक्षुर्मित्रस्य वरुणस्याग्नेः:—The sun is the luminous substance *par excellence* and consequently he is connected with the देव's, the shining ones *par excellence*. In the *Gītā* (xi. 12) the universal form of the Almighty is described thus:

दिवि सूर्यसहस्रस्य भवेद् युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥

So in the first line the sun has been described as the face of the gods, here he is regarded as the universal eye—the eye of Mitra, Varuṇa, Agni, *i.e.*, of the whole universe. In the Puruṣasūkta, the sun is said to have sprung from the eye of the Almighty.

आप्रा द्यावापृथिवी अन्तरिक्षम्—*cf.* iv. 14. 2 ऊर्ध्वं केतुं सविता देवो अश्रेज्ज्योतिर्विश्वस्मै भुवनाय कृण्वन् । आप्रा द्यावापृथिवी अन्तरिक्षं वि सूर्यो रश्मिभिश्चेकितानः ॥ 'God Savitṛ has planted his banner on high spreading light for all the world. Sūrya has filled the heaven and earth and firmament making himself known by means of his rays.'

आप्राः[1]—3 sing. s-aor. ind of प्रा to fill. *a- prā-s-t*>*aprās*>*aprāḥ* the ending being dropped. V. G.S. § 144. 5. Similarly we have अजैः (RV. viii. 40. 11, ix. 72. 5) from जि, अहाः (R.V. i. 116. 3) from हा and in epic Skt. भैः from भी (*cf.* मा भैः). Sāyaṇa explains

---

1 'तिङां भवन्ति' इति तिपः सिबादेशः । व्यत्ययेन मध्यमः । S. on x. 74. 2, x. 106. 11, x. 1. 1. इति व्यत्ययेन मध्यमः । x. 127. 2.

अप्राः correctly—आगमानुशासनस्यानित्यत्वात् इडागमो न क्रियते. In classical Skt. an ई is inserted between the *s* the sign of the aor. and the ending *t*. *Cf. Bhaṭṭi* xv. 68 अप्रासीद्दिषुभिर्मुखम्. Acc. to Pāṇini ईट् (अस्तिसिचोऽपृक्ते vii. 3. 96) is dropped by the next rule बहुलं छन्दसि.

प्रा is an extended form of पॄ to fill. The root is found in Gk. *plēto* (:Skt. अप्रात्), Lat. *plēvi* (:Skt. पप्रौ), Lat. *-plētus* (Skt. प्रात:)), Lat. *plēnus* (=Skt. प्राण:, full).

"The principal peculiarity of the older language in regard to inflection is the frequent absence of ई in the endings of the 2nd and 3rd sing. act., and the consequent loss of the consonant-ending, and sometimes of root-finals......... If the root ends in a vowel, only the consonant of the ending is necessarily lost: thus *aprās* (for both *aprās-s* and *aprās-t*) from √प्रा." WHITNEY, *Sanskrit Grammar*, §888-889.

द्यावापृथिवी—The Devatā-Dvandvas occupy an intermediate stage between mere juxtaposition and fully formed compounds. Here each member is used in the dual and each member retains its independent accent. That these were felt to be loosely formed compounds is proved by the fact that sometimes a word or words intervene between the members of the compound. *Cf.* ii. 12. 6 द्यावा चिदस्मै पृथिवी नमेते.

द्यावा is the Nom. du. of द्यौ heaven (class. द्यावौ like गावौ). Skt. *dyauḥ*, Gk. *Zeus*; Skt. *dyām*, Gk. *Zēn*.

पृथिवी (:Gk. *plātaia*) for पृथ्वी Av. *pərəθwī*, fem. to पृथु lit. the broad one, *cf.* मही (lit. the great one), उर्वी (lit. the wide one), etc. *Cf. Nir.* i. 14. 5 प्रथनात् पृथिवीत्याहुः। क एनामप्रथयिष्यत्, किमाधारश्चेति। अथ वै दर्शनेन पृथुरप्रथिता चेदप्यन्यैः. In SB. xi. 5. 6. 3 mention is made of इमां पृथिवीं वित्तेन पूर्णाम् and so the earth came to be known as वसुमती, वसुन्धरा, वसुधा etc.

अन्तरिक्षम्—lit. situated between [heaven and earth], from *antári* the loc. sing. of अन्तर् between and क्षि to dwell (अन्तरा क्षान्तं द्यावापृथिव्योर्मध्ये वर्तमानमाकाशम् S. on i. 52. 13). सह हीमावग्रे लोकावासतुः तयोर्वियतोर्योऽन्तरेणाकाश आसीत् तदन्तरीक्षमभवत् ईक्षं हैतन्नाम ततः पुरान्तरा वा

इदमीक्षमभूदिति तस्मादन्तरिक्षम्। SB. vii. 1. 2. 23; तद यदस्मिन्निदं सर्वमन्त-स्तस्मादन्तर्यक्षम्। अन्तर्यक्षं ह वै नामैतत् तदन्तरिक्षमिति परोक्षमाचक्षते। J. U. B., i. 20. 4 *अन्तरेव वा इदमिति तदन्तरिक्षस्यान्तरिक्षत्वम्। Tā. B. x. 14. 2. अन्तरिक्ष-क्षि-त् means 'dwelling in the atmosphere'. Under TS. i. 9. 2 S. says: अन्तरिक्षशब्दः पृषोदरादिः। सर्वेचागतिक आद्युदात्तो वृषादिः। अगतिको मध्योदात्तः पृषोदरादिरिति द्रष्टव्यम्। As the first member retains its independent accent, the word is to be included in the दासीभार group P. vi. 2. 42. Neither द्युक्ष nor अन्तरिक्ष is analysed in the Pada-text.

सूर्य आत्मा जगतस्तस्थुषश्च—this has become proverbial. In vii. 60. 2 Sūrya is described as विश्वस्य स्थातुर्जगतश्च गोपाः; *cf.* vii. 101. 6: स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च। तन्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः॥ 'He is the impregnator bull of all, in him is the soul of all that moves and all that stands. So may this rite protect me for a hundred autumns. Do ye preserve us evermore with blessings.' सूर्यः—from स्वर् light, *cf.* Gk. *hēlios* which became हेलिः in late Skt. In TS. ii. 2. 10. 4 सूर्य is derived from सुवीर्य. तं (*i.e.* इन्द्रम् देवा अब्रुवन् सुवीर्यो मर्या यथा गोपायत इति। तत् सूर्यस्य सूर्यत्वम्। BD. vii. 128 says: सूर्यः सरति भूतेषु सु वीरयति तानि वा। सु ईर्यत्वाय यात्येष सर्वकार्याणि सन्दधत्॥ Samkara says in his com. on BU. v. 15. सूर्यं सुष्ठु ईरयते रसान् रश्मीन् गुणान् धियो वा जगतः। Pāṇini mentions सूर्य in the list of irregularly formed words with the suffix क्यप्. His commentators state that the root is सृ or सू. The close connexion with सूय of सविता as also passage like नूनं जनाः सूर्येण प्रसूताः RV. vii. 63. 4 led to the belief that सूर्य might have come from √सू. The सूर्यसिद्धान्त (xii. 35) also mentions this popular derivation in the stanza: हिरण्यगर्भो भगवानेषच्छन्दसि पठ्यते। आदित्यो ह्यादिभूतत्वात् प्रसूत्या सूर्य उच्यते॥ (IC., April 1936, pp. 615-6).

आत्मा—O.E. *æθm* breath. *Cf.* Gk. *atmos* smoke, vapour. Similarly, the Gk. word for 'soul' *pneuma* originally meant 'wind', 'air', 'breath' and Lat. *anima* meaning 'rational soul' originally meant 'air, breeze' and is cognate with Skt. *anilaḥ* and Gk. *anemos*. In the Nirukta आत्मन् is derived from अत् or आप्.

आत्मा चततेर्वा। आप्तेर्वा। अपि वाप्त इव स्यात्। Saṁkara in his com. on AU. i. 1 says: आत्मा आप्नोतेरततेर्वा which is explained by Ānandagiri thus: व्याप्त्यर्थे, आदानं च समुच्चिनोति। तथाच स्मृति: :—

यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिति।

यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते॥ इति।

जगत:—lit. moving, pr. part. of गा to go, hence the fem. is जगती. This was not recognised by Kātyāyana who framed the Vārttika द्युतिगमिजुहोतीनां द्वे च.

तस्थुष:—Gen. Sing. of तस्थिवस् perf. part. of स्था, one of the very few perfect participles that have come down to classical Skt.

ŚB. vii. 5. 2. 23 explains this stanza thus: चित्रं देवानामुदगादनीकमिति। असौ वा आदित्य एष पुरुष:, तद्देतच्चित्रं देवानामुदेत्यनीकम्। चक्षुर्मित्रस्य वरुणस्याग्ने: इति। उभयेषां हैतद्देवमनुष्याणां चक्षु:। आप्रा द्यावापृथिवी अन्तरिक्षमिति। उद्यन् वा एष इमाँल्लोकानापूरयति। सूर्य आत्मा जगतस्तस्थुषश्चेति। एष ह्यस्य सर्वस्य आत्मा। यच्च जगद् यच्च तिष्ठति।

2

सूर्यो देवीमुषसं रोचमानां	सूर्यः। देवीम्। उषसम्। रोचमानाम्।
मर्यो न योषामभ्येति पश्चात्।	मर्यः। न। योषाम्। अभि। एति। पश्चात्।
यत्रा नरो देवयन्तो युगानि	यत्र। नरः। देवऽयन्तः। युगानि।
वितन्वते प्रति भद्राय भद्रम् ॥२॥	विऽतन्वते। प्रति। भद्राय। भद्रम् ॥२॥

The sun (*sū'ryaḥ*) follows (*paścā't abhi eti*) the resplendent (*rócamānām*) Goddess (*devī'm*) Uṣas (*uṣásam*), as a youth (*máryaḥ ná*) a young maiden (*yóṣām*), where (*yátra*) pious (*devayántaḥ*) men (*náraḥ*) perform (*vitanvaté*) prayers and sacrifices (*yugā'ni*) to the auspicious [divinity] (*bhadrám práti*) for their well-being (*bhadrā'ya*).

सूर्यो देवीम् दानादिगुणयुक्तां रोचमानाम् दीप्यमानाम् उषसं पश्चादभ्येति उषसः प्रादुर्भावानन्तरं तामभिलक्ष्य गच्छति। तत्र दृष्टान्तः—मर्यो न योषाम्।

यथा कश्चिन्मनुष्यः शोभनावयवां गच्छन्तीं युवतिं स्त्रियं सततमनुगच्छति तद्वत्। यत्र यस्यामुषसि जातायां देवयन्तः देवं द्योतमानं सूर्यं यष्टुमिच्छन्तो नरः यज्ञस्य नेतारो यजमानाः। युगानि। युगशब्दः कालवाची। तेन च तत्र कर्तव्यानि कर्माणि लक्ष्यन्ते, यथा दर्शपूर्णमासाविति। अग्निहोत्रादीनि कर्माणि। वितन्वते विस्तारयन्ति। यद्वा देवयन्तः देवयागार्थं धनमात्मन इच्छन्तो यजमानपुरुषा युगानि हलावयवभूतानि कर्षणाय वितन्वते प्रसारयन्ति। तामुषसमनुगच्छतीत्यर्थः। एवंविधं भद्रम् कल्याणं सूर्यं प्रति भद्राय कल्याणरूपाय कर्मफलाय। स्तुम इति शेषः। यद्वा देवयन्तः देवकामा यजमाना युगानि युग्मानि भूत्वा पत्नीभिः सहिताः सन्तो भद्रं कल्याणमग्निहोत्रादिकं कर्म भद्राय तत्फलार्थं प्रति प्रत्येकं यस्यामुषसि प्रवृत्तायां वितन्वते विस्तारयन्ति॥ मर्यः। 'मृङ् प्राणत्यागे' [धा° ६।११९]। 'छन्दसि निष्टर्क्य°' [३।१।१२३] इत्यादौ यत्प्रत्ययान्तो निपात्यते। 'यतोऽनावः' [६।१।२१३] इत्याद्युदात्तत्वम्। युगानि। युजेः कर्मणि घञ्। 'युगशब्दः कालविशेषे रथाद्युपकरणे च' इत्युञ्छादिषु [६।१।१६०ग] पाठाद् गुणाभावोऽन्तोदात्तत्वञ्च। वितन्वते। 'तनु विस्तारे' [धा° ८।१]। 'तनादिकृञ्भ्य उः' [३।१।७९]। 'सह°' [२।१।४] इति योगविभागात् तिङोपसर्गस्य समासे सति 'समासस्य' [६।१।२२३] इत्यन्तोदात्तत्वम्॥२॥

देवीम्—see p. 24. देवस्य पत्नी देवी। पुंयोगादाख्यायाम् [४।१।४८] इति ङीष्। S. under iii. 20.5.

उषसम्—also उषासम्, Av. *usāoṅhəm* from वस् to shine. Skt. *ucchati,* Av. *usaiti*. *Cf.* Aeolic Gk. *āúōs* (for **āus-ōs*), Lat. *aur-ōr-a* (for* *ausōs-a*). Lith. *auszra* red of dawn. Skt. वसन्त, वासर and Eng. *eas-t* are cognate. Gk. *ēōs hrodo-daktulos* 'rosy-fingered dawn'.

रोचमानाम्—pr. part. of रुच् to shine; root aor. part. रुचान.

मर्यो—man, young man, wooer. *Cf. marianni,* a word applied to the warrior of the Mitani. मर्यक—a little man, Middle Persian *mērak*; Gk. *meirax* boy, maiden. मर्यो न योषाम्—*cf.* वधूयुरिव

यौषणाम् iii. 52. 3; वि यो ररप्श ऋषिभिर्नवेभिर्वृक्षो न पक्वः सृण्यो न जेता। मर्यो न योषामभि मन्यमानोऽच्छा विवक्मि पुरुहूतमिन्द्रम्। RV. iv. 20. 5. "Him who is sung aloud by recent sages, like a ripe-fruited tree, a scythe-armed victor, I, like a bridegroom thinking of his consort, call hither Indra, him invoked of many."

योषाम्—The stem was originally योषन् (corresponding to वृषन्) of which the Nom. sing. was योषा and the Nom. pl. योषणः (weak form for strong). The Acc. sing. ought to be योषणम् but it is not actually found. The Nom. sing. योषा coupled with the fact that the word meant 'young woman' gave rise to the idea that the stem ended in *ā*, so that an *ā*-stem योषा came into existence from which we have योषाम् (Acc. sing.), योषे, योषाः. On the other hand, the Acc. योषणम् was turned into the fem. योषणाम् and gave rise to the stem योषणा.

"योषन्, योषणा, योषा, योषित्, all denote 'young woman,' 'maiden,' as an object of affection, and as meet for wedlock. So these terms are often opposed in the Brāhmaṇas to वृषन् 'male', in the general sense of 'female', but they also occur in the sense of 'wife,' or 'daughter,' or merely 'girl'." *Vedic Index*, Vol. II, p. 196. "स्त्री is the ordinary word in poetry and prose for 'woman', without special reference to her as a wife or as a maiden. नारी has the same sense, but disappears in later prose, while ग्ना refers only to the wives of the gods and योषित्, with its cognate words, denotes the young woman as ripe for marriage." *Ibid*. p. 485. Lat. *Jūnō* is from the same root. Under iii. 52. 3, iii. 56. 5, etc. S. says युष भजने इति सौत्रो धातुः. Under iii. 33. 10 he says: यौतीति योषा। वृषादित्वादाद्युदात्तः. Note that *yóṣā*, *yóṣan* and *yóṣaṇā* are accented on the first syllable, while *yoṣít* is accented on the second.

पश्चात्—Abl. adv. Av. *paskāt*, O. P. *paśā*[1]. The Inst. *paścā* (Av. *paśca*, O. P. *pasā*[1]) is also used in RV. पश्चात् with verbs of

[1] In O. P. the Inst. sg. in आ and the Abl. sg. in आत् fell together.

motion, governs the Acc. अपरा पूर्वामभ्येति पश्चात् RV. i. 124. 9, विदांत् विपाशमभ्येति पश्चात् x. 117. 8, न नः पश्चादघं नशत् ii. 41. 11 no sin shall reach us from behind. यन्तं पश्चाच्छब्दोऽनुदेति BU. ii. 1. 10. Such use, though rare, is sometimes found in class. Skt.

The sense of *cd.* is not quite clear. Skandasvāmin explains: यत्र नरो मनुष्या देवयन्तः देवम् इममेव सूर्यं यष्टुमिच्छन्तः। युगानि वितन्वते। युगशब्दः कालवचनः सामर्थ्यादग्निहोत्रकालेषु वर्तते। प्रतीत्यनेन सम्बध्यते। अग्निहोत्रकालान् प्रति, अग्निहोत्रकालेषु [इति यावत्]। वितन्वते विततं कुर्वन्ति। भद्राय तत्फलाय। भद्रम् अग्निहोत्रलक्षणं कर्म। यदा तेषु कालेषु मनुष्या अग्निहोत्रं जुह्वति तदा सूर्यं उषसं पश्चादभ्येतीति समस्तार्थः।

Mādhava's explanation is as follows: मनुष्या देवान् कामयमाना अग्निहोत्रादीनि कर्माणि प्रतिवितन्वते भद्रं च भद्राय कुर्वन्ति। यदा कर्षणार्थं युगानि युञ्जन्तीति। भद्रम् here evidently means कल्याणमग्निहोत्रादिकम् कर्म and भद्राय means तत्फलाय.

Hillebrandt understands प्रतिवितन्वते with भद्रम् and construes भद्रं[1] (nom.) भद्राय प्रतिवितन्वते—a happy generation spreads itself out against another happy generation (*breitet sich* ein glückliches Geschlecht einem glücklichen *entgegen*). Oldenberg translates: 'Where men revering God lay out the yoke of the offering (regarded as a vehicle or something like it) for the glorious (Sūrya) to the glorious' (*cf.* प्रति वरम्)[2]. Geldner translates: 'When men devoted to God lay the yokes, ya, a fortunate one, for the auspicious deed.' He explains: "With the laying of the yoke begins the day's work of the countryman. *Yuga* 'yoke' here means day's work, epoch, time. Every morning the pious begin a new epoch or a new day's work. The same imagery in x. 101. 3[3]. *Cf.* also

---

[1] भद्रं युगं भद्राय युगाय.

[2] Old. adds in a footnote: Or is प्रति to be construed with वितन्वते and भद्रम् regarded as an adv.?

[3] युनक्त सीरा वि युगा तनुध्वम् x. 101. 3, 'harness the ploughs, extend the yokes'. We may add also x. 101. 4 सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् 'The poets harness the ploughs, they extend severally the yokes'. "In this (x. 101. 3) and the following

1. 113. 16d[1]. **प्रति in the sense of constant repetition. युगम् is to be understood after भद्रम्.**"

Griffith follows Ludwig and translates: "Where pious men extend their generations, before the Auspicious One for happy fortune" with the note that it reminds one of Shelly's

"Man, the imperial shape, then multiplied
His generations under the pavilion
Of the Sun's throne."—*Ode to Liberty*, ll. 31-3.

The clue to the sense of युगानि would, however, appear to be furnished by v. 47. 6: वि तन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयन्ति 'for him, they spread out prayers and acts of worship, the mothers weave clothes for their son.' Thus in our stanza युगा means उभया, *i.e.*, धियः and अपांसि 'prayers and sacrifices'.

यत्रा—metrical lengthening. Av. *yaθrā*. Pāṇini's rule is: ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् vi. 3. 133.

नरः—Nom. pl. of नृ. Av. *narə*, Gk. *anēr* man, Old Lat. *nero* strong, *nēria* bravery, Lat. *Nero*. The Acc. sing. *naram* was regarded as *nara-m* and the *a*-stem *nara* came to be fully declined. Earlier नर, like विद्या, कृत्या etc., was found only at the end of compounds.

देवयन्तः (Pp. देवऽयन्तः)—Nom. pl. of the pr. part. of the denom. देवय from देव. Before the denom. suff. य *a*-stems generally remain unchanged in RV. न च्छन्दस्यपुत्रस्य P. vii. 4. 35. For देव Pāṇini

---

stanzas sacrifice is figuratively spoken of as ploughing, sowing and reaping." GRIFFITH.

[1] उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति ।
आरैक् पन्थां यातवे सूर्यायागन्म यत्र प्रतिरन्त आयुः ॥

"Arise! the breath of life has come to us. Darkness has disappeared and light is coming. She has left a path for the Sun to travel. We have arrived where men prolong their lifetime." Geldner adds in a note "*i.e.*, where a new period of life, a new day begins."

has the rule देवसुम्नयोर्यजुषि काठके vii. 4. 38. (See P. vii. 4. 35-39.) With the suffix उ the form will be देवयु which also means 'devoted to the gods'. देवयते। 'देवानात्मन इच्छति' इति देवयन्। क्यच्। 'क्यचि च' [७।४।३३] इतीत्वं न भवति, 'नच्छन्दस्यपुत्रस्य' [७।४।३५] इति निषेधात्। 'अश्वाघस्य°' [७।४।३७] इत्यात्वविधानादीत्वनिषेधे प्राप्तस्य दीर्घस्याप्येष निषेध इत्युक्तम्। 'शतुरनुमो नद्यजादी' [६।१।१७३] इति विभक्तेरुदात्तत्वम्। अत्र क्यचश्चित्त्वादन्तोदात्तत्वम्। शपः पित्त्वादनुदात्तत्वम्, शतुश्च लसार्वधातुक-स्वरेण। उभयोः क्यचा सहैकादेशे 'एकादेश उदात्तेनोदात्तः' [८।२।५] इत्युदात्तत्वम्। तस्मादन्तोदात्तात् परस्या विभक्तेः "शतुरनुमो नद्यजादी" [६।१।१७३] इत्युदात्तत्वम्। S. under i. 15. 12.

युगानि—We take युगानि here in the sense of उभयानि referring to धियः and अपांसि. Skt. *yugá-m*, Lat. *jugu-m*, Gk. *zugó-n*, Eng. *yoke*. The word orig. meant 'yoke', then 'couple, pair', then a race of men, generation (because it is *united* by common descent) and then an age of the world (the sense is shifted to that of time).

वितन्वते—तन् means to stretch. वि-तन् to stretch out, to spread out, to carry out, perform, accomplish. Skt. *tan*, Av. *tan*, Mod. Persian *tanīdan* to spin, Lat *tenēre* to hold, *tendere* to stretch, to extend, Gk, *teinein* (from **ten-jō*) to stretch, strain, extend.

प्रति भद्राय भद्रम्—may be construed in two ways: भद्रं सूर्यं प्रति भद्राय or भद्रं प्रति भद्राय सूर्याय. If प्रति be taken with वितन्वते (as it is construed with भइच्चत in प्रति भद्रा भइच्चत गवां सर्गा न रश्मयः iv. 62. 5) भद्रम् will have to be taken as an adv. For भद्र see p. 46.

भद्रम्—भद्र is very aptly explained in the *Sāṭyāyana Brāhmaṇa*: यद्वै पुरुषस्य वित्तं तद् भद्रम्, गृहा भद्रम्, प्रजा भद्रम्, पशवो भद्रम्. Later on धर्म, अर्थ, काम and मोक्ष were regarded as the four भद्र's (चतुर्भद्रम्). In the *Praśnottararatnamālikā* (St. 27) the four *bhadras* are thus enumerated:

दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम्।
वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्भद्रम्॥

It is interesting to note in this connexion that in

Bhavabhūti's prayer to the sun (Māl. i. 5) also the word भद्र occurs twice:

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते धुर्यां लक्ष्मीमिह मयि भृशं धेहि देव प्रसीद ।
यद् यत् पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे भद्रं भद्रं वितर भगवन् भूयसे मङ्गलाय ॥

The advanced student is advised to read Mayūrakavi's *Sūryaśataka* and Paṇḍitarāja Jagannātha's *Sudhālaharī* along with this hymn to the sun.

भद्रा अश्वा हरितः सूर्यस्य	भद्राः । अश्वाः । हरितः । सूर्यस्य ।
चित्रा एतग्वा अनुमाद्यासः ।	चित्राः । एतऽग्वाः । अनुऽमाद्यासः ।
नमस्यन्तो दिव आ पृष्ठमस्थुः	नमस्यन्तः । दिवः । आ । पृष्ठम् । अस्थुः ।
परि द्यावापृथिवी यन्ति सद्यः ॥३॥	परि । द्यावापृथिवी इति । यन्ति । सद्यः ॥३॥

The auspicious (*bhadrā'ḥ*) bay (*haritaḥ*) steeds (*áśvāḥ*) of the sun (*sū'ryasya*), the brilliant (*citrā'ḥ*) Etagvas (*étagvāḥ*) having been greeted with gladness (*anumā'dyāsaḥ*) have ascended (*ā' asthuḥ*) the back (*pṛṣṭhám*) of Heaven (*diváḥ*) receiving the homage of all (*namasyántaḥ*). In one day (*sadyáḥ*) they traverse (*pári yanti*) Heaven and Earth (*dyā'vā-pṛthivī'*).

भद्राः कल्याणाः । अश्वा एतग्वा इत्येतदुभयमश्वनाम । तत्रैकं क्रियापरं योजनीयम् । अश्वाः तुरगा व्यापनशीला वा हरितः हर्तारः चित्राः विचित्रावयवाः अनुमाद्यासः अनुक्रमेण सर्वैः स्तुत्या मादनीयाः । एवम्भूताः सूर्यस्य एतग्वाः अश्वाः । यद्वा एतं गन्तव्यं मार्गं गन्तारोऽश्वाः । एतं शबलवर्णं* वा प्राप्नुवन्तोऽश्वाः । नमस्यन्तः अस्माभिर्नमस्यमानाः सन्तो दिवः

* Peterson adds नीलवर्णं after शबलवर्णम्. One of M.M.'s MSS. reads शबलवर्णं नीलवर्णं वा प्राप्नुवन्तोऽश्वाः. In the com. on TS. ii.6.7.1 एतग्वाः is explained as अश्वाः, अश्वाः as आशुगामिनः and हरितः as नीलवर्णाः. Under RV. vii. 70. 2 S. explains एतग्वा as अश्वौ and under viii. 70.7 as एतवर्णौ अश्वौ.

अन्तरिक्षस्य पृष्ठम् उपरिप्रदेशं पूर्वभागलक्षणम् आ चक्षुः आतिष्ठन्ति। यद्वा हरितो रसहरणशीला रश्मयो भद्रादिलक्षणविशिष्टा दिवः पृष्ठं नभःस्थलम् आतिष्ठन्ति। आस्थाय च द्यावापृथिवी द्यावापृथिव्यौ सद्यः तदानीमेव, एकेनाह्ना परियन्ति परितो गच्छन्ति, व्याप्नुवन्तीत्यर्थः॥ अश्वाः। 'अशू *व्याप्तौ' [धा° ५।१८]। 'अशिप्रुषि°'† [उ° १।१५१] इत्यादिना क्वन्। एतग्वाः। 'इण् गतौ' [धा° २।३५]। 'असिहसि°'‡ [उ° ३।८६] इत्यादिना कर्मणि तन्प्रत्ययः। गमेरौणादिको भावे ड्वप्रत्ययः§। एतम् एतव्यं प्रति ग्वो गमनं येषां ते तथोक्ताः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। अनुमाद्यासः। 'मदि स्तुतौ¶' [धा° १।१३]।

* This is the reading in the *Kṣīrataraṅgiṇī* and Durga's Dhātupāṭha. Maitreya, Mādhava and Bhaṭṭoji read: अशू व्याप्तौ सङ्घाते च.

† Kṣīrasvāmin, Ujjvaladatta, Bhaṭṭoji and others read अशूप्रुषि°. Bhoja in his *Sarasvatī-Kaṇṭhābharaṇa* (ii. 3. 128) अशूख्रुषि°. The printed *Prakriyā-sarvasva* (i. 140) reads अशुप्रुषि° where शु appears to be an error for शू.

‡ Kṣīra., Ujj., Bhaṭṭoji and others read: हसिमृग्रिण्वामि-दमिलूपूधुर्विभ्यस्तन्. Bhoja, Nārāyaṇa and others also exclude अस. Sāyaṇa, however, always quotes the rule with असि added at the beginning. This reading is decidedly better, for though अस्त occurs in the Veda alone still the Uṇādisūtras take cognisance of many words which we find only in the Vedas at present.

§ No such suffix is found in the Pañcapādī or Daśapādī Uṇādisūtras.

¶ The root मन्द is read in the Dhātupāṭha as मदि स्तुतिमोदमदस्वप्न-(कान्ति)गतिषु and S. quotes the full pāṭha under i. 9. 2, 10. 11, 26. 5. Under i. 9. 3 he says: 'मदि स्तुति°' इत्यस्य, and under iii. 47. 4 मदि स्तुत्यादिष्वित्यस्य. S. appears to derive अनुमाद्य everywhere in RV. from this root. But then the form would be अनुमान्द्य and not अनुमाद्य. The difficulty can, however, be got over with the help of *paribhāṣā* 94 आगमशास्त्रमनित्यम् (see S. under i. 109. 3, iii. 47.4), etc. In the com. on TB. he says: रथयोजनम् अनु हृष्यन्; evidently deriving the word from मदी हर्षे. Sk. says: मदतिरर्चनकर्मा। अनुष्टुत्याः.

अस्मात्ण्यन्तात् 'अचो यत्' [३।१।९७]। 'यतोऽनावः' [६।१।२१३] इत्याद्युदात्तत्वम्। नमस्यन्तः। 'नमोवरिव°' [३।१।१९] इति पूजार्थे क्यच्। व्यत्ययेन कर्मणि कर्तृप्रत्ययः। अस्थुः। तिष्ठतेश्छान्दसो वर्तमाने लुङ्। 'गातिस्था°' [२।४।७७] इति सिचो लुक्। 'आतः' [३।४।११० इति झेर्जुस् ॥३॥

भद्राः—श्रेयस् is the comparative of भद्र, just as 'better' is the comp. of 'good' in English and 'mieux' of 'bon' in French. The antonym of भद्र is पाप. किं स यजमानस्य पापभद्रमाद्रियेत···यं कामयेत पापीयान् स्यादिति...यं कामयेत श्रेयान् स्यादिति AB. xi. 7.

हरितः—fallows; *cf. Sakuntalā* I: अतीत्य हरितो हरींश्च वर्तन्ते वाजिनः। The *Bṛhaddevatā* (iv. 140-142) following the *Nirukta* mentions the different steeds of different deities: इन्द्रस्य हरयो ह्यश्वा अग्ने रश्वास्तु रोहितः। सूर्यस्य हरितश्चैव वायोर्नियुत एव च ॥ रासभः सहितोऽश्विभ्यामजाः पूष्णश्च वाजिनः। पृषत्योऽश्वास्तु मरुतां गावोऽरुण्यस्तथोषसाम् ॥ सवितुर्वाजिनः श्यावा विश्वरूपा बृहस्पतेः ॥ हरितः—from a root हृ, ह्र meaning originally to shine, to be yellow, green, grey or blue. Skt. हरित, Av. *zairta-*. The *t*-stem does not occur in Av. In the Dhātupāṭha we have हृ हरणदीप्त्योः. हृसृरुहियुषिभ्य इतिः Uṇ. i. 99. Cf. अतीत्य हरितो हरींश्च वर्तन्ते वाजिनः. *Sak*. I.

एतग्वाः—एत-ग्व going quickly, swift. एतग्व is also the name of the sun's horse. (एत in the plural denotes the steeds of the Maruts.) Av. *aētava-* (<*aē -ta-gv-a*). *éta-* from इ 'to go' means darting, rushing, swift, from I.E. *ai* or *āi* to burn, 'to shine' means variegated, glittering, shining. According to some scholars *étagva-* means possessing shining cows, *i.e.*, shining rays, thence by लक्षणा 'shining'.

अनुमाद्यासः—√*mad*, orig. to be wet, to drip, then to be drunk, then to rejoice.

नमस्यन्तः—क्यच् has been evidently added here acc. to सुप आत्मनः क्यच् and not acc. to नमोवरिवश्चित्रङः क्यच्. So the meaning appears to be desiring homage, hence deriving homage. Sāyaṇa takes the bull by the horn and says नमस्यन्तः means नमस्यमानाः but when an active verb is used in the passive sense it takes Ātm. terminations. In his com. on TB. ii. 8. 7. 1 Sāyaṇa says: नमस्कारमिच्छन्त इव प्रह्वीभूताः. Can the correct reading be नमस्कारं कुर्वन्त इव प्रह्वीभवन्तः?

Skandasvāmin: नमस्यन्तः पूजयन्तः सूर्यम्. Veṅkaṭa-mādhava merely says: प्रह्वीभवन्तः.

परि द्यावापृथिवी यन्ति सद्यः—*Cf.* iii. 58. 8 अश्विना परि वामिषः पुरूचीरीयुर्गीर्भिर्यतमाना अमृध्राः। रथो ह वामृतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः॥ 'Aśvins, around you come viands abundant vying with hymns and not to be despised. Your car born of established order, urged on by press-stones, traverses heaven and earth in one day.'

सद्यः—is used here in its original sense 'on the same day', 'to-day'. It is used in classical Sanskrit in the secondary sense 'immediately'. The chariot of the Aśvins also परि द्यावापृथिवी याति सद्यः iii. 58. 8. सद्यः and सद्दिवः (to-day), श्वः (to-morrow), ह्यः (yesterday) etc. are formed with अस् (V.G.S., p. 213).

तत् सूर्यस्य देवत्वं तन्महित्वं	तत्। सूर्यस्य। देवऽत्वम्। तत्। महिऽत्वम्।
मध्या कर्तोर्विततं सं जभार।	मध्या। कर्तोः। विऽततम्। सम्। जभार।
यदेदयुक्त हरितः सधस्थाद्	यदा। इत्। अयुक्त। हरितः। सधऽस्थात्।
आद्रात्री वासस्तनुते सिमस्मै॥४॥	आत्। रात्री। वासः। तनुते। सिमस्मै॥४॥

This (*tát*) is the divinity (*devatvám*) this (*tát*) the greatness (*mahitvám*) of Sūrya (*sūryasya*) that in the midst (*madhyā'*) of the work (*kártoḥ*) he has withdrawn (*sám jabhāra*) the spread out (*vi-tatam*) [web]. As soon as (*yadā' it*) he has yoked (*áyukta*) the bay steeds (*háritaḥ*) from their stall (*sadhásthāt*). Night (*rā'trī*) spreads (*tanute*) her garment (*vā'saḥ*) over all (*simásmai*), or still (*ā't*) spreads (*tanute*) around her garment (*vā'saḥ*) for him (*simásmai*).

सूर्यस्य *सर्वप्रेरकस्यादित्यस्य तद् देवत्वम् ईश्वरत्वं स्वातन्त्र्यमिति यावत्। महित्वम् महत्त्वं माहात्म्यञ्च तदेव। तच्छब्दश्रुतेर्यच्छब्दाध्याहारः। यत् कर्तोः। कर्मनामैतत्। प्रारब्धापरिसमाप्तस्य कृष्यादिलक्षणस्य कर्मणो मध्या

* Some MSS. read सर्वस्य प्रेरकस्य which is also found under the next stanza. But in that case too many स sounds come together.

मध्ये, अपरिसमाप्त एव तस्मिन् कर्मणि, विततम् विस्तीर्णं स्वकीयं रश्मिजालम् अस्तं गच्छन् सूर्यः संजभार अस्माल्लोकात् स्वात्मन्युपसंहरति।[1] कर्मकरश्च प्रवृत्तं *कर्मापरिसमाप्तमेव विसृजत्यस्तं यन्तं सूर्यं दृष्ट्वा। ईदृशं स्वातन्त्र्यं महिमा च सूर्यव्यतिरिक्तस्य कस्यास्ति? न कस्यापि। सूर्य एवेदृशं स्वातन्त्र्यं महिमानं चावगाहते। अपि च। इदित्यवधारणे। यदा इत् यस्मिन्नेव काले हरितः रसहरणशीलान् स्वरश्मीन् हरिद्वर्णानश्वान् वा सधस्थात् सहस्थानात्, अस्मात् पार्थिवाल्लोकात्, आदाय अयुक्त अन्यत्र संयुक्तान् करोति। यद्वा, युजिः केवलोऽपि विपूर्वार्थो† द्रष्टव्यः[2]। यदैवासौ स्वरश्मीन् अश्वान् वा सधस्थात्

[1] मध्या मध्ये कर्तोः ... कृष्यादिकर्मणः। अपरिसमाप्तेष्वेव प्रारब्धेषु कर्मस्वित्यर्थः। विततमात्मीयं रश्मिजालं सञ्जभार। Sk. मध्ये कर्मणः विततं तत् कर्मास्तं यन्तं सूर्यं दृष्ट्वा कर्मकरः संहरति V. M.; S. combines both views. महत्त्वाद्धीदमत्यन्तदुरुप-संहरं नान्यः सूर्यात् चक्षणेनैकेनैव संहर्तुं शक्नोति। Sk. मध्ये यत् कर्मणां क्रियमाणानां देवासुरमनुष्यसम्बन्धिनाम्। विततं रश्मिजालम्, अहर्लक्षणम्। संजभार। अयमेव संहरति, नान्य एतत्तनितुं शक्नोति नोपसंहर्तुम् इत्यभिप्रायः। Uvaṭa. सूर्यस्य तद् देवत्वं देवतानुभावः। तच्च महाभाग्यम् ऐश्वर्यम्। तत् किम्? कर्तोः। 'ईश्वरे तोसुन्कसुनौ' [३।४।१३] इति करोतेस्तोसुन्-प्रत्ययः। कार्यस्येश्वरस्य जगद्रूपस्य। Mahīdhara. सूर्यरश्मिसञ्चारे सति तदीयप्रकाशेनानुगृहीता मनुष्याः सर्वेषु देशेषु बहुविधानि कृष्यादिकर्माण्यारभन्ते, तदा यामचतुष्टयमात्रेण स रश्मिजालं संहृत्यास्तमेति। यतो रश्मिजालस्य जगत्प्रकाशनाय क्षणमात्रेण प्रसारणं पुनः संहरणं च नाल्पमहिम्नः सम्भवति, अतो महदेतन्माहात्म्यम्। S. on TB. ii. 8. 7. 1.

* कर्म dropped in most MSS.

† विपूर्वो—M. P. But under i. 105. 11 ते सेधन्ति पथो वृकम् S. says षिधु गत्याम्। अयं केवलोऽपि निपूर्वार्थो द्रष्टव्यः। Similarly under vi. 29. 5 न ते अन्तः शवसो धाय्यस्य he says: अत्र केवलोऽपि दधातिरवपूर्वार्थो द्रष्टव्यः. Again under vii. 104. 2 तपुर्यस्तु चरुरग्निवाँ इव he remarks: यसु। यसु प्रयत्ने। केवलोऽप्ययमाङ्पूर्वार्थो द्रष्टव्यः. Similarly under vii. 100. 1 he says: दयतिराङ्पूर्वार्थो द्रष्टव्यः and under i. 70. 9: हृञ् हरणे। केवलोऽपि सोपसर्गार्थो द्रष्टव्यः

[2] We find the same thing in classical Sanskrit. In *Kirāt.* i. 1 प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् commentators maintain that

सह तिष्ठन्त्यस्मिन्निति सधस्थो रथः। तस्मात् अयुक्त अमुञ्चत्*। आत् अनन्तरमेव रात्री निशा वासः आच्छादयितृ तमः सिमस्मै। (सिमशब्दः सर्वशब्द-पर्यायः।) सप्तम्यर्थे चतुर्थी। सर्वस्मिन् लोके। तनुते विस्तारयति[1]। यद्वा वासो वासरम् अहः, तत् सर्वस्मादस्माल्लोकादपनीय रात्री तमस्तनुते। [अत्र निरुक्तम्—'तत् सूर्यस्य देवत्वं तन्महित्वं मध्ये यत् कर्मणां क्रियमाणानां विततं संह्रियते, यदासावयुक्त† हरणान् आदित्य-रश्मीन् हरितोऽश्वानिति वा, अथ रात्री वासस्तनुते सिमस्मै ‡'वासरमहरवयुवती सर्वस्मात्' [नि॰ ४।११] इति॥ महित्वम्। 'मह पूजायाम्' [धा॰ १।७१६]। औणादिक इन्-प्रत्ययः 'तस्य भावस्त्वतलौ' [५।१।११९]। मध्या। मध्यशब्दात् सप्तम्येकवचनस्य 'सुपां सुलुक्॰' [७।१।३९] इति डादेशः। कर्तोः। करोते-

अयुङ्क्त has been used for न्ययुङ्क्त see *Kirātārjunīya* I (ed. by K. C. Chatterjee), p. 4, N. B. 1.

* P. notes three MSS. read अमुञ्चत्—a very good reading.

[1] कदा पुनरुपसंहारः? उच्यते। यदेदयुक्त। इच्छब्दः पादपूरणः। यदास्तमयानन्तरम् उत्तरेण मेरुं गन्तुं युङ्क्ते। हरितः स्वानश्वान्। क्व? उच्यते। सह तिष्ठन्ति यत्राश्वाः स सधस्थो रथ इहाभिप्रेतः। सप्तम्यर्थं चैषा पञ्चमी। सर्वेषामश्वानां सहस्थानभूत आत्मीये रथ इत्यर्थः। आत् तदेव च रात्री वासः। वासःशब्दोऽत्र क्रियाशब्दो वस आच्छादन इत्यस्य। वस्त्रवचनो वा। सामर्थ्याच्च कृष्णं वास आह नान्यत्। तत्सारूप्याच्च तमसि प्रयुज्यते। कृत्स्नस्य जगत आच्छादयितृ कृष्णवासःसरूपं वा तमः। Sk. किञ्च यदेत् अयुक्त यदा प्रयुङ्क्ते आत्मनि, आत्मसंस्थान् करोति। हरितः हरिद्वर्णान् रश्मीन्। ते ह्यस्तमनकाले लोहिततां यन्ति। सधस्थात् सहस्थानादाहृत्य। पृथिव्यादिलोकत्रयं तेषां सहस्थानम्। तत्र हि ते निपतन्ति। ..जगत्येकत्रादित्यसहितं ज्योतिरेकत्र तम आदित्यप्रभावात् प्रशमतीत्यभिप्रायः। Uvaṭa on VS. 33. 37. सह तिष्ठन्त्यंशवो यत्र तत् सधस्थं व्योममण्डलम्।··· सन्ध्याकाले पीतवर्णानंशून् यदा व्योममण्डलात् स्वस्मिन् योजयति, अनन्तरमेव निशा...सर्वं वस्तु तमसाच्छादयति। Mahidhara. यदेत् यदैव सधस्थात् कर्मानुष्ठातॄणां सहावस्थानयोग्यादस्माद्देशात् मेरुमतीत्य गन्तुं हरितः स्वकीयानश्वान् अयुक्त सूर्यः स्वरथे योजयति आत् अनन्तरमेव सिमस्मै सर्वस्मै प्राणिजाताय तदुपकारार्थं रात्री वासस्तनुते लोकप्रसिद्धरात्रिनिवासं करोति। अयमर्थः—मेरुं प्रदक्षिणीकुर्वन्नादित्यो यदैवास्मात् पार्श्वादपरपार्श्वं गन्तुमुद्युक्तस्तदानीमेव रात्रिर्भवतीति। S. under TB. ii. 8. 7. 2.

† अयुक्त M. P. ‡ वैसरम्—Some MSS. of *Nir*.

इतीसुन्-प्रत्ययः* । विततम् । विपूर्वात्तनोतेः कर्मणि निष्ठा । उदित्त्वेन क्त्वा-प्रत्यय इटो विकल्पनाद् 'यस्य विभाषा' [७।२।१५] इतीट्प्रतिषेधः । 'गतिरनन्तरः' [६।२।४९] इति गतेः प्रकृतिस्वरत्वम् । जभार । 'हृग्रहोर्भः°' [८।२।३२।१] इति भत्वम् । अयुक्त । युजेर्लुङि 'झलो झलि' [८।२।२६] इति सिचो लोपः । सधस्थात् । 'घञर्थे कविधानम्°' [३।३।५८।४] इत्यधिकरणे क-प्रत्ययः । 'सध-मादस्थयोश्छन्दसि' [६।३।९६] इति सधादेशः । दासीभारादित्वात् [६।२।४२] पूर्वपदप्रकृतिस्वरत्वम्[1] । रात्री । 'रात्रेश्चाजसौ' [४।१।३१] इति ङीप् ॥४॥

With *ab* compare तत् सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहभिर्दुदुह्रे v. 62. 2.

मध्या कर्तोः:—in the midst of the work of the peasant, etc., *i e.*. while their work was still unfinished, Sk. M. S.; in the midst of his (the sun's) or her (the night's) work, Geldner.

मध्या—Preposition governing the genitive infinitive कर्तोः. In form it is an Inst. sing. of *mádhya* with adverbial shift of accent. Similarly from *ántara* we have both Inst. forms *antarā́* and *ántareṇa* as prepositions. मध्या occurs four times in RV., thrice as a prep. with Gen. inf. and once as an adverb. Similar instrumental adverbs and prepositions are found in Greek also: *ánō* above, *kátō* below.

कर्तोः:—Acc., Dat., Abl., Gen. and Locatives of verbal nouns are used as infinitives in the Vedas. Of these only the Acc. of verbal nouns in *-tu* survived in class. Skt. "It is a remarkable fact that the infinitive in *tum*, the only form surviving in Sanskrit, occurs not more than five times in the RV., while the

---

* Some Mss. read करोतेरौणादिकस्तोसुन्-प्रत्ययः, others करोतेरौणादिकस्सुन्-प्रत्ययः, but तोसुन् is not an उणादि प्रत्यय and कसुन् is distinctly read in the rule भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् iii. 4. 16.

1 षड्विधसप्तोरन्तोदात्तत्वनिपातनं कृत्स्वरनिवृत्त्यर्थम् [६।३।९५।१] इत्यत्र सभियष्टस्य सधादेशोपलक्षणत्वात् सधशब्दस्यान्तोदात्तता । S. on AV. 1. 2. 1. The printed *Mahābhāṣya* reads "अन्तोदात्तत्ववचनम्".

dative infinitive, which in the RV. is more than seven times as common as all the rest put together, has already for the most part disappeared in the Brāhmaṇas''. (MACDONELL, V. G. S., p. 190.) The Gen. inf. in *tos* is found generally with the verb ईश् (*ईश्वरे तोसुन्कसुनौ P. iii. 4. 13) or the preposition मध्या.

विततं सञ्जभार—There is a sharp difference of opinion regarding the subject of सञ्जभार. Since the poet is speaking of Sūrya's greatness and since in the next stanza he says सूर्यो रूपं कृणुते द्योरुपस्थे one feels naturally inclined to take सूर्यः as the subject here also. This view is supported by vii. 63. 1 (उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम्। चक्षुर्मित्रस्य वरुणस्य) देवश्चर्मेव यः समविव्यक् तमांसि ॥ the god who rolled up the darkness like a skin. On the other hand, ii. 38. 4 पुनः समव्यद् विततं वयन्ती मध्या कर्तोर्न्यधाच्छक्म धीरः। उत् संहायास्थाद् व्यृतूँरदर्धररमतिः सविता देव आगात् ॥ 'the weaving lady has again rolled up the outspread (weft); in the middle of his labour the skilful artisan has laid down his work. Having bestirred himself he has arisen, he has parted the seasons. Quick and resolute God Savitā is come' has led some scholars to suggest that the subject here is the night and others to maintain that the subject is the labourer and still others to think that the sun is to be taken explicitly and the labourer implicitly as the subject of सञ्जभार.

Of those who regard सूर्यः as the subject of the first half Indian commentators followed by several European scholars point out that the very fact that the sun knows how to interrupt his own work points to his greatness, while Geldner holds that she who is disturbed in her work must in any case be the night. Acc. to the first view विततम् refers to light, acc. to the second to darkness. Geldner believes the purport of the stanza to be this: At the appearance of the Sun, Night must put off her work in Time's loom and the day-dress for Sūrya himself must now be spread out.

---

*ईश्वरपदासन्निधानेऽपि तोसुन्प्रत्ययः। S. under RV. ii. 15. 5.

• वितत—past part. of वि-तन् to spread out, *tan tá>tṇtá> tatá.* The *n* became a sonant. Short sonant nasals became *a* in Skt. and Gk. See p. 64. Skt. *tatáḥ*, Gk. *tatós*, Lat. *tentus.*

जभार—"The root *bhṛ-* 'bear' reduplicates with *j* (as if from √*hṛ*), making the stem *ja-bhṛ-*, forms from which occur nearly thirty times in the RV., beside only two forms from the regular stem *ba-bhṛ-*." MACDONELL, *Vedic Grammar.*

अयुक्त—3 sg. s-aor. Ātm. of युज् to yoke. Most of the difficulties in connexion with this stanza would disappear if we could take युज् in the sense of वि-युज with Sāyaṇa. It is well known how verbs signifying 'to go' are often used in the sense of 'coming'. (But vii. 60. 3[1] shows that अयुक्त does not mean 'unyoked' but 'yoked' and सधस्थ does not mean 'chariot' but 'stall'.) Again acc. to Geldner, Oldenberg, Wackernagel and their followers सिम never means सर्व or श्रेष्ठ. It is a reflexive pronoun like स्व, is cognate with Old Bulgarian *samu* meaning 'self', means 'self' and, like आत्मन् which also means 'self', is declined in the masc. gender and sing. number only.[2] The fact that in the सर्वादिगण P. i. 1. 27 it is placed immediately after सम led Indian grammarians to think that like सम, सिम also means सर्व. Patañjali (under iii. 1. 2. 11) and Śāntanavācārya (P. S. iv. 10) have also erred regarding the accent of the word. So Geldner translates: 'Night spins out the garment for him' and explains that the passage is vague like i. 108. 4*b* and means: 'She allows the sun to spread out the garment for himself'. Or we may take रात्री in the sense of 'time in general'. Acc. to Oldenberg *cd* means 'when he has yoked the horses from the stable the eternal day does not reign at that time but "the night works a garment for him," no one other than he shall wear the garment. Thus we find in st. 5 कृष्णमन्यद्धरितः सम्भरन्ति which refers to

---

[1] अयुक्त सप्त हरितः सधस्थात्।

[2] A. G. III, p. 578, Geldner, *Vedische Studien*, II.

the dark shape of the nocturnal sun.' He adds that *cd* practically says that when the sun has set it is night.

सधस्थात्—सध Av. *haδa* is the earlier form of सह and occurs as the first member in सधस्थ, सधमाद co-revelry, common feast, सधस्तुति joint praise, etc. सधस्थ lit. 'standing together,' 'present', then 'place where people stand together', then (by generalisation) any place.

आत्—This particle is the abl. sg. of the pronoun अ and lit. means 'from' or 'after that'. Av. *āt̰*. It means 'then, thereupon'.

रात्री—Acc. to philologists the word is derived from रा (I.E., ला) 'to remain buried or concealed'. Skt. राहु, Gk. *Lēthē* and Lat. *Latona* are all derived from this root. The final of रात्री had already become short at the time of Pāṇini so that he had to frame the rule रात्रेश्चाजसौ iv..1. 31 for the Vedas. In RV. the word ends in the long vowel throughout. In AV. रात्रिम् is the only form for the Acc. sg. and रात्रिः and रात्र्यै occur but once each in the Nom. and Dat. sing. respectively. In the later Saṁhitās and Brāhmaṇas both forms are found.

वासः—वसन, वस्त्र, वसान् are all from Skt. वस्ते, Av. *vaste*, he puts on, Gk. *hénnūmi* (**wés-nu-mi*) I clothe, put on, the *s* is found in the Gk. *heṣsō* I shall put on, *hé-es-to* had on, *esthēs* clothing. The root is found in Lat. *ves-tis* (Eng. *ves-ture*) and Eng. *wear.*

तन्मित्रस्य वरुणस्याभिचक्षे	तत् । मित्रस्य । वरुणस्य । अभिऽचक्षे ।
सूर्यो रूपं कृणुते द्योरुपस्थे ।	सूर्यः । रूपम् । कृणुते । द्योः । उपऽस्थे
अनन्तमन्यद्रुशदस्य पाजः	अनन्तम् । अन्यत् । रुशत् । अस्य । पाजः ।
कृष्णमन्यद्धरितः सं भरन्ति ॥५॥	कृष्णम् । अन्यत् । हरितः । सम् । भरन्ति ॥५॥

For the sight (*abhicákṣe*) of Mitra (*Mitrásya*) and Varuṇa (*Váruṇasya*) Sūrya (*Sū'ryaḥ*) manifests (*kṛṇute*) this (*tát*) form (*rūpám*) in the lap (*upásthe*) of the sky (*dyóḥ*). One form (*anyát*) of his (*asya*) is endless (*anantám*) white (*rúśat*) light (*pā'jaḥ*), while the other (*anyát*) the dark form (*kṛṣṇám*), bay steeds (*harítaḥ*) bear together (*sám bharanti*), or his bay steeds (*harítaḥ*) bear together (*sám bharanti*) one form (*anyát rūpám*) of his (*asya*)—the endless (*anantám*) white (*rúśat*) light (*pā'jaḥ*) and the other (*anyát*), the dark one (*kṛṣṇám*).

तत् तदानीम् उदयसमये मित्रस्य वरुणस्य एतदुभयोपलक्षितस्य सर्वस्य जगतः अभिचक्षे आभिमुख्येन प्रकाशनाय द्योः नभस उपस्थे उपस्थाने मध्ये सूर्यः सर्वस्य प्रेरकः सविता रूपम् सर्वस्य निरूपकं प्रकाशकं तेजः कृणुते करोति। अपि च अस्य सूर्यस्य हरितः रसहरणशीला रश्मयो हरिद्वर्णा अश्वा वा अनन्तम् अवसानरहितं कृत्स्नस्य जगतो व्यापकं रुशत् दीप्यमानं श्वेतवर्णं पाजः। बलनामैतत्। बलयुक्तम्[1], अतिबलस्यापि नैशस्य तमसो निवारणे समर्थम् अन्यत् तमसो विलक्षणं तेजः सम्भरन्ति अहनि स्वकीयागमनेन निष्पादयन्ति। तथा कृष्णम् कृष्णवर्णम् अन्यत् तमः स्वकीयापगमनेन रात्रौ। *यस्य रश्मयोऽप्येवं कुर्वन्ति किमु वक्तव्यं तस्य माहात्म्यमिति सूर्यस्य स्तुतिः॥ अभिचक्षे। सम्पदादिलक्षणो भावे क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वम्। द्योः। 'ङसिङसोश्च' [६।१।११०] इति पूर्वरूपता। उपस्थे। 'घञर्थे कविधानम्°' [३।३।५८।४] इति क-प्रत्ययः। मरुद्वृधादित्वात् [६।२।१०६।२] पूर्व-पदान्तोदात्तत्वम्। पाजः। पाति रक्षतीति पाजो बलम्। 'पातेर्बले जुट् च' [उ° ४।२०२] इत्यसुन्, जुडागमश्च। छान्दसो मत्वर्थीयस्य विनो लोपः॥५॥

मित्रस्य वरुणस्य—subjective genitives (कर्तरि षष्ठी).

अभिचक्षे—dative infinitive from अभि-चक्ष् to regard, V. G. S.,

---

[1] पाजस्वत् occurs in this sense in RV. When used as adjectives, stems in *as* accent the suffix as a rule. See p. 36.

* अश्व—all.

p. 191 *a*. चक्ष् is the reduplicated form of कश् (काश् to shine): *ka-kas*>*ca kas*>*cakṣ*. Skt. *caṣṭe*, Av. *caste*. *cf*. चक्षुर्मित्रस्य वरुणस्याग्नेः St. 1, मनो मित्रस्य वरुणस्य चक्षसे x. 37. 1.

कृणुते—In RV. the root is स्वादि उभयपदी. "Beside the regular and very frequent present stem कृ-णु (from कृ *make*) there begins to appear in the tenth Maṇḍala of the RV. the very anomalous कुरु (twice in the 2. s. impv. कुरु and once in the 1. pl. pr. ind. कुर्मः). The strong form of this stem, *karó*, which has the further anomaly of गुण in the root, first appears in the AV." V. G. S., p. 145. In the Avesta also the root is स्वादि. Skt. *kṛṇoti*, Av. *kərənaoiti*, Skt. *kṛṇute*, Av. *kərənūite*.

उपस्थे—Av. *upasta-*. Sāyaṇa explains the acc. on the second syll. with the help of पृषोदरादीनि यथोपदिष्टम् vi. 3. 109 in his com. on TS. i. 14 and with the help of महद्भ्वादि, as here, under RV. i. 31. 9: (सुपि स्थः [३।२।४] इति तिष्ठतेः कप्रत्ययः। आतो लोप इटि च [६।४।६४] इत्याकारलोपः। महद्भ्वादीनां छन्दस्युपसंख्यानम् [६।२।१०६।२] इति पूर्वपदान्तोदात्तत्वम्। Bhaṭṭa Bhāskara says under TS. i. 1. 4: उपस्थीयते अस्मिन्नित्युपस्थः। घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम् [३।३।५८।४] इति घञर्थे कः।) स्वाङ्गानामकुर्वादीनाम् [फि० ३।२] इति द्वितीयमक्षरमुदात्तम्।

रुशत्—gleaming, white. Only the pr. participle form is found in RV. रुशद्वत्सा रुशती श्वेत्यागात् i. 113. 2. The proper name रुशम also occurs several times. The root is read in the Dhātupāṭha as रुश रिश हिंसायाम् vi. 135-6. Yāska says: रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः (*Nir*. ii. 20, vi. 14). Gk. *lúgx*, Armenian *lusanun-kh*, Lit. *lúszis* and Eng. *lynx* are cognate.

पाजः—splendour. Some philologists think that the word was originally *स्पाजः from *स्पज् स्पश्, 'to shine.'

कृष्णम्—O. Pers. *kirsnan* 'black'. *Kṛṣṇa* black is accented on the second syll; when, however, it is a noun, it is accented on the first syll. कृष्णस्यामृगाख्या चेत्। फि० सू० १।११।

भरन्ति—Av. *barənti barainti*, Gk. *phéronti*, Goth. *bairand*.

(Mādhava explains *cd* thus: तस्य अपरमन्यत् अन्यतरतः स्थितं तेजः रश्मयः सम्भरन्ति। कृष्णं च अन्यद् अन्धकारम् इति। अह्नि श्वेतं तेजः सम्भरन्ति रात्रावन्धकारम्।

'द्वे द्रप्सी सतती वस्त एकः केशी विश्वा भुवनानि विद्वान्'* (TS. iii. 2. 2. 2) इत्यध्वर्यूणां मन्त्रः।

Take हरितः in its ordinary sense of the Sun's horses and the explanation leaves little to be desired.

Sāyaṇa also offers a very reasonable explanation under TB. ii. 8. 7. 2: अस्य सूर्यस्य अनन्तं पाजः अत्यधिकं रश्मिजालरूपं बलम् अन्यत् वक्ष्यमाणापेक्षया पृथगेव भूत्वा रुशत् दीप्यते, मध्याह्नकालेऽत्यधिकेन तेजसा प्रकाशते। अत एवाम्नायते—"बृहस्पतेर्मध्यन्दिनः। तत् पुण्यं तेजस्वाह्नः। तस्मात् तर्हि तेक्ष्णिष्ठं तपति" [तै० ब्रा० १।५।३।२] इति। अन्यत् पूर्वोक्तात् मध्यन्दिनात् पृथगेव रात्रौ कृष्णं रूपं हरितः सूर्यस्य अश्वाः सम्भरन्ति सम्पादयन्ति। एतेऽश्वा यदा मेरोः पश्चिमभागे गच्छन्ति तदानीमेव कृष्णं रूपं सम्पद्यते।

Acc. to Uvaṭa and Mahīdhara who read later philosophic ideas into this stanza the limitless luminous form is the निर्गुण ब्रह्म, the form of pure bliss which cannot be cognised by the senses and the dark form is the visible or सगुण ब्रह्म which is cognised or brought about by the हरित, *i. e.*, deer in the shape of the senses.

With this stanza, *cf.* x. 37. 3 न ते अदेवः प्रदिवो नि वासते यदेतशेभिः पतरै रथर्यसि। प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य॥ 'No godless man from time remotest draws thee down when thou art driving forth with winged dappled steeds. One lustre waits upon thee moving to the east, and Sūrya, thou arisest with a different light.'

Acc. to some scholars, Sūrya assumes the form of Mitra and Varuṇa so that he may see the virtuous and the vicious respectively. In the form of Mitra he is bright and in the form of Varuṇa he is dark.

---

* एक आदित्यः द्वे द्रप्सी अहोरात्रे उभे वाससी वस्ते अहस्कार्याच्छादयति। कीदृशे द्रप्सी? सतती सातत्येनाविच्छेदेन वर्तमाने। न ह्यह्नो रात्रेश्च मध्ये कश्चिद्विच्छेदोऽस्ति। कीदृश एक आदित्यः? केशी केशसमानरश्मियुक्तः। विश्वा भुवनानि विद्वान् सर्वांल्लोकान् स्वरश्मिभिः प्रकाशयमानः। उभयोर्वस्त्रयोर्मध्ये रात्रिरूपं वस्त्रं मलिनम् अहोरूपं तु शुक्लम्। S.

अद्या देवा उदिता सूर्यस्य
निरंहसः पिपृता निरवद्यात्।
तन्नो मित्रो वरुणो मामहन्ता-
मदितिः सिन्धुः पृथिवी उत द्यौः ॥६॥

अद्य । देवाः । उत्ऽइता । सूर्यस्य ।
निः । अंहसः । पिपृत । निः । अवद्यात् ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् ।
अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥६॥

This day (*adyá*), O gods (*devāḥ*), at the rise (*úditā*) of the sun (*sū'ryasya*), ferry us across (*niḥ piprtá*) trouble (*áṁhasah*), across blame (*niḥ avadyā't*). This (*tát*) may Mitra (*Mitráḥ*) and Varuṇa (*Váruṇaḥ*) grant (*māmahantām*) us (*naḥ*), and Aditi (*A'ditiḥ*), the sea (*sindhuḥ*), Earth (*pṛthivī'*) and (*utá*) Heaven (*dyáuḥ*)

हे देवाः द्योतमानाः सूर्यरश्मयः, अद्य अस्मिन् काले सूर्यस्य आदित्यस्य उदिता उदितौ उदये सति इतस्ततः प्रसरन्तो यूयमस्मान् अंहसः पापात् निपिपृत निष्कृष्य पालयत। यदिदमस्माभिरुक्तं नः अस्मदीयं तन्मित्रादयः षड् देवताः ममहन्ताम् पूजयन्तु अनुमन्यन्ताम् रक्षन्त्वितियावत्। मित्रः प्रमीतेस्त्रायकोऽहरभिमानी देवः[1], वरुणः अनिष्टानां निवारयिता रात्र्यभिमानी[2]।

---

[1] √मित्रः प्रमीतेः। त्रायते। संमिन्वानो द्रवतीति वा। मेदयते वा। *Nir.* x. 21. मित्रौजत्य जना विश्वे यदिमं पर्युपासते। मित्र इत्याह तेनैनं विश्वामित्रः स्तुवन् स्वयम्॥ *Bṛhaddevatā* ii. 49. प्राणवृत्तेरहरभिमानी देवतात्मा मित्रः। Śaṅkara on TU. i. 1. प्रकर्षेण सर्वैर्मीयते ज्ञायते तथा सर्वान् वृष्टिप्रदानेन त्रायते इति वा (?) मित्रः। S. on RV. iii. 59. 1.

[2] √वरुणो वृणोतीति सतः *Nir.* x. 3. तोयोमान्वावृणोत्येको मूर्तेन तु रसेन यत्। तयैनं वरुणं मत्वा स्तुतिष्वाहुः कपयव:॥ BD. ii. 33. अपानवृत्ते रात्र्यभिमानी देवतात्मा वरुणः। Śaṅkara on TU. 1.1.

अदितिः अखण्डनीयादीना वा देवमाता[1]। सिन्धुः स्यन्दनशीलोदकाभिमानिनी देवता। पृथिवी भूलोकस्याधिष्ठात्री द्यौः द्युलोकस्य। उतशब्दः समुच्चये॥ अथा। 'निपातस्य च' [६।३।१३६] इति संहितायां दीर्घत्वम्। उदिता। उत्पूर्वादेतेर्भावे क्तिन्। 'सुपां सुलुक्°' [७।१।३९] इति डादेशः। 'तादौ च°' [६।२।५०] इति गतेः प्रकृतिस्वरत्वम्। पिपृत। 'पॄ पालनपूरणयोः' [धा° ३।४]। पृ इत्येके। लोटि जुहोत्यादित्वाच्छपः श्लुः। द्विर्वचनोरदत्वहलादिशेषाः। 'अर्तिपिपर्त्योश्च' [७।४।७७] इत्यभ्यासस्येत्वम्। 'सार्वधातुकमपित्' [१।२।४] इति तशब्दस्य ङित्त्वे सति 'ऋचि तुनुघ°' [६।३।१३३] इत्यादिना संहितायां दीर्घः ॥६॥

अथा and पिपृता—metrical lengthening.

उदिता—The Loc. sg. of *i*-stems has two forms in RV.—one ending in *au* and the other in *ā*, the latter occurring only before consonants.

अंहसः—Abl. sg. of *aṁhas*. In पाहि...मर्तमंहः, RV. vi.3.1 अंहः is used by Haplology for अंहसः (A.G. III, p. 80); *áṅhas* (lit. that which chokes or throttles,) trouble, distress. Av. *aṅzah*, Lat. *angere*, to throttle, to cause pain, Gk. *ágkhein*, to choke, to throttle, Eng. *anger*, *anguish*, etc. are cognate.

नि:—The upasarga alone is used for the repetition instead of the full verb in the Avesta also; *e.g.*, *nī-tē, zāire, maδəm mruyē, nī aməm, nī vərəθraγnəm, nī dasvarə, nī vaēšazəm, nī fradaθəm, nī varədaθəm, nī aojō vīspō-tanūm, nī mastīm vīspō-paēsaṅhəm, nī tat̰ yaθa gaēθāhva vasō-Xšaθrō fracarāne t̰baēšō-taurvāo drujəm-vanō*. I ask of thee, O Golden-hued, for

[1] अदितिरदीना देवमाता॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम्॥ [RV. i. 89. 10] इत्यदितेर्विभूतिमाचष्टे। *Nir.* iv. 22-23. न कुतश्चन यद्दीनो ह्यत्वा तिष्ठति मध्यमः। राहूगण ऋषिक्षेन प्राह्नेनं गोतमोऽदितिम्॥ BD. ii. 46.

fervour, for power (and) for success (as well); for health (and) for the means-of-gaining-health; for advancement (and) for increase; for strength of-(this)-whole-body, (as well as) for wisdom all-embracing:—for (all) this (I ask) so that in (all) lands I may move-about free-at-will, overcoming-opposition, (and) conquering-the-unbeliever. TARAPOREWALA, *Selections from the Avesta*, pp. 6, 7. A good example from RV. is व्यस्मद् द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ii. 33. 2. Drive far away from us hatred, farther away distress, far away diseases in all directions.

पिपृत—2 pl. imp. of पृ or पॄ to take across. The original meaning of the root is 'the completion of a forward movement.' Av. *par* to go over or through, Av. *pərətu* bridge, Lat. *portāre* 'to carry'; Gk. *póros* passage, way, Eng. *ferry*, *for-d*, etc., show the same root which is also contained in Gk. *Eu-phrátēs*, *Bós-phoros* and Eng. *Ox-ford*.

When the verb of two clauses is the same it usually appears in the first only, and that in an accented form. Cf. V. G. S. p. 468 β. In ते न. कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये RV. x. 63. 8 *pipṛta* is unaccented as there is only one clause.

अवद्यात्—*a-vadyá* lit. not much to speak of, blame-worthy, hence blemish. S. derives the word under iii. 31. 8, but is silent about the accent. Following in the foot-steps of Bhaṭṭa Bhāskara [on TS. ii. 2. 14. 33] he explains the accent of अवद्य with the help of the rule ययतोश्चातदर्थे P. vi. 2. 156 under RV. iv. 4. 15. Commentators are, however, unanimous in holding that य and यत् in that rule are तद्धित suffixes and not कृत् ones. S. explains the अन्तोदात्तत्व of अनाधृष्य in a similar way.* But in the commentary on AV. he very pertinent-

* वेदभाष्यकृतस्तत्र तद्धितानुवृत्तिं नानुमन्यन्ते। तथाच......अवद्यशब्दे 'ययतोश्च°' इत्यन्तोदात्तत्वं तैर्दर्शितम्।...यत्तु वेदभाष्ये 'अनाधृष्यं देवानाम्' इत्यत्र प्रकृतसूत्रेणान्तोदात्तत्वमुक्तं तच्चिन्त्यम्, निरनुबन्धकपरिभाषया तदनुबन्धकपरिभाषया च ययद्यतयोरेव अपीऽपकर्षात्। स्वरसिद्धान्तचन्द्रिका, p. 177.

ly cites the rule क्त्योकेष्पयार्वादयश्च P. vi. 2. 160. Of course from the orthodox point of view the accentuation of अवद्य does not present the slightest difficulty, as we can always say: अवद्यपण्येति सूत्रे अन्तोदात्तोऽवद्यशब्दो निपातितः. But there is hardly any doubt that the relevant rule here is क्त्योकेष्पयार्वादयश्च and there is no valid ground for excluding य and यत् from the scope of this rule. Macdonell says in his *Vedic Grammar* (p. 94, 2b). 'The privative particle *a-* or *an-* when compounded with a participle, adjective or substantive is nearly always accented' and adds in a foot-note, 'Not, however, when the second member is a *gerundive*, a root or a noun with verbal meaning ending in *-yu*, *-tnu*, *-snu*, *-in*, *-tṛ-*.' In another foot-note he says: 'This (*i.e.*, अन्तोदात्तत्व) is the regular accent of the gerundive with the negative prefix, which is, however, accented in some half dozen instances.'

अनवद्य is a बहुव्रीहि compound and is accented on the final syl. acc. to नञुसुभ्याम्. P. vi. 2. 172.

मामहन्ताम्—3 pl. impv. perfect Ā of *mah* to be great. The vowel in the reduplicating syllable is generally short, in the case of about 30 roots it is long. In most cases it is short in the Pada-text. Where both the Saṁhitā-text and the Pada-text show the long vowel which would appear to be irregular acc. to class. Skt., Sāyaṇa generally justifies the lengthening acc. to तुजादीनां दीर्घोऽभ्यासस्य. Where the Saṁhitā text shows the long vowel while Pp. shows the short vowel, S. usually has recourse to the rule अन्येषामपि दृश्यते vi. 3. 137. Thus commenting on मामहे RV. i. 81. 1 he says: संहितायामभ्यासस्य 'अन्येषामपि दृश्यते' इति दीर्घत्वम्। तुजादित्वे हि तूतुजान इतिवत् पदकालेऽपि दीर्घः श्रूयेत. Under i. 94. 16, however, he explains the formation of मामहन्ताम् thus: मह पूजायाम्। भौवादिकः। लोटि 'बहुलं छन्दसि' [२।४।७६] इति शपः श्लुः। तुजादित्वादभ्यासस्य दीर्घत्वम्। Again under i. 117. 17 he says: संहितायां छान्दसमभ्यासस्य दीर्घत्वम्। Under iii. 52. 6 he explains मामहस्व thus: 'मह पूजायाम्' इत्यस्य यङ्लुगन्तस्य लोटि व्यत्ययेनात्मनेपदम्। अपो लुगभावश्छान्दसः।

तन्नो मित्रो वरुणो मामहन्ताम्, etc.—*Cf.* vii. 52. 2 मित्रस्तन्नो वरुणो मामहन्त, ii. 27. 1 शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः etc.

तन्नो मित्रो वरुणः, etc.—RV. i. 94-96, 98, 100-103, 105-115, ix. 97 end with this hemistich.

अदितिः—अदीना अखण्डनीया वा पृथिवी देवमाता वा। दो अवखण्डने। अस्मात् कर्मणि क्तिनि "द्यतिस्यतिमास्थाम्" [७।४।४०] इति इत्त्वम्। यास्कपक्षे तु दीङ् क्षये इत्यस्मात् क्तिनि व्यत्ययेन ह्रस्वत्वम्। नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम्। See under RV. v. 62. 8.